N.S.P

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निबन्धादर्शः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बालनिबन्धादर्शः

(प्रथमा पूर्वमध्यमा विशारद (प्रथमवर्ष) तथा एफ्. ए. बी. ए. आदि परीक्षाओं में निबन्ध शिक्षार्थी संस्कृत-छात्रों के लिये परम उपयोगी अतिसरल संस्कृत-निबन्ध पुस्तक)

सम्पादक

पण्डित श्रीविश्वनाथशास्त्री

आचार्य—श्रीसरस्वतीसंस्कृतकालेज,

खन्ना (लुधियाना) पंजाब

उपसम्पादक

श्रीरामनाथशास्त्री M. A. M. O. L.

(पूर्व प्रोफेसर श्रीसरस्वतीसंस्कृतकालेज, खन्ना)

Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya * Bharatiya Vidya
780

प्रकाशक

मोतीलाल बनारसीदास

दिल्ली :: वाराणसी :: पटना

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रकाशक

© मोतीलाल बनारसीदास
नेपालीखपरा, वाराणसी–१

द्वितीय संस्करण : १९६४
मूल्य : एक रुपया पचास नये पैसे

...Sri Sankaracharya Sanskrit Mahavidya...
280

मुद्रक
गौरीशंकर प्रेस,
मध्यमेश्वर, वाराणसी—१.

सर्वप्रकार की पुस्तकें निम्नलिखित स्थानों से मिल सकती हैं :—
१. मोतीलाल बनारसीदास, बंगलोरोड, जवाहरनगर, दिल्ली–६
२. मोतीलाल बनारसीदास, नेपालीखपरा, वाराणसी–१
३. मोतीलाल बनारसीदास, बांकीपुर, पटना–४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निवेदन

संस्कृत में निबन्ध विषय की पुस्तकें बहुत कम हैं। इन्हीं दिनों इस विषय की दो पुस्तकें अत्यन्त सुन्दर रूप में निकली हैं, पहली है श्रीचारुदेवशास्त्री, एम्. ए. की "प्रस्तावतरङ्गिणी" यह अपने विषय की अपूर्व पुस्तक है, अधिकारपूर्ण भाषा में लिखी गयी है, और प्रौढनिबन्ध-शिक्षार्थियों के लिए परम उपयोगी है। दूसरी अपनो "आदर्शप्रस्ताव-रत्नमाला" है। यह सभी प्रकार के निबन्धों की परमोपयोगी संग्रहात्मक पुस्तक है, सरल संस्कृत में निबद्ध होने के कारण बालक तथा प्रौढ सभी शिक्षार्थी इससे पूर्ण लाभ उठा सकते हैं।

किन्तु संस्कृत की प्रारम्भिक श्रेणी के शिक्षार्थी छात्रों के लिए कोई निबन्धपुस्तक नहीं है, इस असह्य अभाव को दूर करने के लिए–विशेषतः तब जब कि 'प्रथमा' परीक्षा में भी निबन्ध एक अनिवार्य विषय के रूप में नियत कर दिया गया है—यह पुस्तक सम्पादित की गयी है।

प्रारम्भ में छात्रों के लिए निबन्ध विषयक गम्भीर विचार में जाने की आवश्यकता नहीं है, किसी भी विषय पर निबन्ध लिखते समय उस विषय में जितनी जानकारी उन्हें प्राप्त है उसे शुद्ध सरल भाषा में लिख देना उनके लिए पर्याप्त है। स्कूलों में ऐसे छोटे-छोटे निबन्ध लिखाए जाते हैं, वे अपनी मातृभाषा में होते हैं तो कोई कठिनाई नहीं होती। संस्कृत में लिखते वे सङ्कोच करते हैं, अतः उनके लिए एक सुन्दर सरल मार्ग होना चाहिए। कुछ निबन्ध अतिसरल संस्कृत में उनके सामने रहने चाहिए, जिससे वे वैसे निबन्ध लिखने में उत्साहित हो सकें तथा कुछ आवश्यक बातें निबन्ध के सम्बन्ध में उन्हें ज्ञात हो जानी चाहिए, तब वे उत्तम निबन्ध लिख सकेंगे। इसके लिए जहाँ हमने इस पुस्तक में कतिपय आदर्श निबन्ध संग्रह किये हैं वहाँ निबन्धविषयक सभी बातें

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जो प्रारम्भिक शिक्षार्थी के लिए परम आवश्यक है अतिसरल संस्कृत द्वारा प्रस्तावना में प्रतिपादित कर दी हैं।

हमने छात्र को निबन्ध-विषयक उलझनों से बचाते हुए सरलमार्ग पर चलाने का प्रयत्न किया है। बहुत ही सरल रूपमें निबन्ध की परिभाषा बताकर निबन्ध के केवल तीन भेद सामने रखे हैं—१. परिचयात्मक, २. चरितात्मक, ३. विवेचनात्मक। इनके लिखने का अतिसरल साधारण क्रम दे दिया गया है। तीनों प्रकार के निबन्धों के आदर्श पुस्तक में संग्रह किये गये हैं। निबन्ध संग्रह करते समय हमने साधारण ज्ञान का विशेष ध्यान रखा है। परिचयात्मक निबन्धों में देश के विशिष्ट नगर और नदियों तथा विद्यालय विश्वविद्यालय आदि तथा मेले त्योहार आदि का क्रम रखा है। चरितात्मक निबन्धों में जहाँ राम और कृष्ण का चरित्र से परिचय कराया गया है वहाँ देश के प्रसिद्ध नेताओं के चरित्र भी दिये गये हैं।

एवं विवेचनात्मक निबन्धों में धर्म, विद्या, सन्तोष, धैर्य, ब्रह्मचर्य, व्यायाम, उद्योग आदि विषयों के अतिरिक्त वर्तमान समयोपयोगी सामाजिक विषयों पर भी निबन्ध लिखे गये हैं, जैसे—संयुक्तराष्ट्रसंघ, राष्ट्रीयता, अन्ताराष्ट्रीयता, विज्ञान तथा उसके आविष्कार और भारत का संविधान इत्यादि। इनके पढ़ने से जहाँ निबन्ध लिखने की योग्यता बढ़ेगी वहाँ साधारण ज्ञान की भी विशेष वृद्धि होगी।

इस प्रकार यह पुस्तक प्रारम्भिक छात्रों के लिए अत्यन्त उपयोगी सिद्ध होगी—यह हमें पूर्ण विश्वास है।

सम्पादक
उपसम्पादक

ता० १५. ३. ५२

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

भारतीय विद्या भवन
नई दिल्ली
श्री/श्रीमती/कुमारी.
को.........परीक्षा.........में
होने पर पुरस्कृत की गई
मंत्री
दिनांक.......................

विषयसूची

	विषयः	पृष्ठम्
	प्रस्तावना	
१	श्रीगणेशः	१
२	गौः	३
३	विद्यालयः	७
४	गङ्गा	११
५	यमुना	१५
६	उत्तरप्रदेशः	१८
७	वाराणसी	२१
८	हिन्दूविश्वविद्यालयः	२४
९	विजयदशमी	२९
१०	दीपमाला	३२
११	ग्रामोत्सवः	३५
१२	श्रीरामचन्द्रः	३७
१३	श्रीकृष्णचन्द्रः	४१
१४	लोकमान्यस्तिलकः	४९
१५	महामना मालवीयः	५३
१६	महात्मा गान्धिः	५६
१७	पण्डितजवाहरलालनेहरूः	६१
१८	रूप्यकस्यात्मकथा	६५
१९	धर्मं चर	६७
२०	ब्रह्मचर्यम्	७३
२१	विद्या	७८

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

	विषयः	पृष्ठम्
२२	सन्तोषः	८२
२३	उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः	८६
२४	लोभः	९०
२५	आपदां तरणिर्धैर्यम्	९३
२६	कः परः प्रियवादिनाम्	९७
२७	दरिद्रता दोषः	१००
२८	भूकम्पः	१०३
२९	चन्द्रोपरागः	१०७
३०	व्यायामः	११०
३१	यस्य बुद्धिर्बलं तस्य	११३
३२	मातृभूमिः	११६
३३	संयुक्तराष्ट्रसङ्घः	११९
३४	राष्ट्रीयता	१२३
३५	अन्ताराष्ट्रीयता	१२६
३६	विज्ञानं वैज्ञानिका आविष्काराश्च	१३०
३७	भारतसङ्घस्य संविधानम्	१३५
३८	सहयोगः प्रतियोगिता च	१४२

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ॐ

बालनिबन्धादर्शस्य

प्रस्तावना

अथाद्य विद्यार्थिनां योग्यतापरीक्षायाः कृते निबन्धलेखनं निकषायमाणमस्ति, तत एव च सर्वत्र परीक्षासु निबन्धोऽप्येकोऽनिवार्यो विषयः। उच्चपरीक्षासु तथा सम्प्रति प्रथमपरीक्षास्वपि निबन्धेनैव क्रियते योग्यता-परीक्षणं भाषाधिकार-परीक्षणं रचनाकौशल-परीक्षणं साधारण-ज्ञानपरीक्षणं चेति निबन्धशिक्षापि परमावश्यकतामापन्ना। तत्र प्राथमिकशिक्षार्थिनां कृते शिक्षणीयं क्रममाश्रित्य किञ्चिद् वक्ष्यामः—

निबन्धपरिभाषा

अनन्ताः सन्ति निबन्धविषयाः साधारणा विशिष्टाश्च, कदाचित् साधारणतरं तृणगुल्माद्यपि प्रस्तोतव्यो भवति, सर्वमहत्तरः परमात्मापि प्रस्तूयते कदाचित्। एवं ब्रह्मादिस्तम्बपर्यन्तं सर्वोऽपि पदार्थः प्रस्तोतव्यतां निबन्धविषयतां वाऽर्हति। तथा च निबन्धविषयभेदाद् निबन्धा अपि भिन्नभिन्ना एव स्युरिति स्वाभाविकमेव। न सर्वत्र एक एव क्रमो लेखन-प्रकारो वा, नदी-नगर-ग्राम-प्रान्त-देशादिपरिचयात्मकेषु निबन्धेषु न भवत्यावश्यकता प्रतिज्ञादीनाम्, चरितात्मकेषु च भवति भिन्न एव लेखन-प्रकारः, तथा विवेचनात्मकेषु निबन्धेषु प्रतिज्ञा-हेतु-दृष्टान्तोपसंहाररीत्या प्रवर्तन्ते लेखकाः। एवमत्यन्तविजातीयेषु अनन्तेषु निबन्धविषयेषु निबन्धा-नामानन्त्यं स्वाभाविकमिति कोऽसौ सर्वानुगतो धर्मो यस्य लक्षणत्वं स्वीक्रियेत, का च सा सर्वानुगता परिभाषा या निबन्धपरिभाषात्वेन

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उपन्यस्येत । तत्र गम्भीरविचारपरायणा वयं समस्त-निबन्ध-तत्त्वज्ञानिभिः संवदन्तोऽन्ते इदमेव निश्चिनुमः—

कमप्येकं विषयमादाय क्रमबद्धया सुबोधसरलया भाषया तद्विषयक-सर्वाङ्गीण-परिचयप्रदानं प्रतिपादनं विवेचनं वर्णनं वा निबन्ध इति निबन्ध-परिभाषा ।

अर्थात् कस्यापि विषयस्य सर्वतोभद्रं प्रतिपादनं परिचायनं वर्णनं विवेचनं वा यत् क्रियते स निबन्धः । अस्य सर्वप्रथमं साधनं 'भाषा' सा सरला, सुबोधा ललिता च स्यात्, रचना चाऽनुज्झितार्थसम्बन्धा, प्रति-पादनं वर्णनं विवेचनं वा सरसं विशदं चित्ताकर्षकं च भवेत् । किं बहुना, निबन्धनीयस्य विषयस्य सुचारु मनोहरं शब्दमयं चित्रमिव चित्रितं क्रियेत । भवेच्च प्रतिफलिता यत्र स्वकीया स्वतन्त्र-विचारधाराऽपि । तदिदमुच्यते निबन्धः प्रबन्धः प्रस्तावो वा ।

निबन्धभेदाः

यद्यपि निबन्धभेदा अनेकरूपतया प्रतिपाद्यन्ते निबन्ध-विशेषज्ञैः, किन्तु बालानां निबन्धशिक्षार्थिनां कृते केवलं भेदत्रितयमेवोपन्यस्यामः—

(१) परिचयात्मकाः, (२) चरितात्मकाः, (३) विवेचनात्मकाश्चेति ।

तत्र—

(१) परिचयात्मकाः=साधारणवर्णनात्मकाः । एषु नदीपर्वतादि-प्राकृत-दृश्यानां प्रान्त-देश-नगर-ग्रामादीनां विद्यालयादिसंस्थानां मेलामहोत्सवा-दीनां जातीय-राष्ट्रियादिसम्मेलनानां यात्रादिक्रमाणां व्रतोत्सवादीनां च क्रियते वर्णनं परिचय-प्रदानात्मकम् । साधारणतया चात्रत्यः क्रमो निर्दिश्यते —

नदीवर्णने—

(क) कुतः प्रादुर्भावः, कुत्र च विलयः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(ख) तटवर्ति-नगराणि, व्यापारोपयोगश्च ।

(ग) तस्या धार्मिकं महत्त्वं, वैज्ञानिकं महत्त्वं तज्जलादीनाम् ।

(घ) ततः कुल्या-प्रवर्तनम्, भूमिसेचनाद्युपयोगः, इत्यादिः ।

नगरवर्णने—

(क) कस्मिन् देशे प्रान्ते नदीतीरे चावस्थितः ।

(ख) नामकरणे कारणम्, जनसंख्या च ।

(ग) राजमार्गाऽऽपणपथ-रथ्या-महाभवनादिवर्णनम् ।

(घ) दर्शनीयं प्रसिद्धं च तत्रत्यं किम् ?

(ङ) के च तत्र वसन्ति महोत्सवा मेला वा ।

संस्थावर्णने—

(क) संस्थाया नाम, अवस्थितिस्थानम् ।

(ख) स्थापनकालः, संस्थापकपरिचयश्च ।

(ग) संस्थाया भवनस्य वर्णनम्, कर्मचारिणां परिचितिश्च ।

(घ) विद्यालयश्चेदध्यापनम्, श्रेणयः, छात्रसंख्या, आचार्यादिविशेष-परिचयश्च ।

(ङ) प्रबन्धः परीक्षादिपरिणामश्च ।

(च) छात्राणां धार्मिकं नैतिकं च जीवनम् ।

(छ) भाविशुभाऽऽशंसनं चेति ।

मेलामहोत्सवादिवर्णने—

(क) कुत्र कदा भवति, कस्मात्कालात्प्रवृत्तः ।

(ख) कया जात्या कया चैतिहासिकघटनयाऽस्य सम्बन्धः ।

(ग) किं किं चात्र भवति, वैज्ञानिकं व्यावहारिकं च तद्रहस्यम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(घ) काश्च तत्र कुप्रथाः, कुतः प्रचलिताः, कथं च क्रियते तासां निरोधः। काश्च तासां स्थाने सुप्रथाश्चाल्येरन्।

(ङ) देशान्तरे तस्य किं किमस्ति स्वरूपम्।

(२) चरितात्मका निबन्धाः—कस्यापि महापुरुषस्य जीवतो मृतस्य वा जीवनकालिकमितिवृत्तमाश्रित्य प्रवर्तन्ते। अयमत्र भवति लेखनक्रमः—

(क) प्रसङ्गापातानन्तरं चरितनायकाविर्भावकालिकी देशधर्मादि-परिस्थितिः।

(ख) चरितनायकस्य कुलजन्मस्थानादिपरिचयः।

(ग) जन्मकालो वर्षमासतिथ्यादिरूपः।

(घ) पालन-पोषण-विद्योपार्जनादिः।

(ङ) विवाहः, कार्यक्षेत्रम्, संतानादिवर्णनं च।

(च) जीवनस्य विशिष्टा घटनाः, आदर्श-पथालम्वनकारणीभूता च घटना का ?

(छ) विशिष्टानि उपकारकार्याणि।

(ज) गुणाः, मानः, प्रतिष्ठा च।

(झ) नैतिकं धार्मिकं च (=आध्यात्मिकं च) वैशिष्ट्यम्। स्वभावश्च।

(ञ) परलोकयात्रा (मृतस्य) चेत्।

(३) तृतीयश्च भेदः, विवेचनात्मका निबन्धाः—एषु हि विषयस्य गुणदोषादिविवेचनपुरःसरं पूर्वापरविशकलनविधया प्रवर्तते विचारः। विषयाश्चात्र भवन्ति—धर्मः, सत्यम्, सन्तोषः, अहिंसा, दारिद्र्यम्, विद्या, विनयः, शीलम्, इत्यादयः।

एतेषु प्रायः प्रतिज्ञोपपत्तिदृष्टान्तोपसंहारन्यायेन प्रवर्तन्ते लेखकाः। बालानां च कृते संक्षिप्तसरलेन प्रकारेण लेखनक्रमप्रदर्शनाय निबन्धाङ्गानां क्रियते प्रतिपादनम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निबन्धाङ्गानि

(१) प्रतिज्ञा, (२) उपपतिः, (३) दृष्टान्तः, (४) उपसंहारः इति चत्वारि निबन्धस्याङ्गानि । प्रसङ्गापातनं च प्रतिज्ञाया भूमिकैवेति न पृथक् निबन्धाङ्गत्वं तस्य । प्रसङ्गापातनं नाम प्रसङ्गप्रवृत्तिः, प्रसङ्गचालनं वा, तदिदं केनापि हृदयहारिणा प्रकारेण प्रवर्तनीयम् ।

(१) प्रतिज्ञा

निबध्यमानस्य विषयस्य स्पष्टतया निर्देशः प्रतिज्ञा । तथोच्यते— "साध्यनिर्देशः प्रतिज्ञा" । स्वरूपं विषयस्य प्रदर्श्यतामत्र निर्देशानन्तरम् । सति सम्भवे तस्य भेदाश्च दर्शनीयाः । अथ विधेयस्य विधिः, निन्द्यस्य निषेधश्चान्ते क्रियताम् । एवं प्रतिज्ञायां निबन्धनीयस्य विषयस्य सम्पूर्णापि रूपरेखा तद्विषयका लेखकस्य स्वतन्त्रा विचारा धारणाश्च निर्दिश्येरन् ।

(२) उपपत्तिः

प्रतिज्ञायां निर्दिष्टस्य हि विषयस्य हेतुभिस्तर्कवितर्कैश्चान्वयव्यतिरेकाभ्यां समर्थनम्=उपपत्तिः । अत्र हि निबन्धनीयस्य विषयस्य लाभा अलाभाश्च प्रदर्श्यन्ते, वैज्ञानिक-महत्त्वमुपयोगित्वं च प्रतिपाद्यते । पारलौकिका लाभाः, शरीरे मनसि समाजे च तस्य कस्को भवति प्रभाव इत्यादि सर्वमपि प्रदर्शनीयं भवति । तद्विषये पूर्वाचार्याणां सम्मतयः वर्तमानकालिकानां च प्राच्यानां पाश्चात्यानां वा विदुषां वैज्ञानिकानां च विचारास्तद्विषयका प्रदर्शनीया भवन्ति ।

(३) दृष्टान्तः

प्रतिज्ञायां निर्दिष्टस्य उपपत्तिभिः समर्थितस्य हि विषयस्य प्रसिद्धतरेण प्राचीनेन नवीनेन वा वर्तमानकालिकेन इतिवृत्तेन परिपोषणं दृष्टान्तः । आदर्शेन मुखस्येव स्फुटतरं जायते निदर्शनं विषयस्यैतेन ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रकाशमन्तरा यथा न जायते स्फुटोऽवभासः पदार्थस्य, तथा दृष्टान्तं विना निबन्धनीयविषयस्यापि न भवति स्फुटतरोऽवभासः ।

(४) उपसंहारः

अथ प्रतिज्ञया निर्दिष्टस्य=विशकलितस्वरूपस्य, उपपत्त्या समर्थितस्य, दृष्टान्तैः परिपोषितस्य स्फुटतरावभासितस्य च विषयस्य पूर्वोपपादितैक-वाक्यता-सम्पादनपुरःसरमुपसंहरणमुपसंहारः । पूर्वकृतस्य समस्तस्यापि वर्णनस्यात्र सिंहावलोकनं क्रियते । अन्तिमेषु च शब्देषु विधेयानां विधिः, निषेध्यानां निषेधः, निन्द्यानां त्यागः, ग्राह्याणां ग्रहणं च प्रदर्श्यताम् । निबन्धशीर्षकवाक्यं पदं वा केनापि मनोहारिणा प्रकारेण संस्मार्यताम् ।

अंशकल्पना

यथा परिचयात्मकनिबन्धेषु चरितात्मकनिबन्धेषु च भवति क्रमपूर्विका 'अंशकल्पना' तथा विवेचनात्मकनिबन्धेष्वपि अंशकल्पनाया भवति परमावश्यकता । सेयमंशकल्पना विवेचनात्मकनिबन्धेषु प्रतिनिबन्धं भवति भिन्नप्रकारैव । निबन्धलेखनात्पूर्वमियं लेखकेनावश्यं चिन्तनीया, एतया निबन्धलेखने भूयः सौकर्यं जायते । तत्रायमादर्शो दर्श्यते—

'धर्मं चर' इति प्रस्तोतव्ये--

(१) धर्मस्वरूपं, धर्माचरणस्य विधेयता ।

(२) धर्माचरणस्यावश्यकता, प्रभावश्च धर्मस्य ।

(३) धर्मस्य लौकिकाः पारलौकिकाश्च लाभाः ।

(४) धर्मत्यागे हानिर्दोषो वा ।

(५) धर्माचरणाल्लब्धकल्याणानां निदर्शनानि ।

(६) ततो धर्माचरणस्यावश्यकत्वम् ।

(७) परमोपयोगितयाऽऽचरणीयता विधानम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'सत्येनास्ति भयं क्वचित्' इति प्रस्तोतव्ये—

(१) भयकारणानुसन्धानपूर्वं निर्भयतोपादेयता।

(२) सत्ये एव भयाभावः।

(३) सत्यस्वरूपम्, विशकलनं विस्तरेण।

(४) कुतो न सत्ये भयप्राप्तिः ?

(५) सत्यस्येतेरे लाभाः।

(६) सत्यपरायणानामकुतोभयानां निदर्शनम्।

(७) निर्भयताप्राप्तये कल्याणार्थिभिः सत्यमेवोपादेयम्।

एवं सर्वत्र निबन्धेषु प्राथमिकलेखकैरंशकल्पनां कृत्वैव प्रवर्तितव्यम्। एतेन निबन्धनिर्माणे भूयः सौविध्यं भविष्यति, "साम्प्रतमग्रे किं लेख्यम्" इत्यात्मिका मूढता व्यग्रता च निर्वर्तिष्यते, निबन्धकलेवरस्य समुचिता वृद्धिश्च भविष्यति।

सामग्रीसंग्रहः

कस्यापि निबन्धस्य लेखने तत्सामग्रीसंग्रहः परमावश्यकः। निबन्ध-शिक्षकैः पूर्वं तन्निबन्धसामग्रीविषय-विशकलनद्वारा वितरणीया, स्वयं चापि शिक्षार्थिभिस्तत्तन्निबन्धविषये श्रुतपूर्वेभ्यो व्याख्यानेभ्योऽधीतपुस्तकेभ्यो दृष्टश्रुतलौकिकव्यवहारेभ्यश्च सामग्री संग्रहणीया।

भाषाधिकारः

यस्यां खलु भाषायां निबन्धो विरचनीयस्तत्र भाषायां लेखकस्य पूर्णोऽधिकारोऽपेक्षितः, संस्कृते निबन्धनिर्माणार्थं संस्कृतभाषाधिकारसिद्धये शिक्षार्थिभिः परस्परं वार्तालापः सर्वदा संस्कृते एव करणीयः। संस्कृत-समाचारपत्राणि नित्यं पठितव्यानि। परस्परं पत्रादिव्यवहारश्चापि संस्कृते

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एव करणीयः । स्वयोग्यतानुसारं संस्कृतपुस्तकानि हितोपदेशपञ्चतन्त्रादीनि पठितव्यानि। हृदये विद्यमाना अपि भावा भाषाधिकाराभावे नैव शक्यन्ते प्रकाशयितुम् । भवति च वैकल्यं मनसि ततो निर्विण्णेन मध्ये एव त्यज्यते निबन्धनिर्माणम् । अतो निबन्धशिक्षार्थिभिर्भाषाधिकारप्राप्तये साभिनिवेशं भूयान् प्रयत्नोऽनुष्ठेयः ।

निबन्धे प्रयोक्तव्या भाषा

निबन्धनिर्माणे स्वाभाविकी सरलातिसरलैव भाषा प्रयोक्तव्या । 'प्रसन्नसंस्कृतम्' एतत्कृते परमोपयोगि । प्रसन्नसंस्कृतं नाम प्रसादगुणोपेतं सरलतरं सर्वसुखबोधं संस्कृतम्, यथा हिन्दीभाषायां 'खड़ी बोली' । समस्त-वाल्मीकिरामायणं प्रसन्नसंस्कृते एव लिखितमस्ति तथा पञ्चतन्त्रादिग्रन्थाश्चापि प्रसन्नसंस्कृतस्यैव सन्ति निदर्शनानि । प्रसन्नसंस्कृते प्रसिद्ध-प्रसिद्धानां शब्दानां प्रयोगः, द्वित्राणामेव पदानां समासः, प्रसादो गुणः, पाञ्चालीप्राया रीतिरित्यादि सर्वोऽपि स्वाभाविक-भाषा-भावि-गुणसन्दोहो भवति स्वभावत एव । अतः प्रसन्नसंस्कृतेनैव प्रवर्तितव्यं निबन्धलेखने शिक्षार्थिभिः ।

अवश्यं पालनीया लेखनियमाः

(१) पत्रस्य वामभागेऽङ्गुलीद्वयमितं स्थानं सर्वथा रिक्तं परित्यज्यताम्।

(२) अक्षराणि सुवाच्यानि सुन्दराणि च लिख्यन्ताम् ।

(३) पदं पदं पृथक्कृत्य (समुचितव्यवधानेन) लिख्यताम् ।

(४) लेखे विरामादिचिह्नप्रदाननियमान् पूर्णतया पालयत ।

(५) लेखे प्रसङ्गसमाप्तौ प्रघट्टकोऽवश्यं परिवर्त्यताम् ।

(६) प्रघट्टकस्य प्रथमा पङ्क्तिरङ्गुलीद्वयमितं स्थानं रिक्तं परित्यज्य लिख्यताम्, अन्याश्च सर्वाः सरला विरला समानाः ऋजवश्च विलिख्यन्ताम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लेखे विरामादिचिह्नानि

अवान्तरविराम-चिह्नम्	,
अर्धविराम-चिह्नम्	;
पूर्णविराम-चिह्नम्	।
प्रसङ्गसमाप्ति-चिह्नम्	॥
प्रश्नचिह्नं काकु-चिह्नं च	?
सम्बोधन-खेदाश्चर्यचिह्नम्	!
पर्यायचिह्नं संयोगचिह्नं च	=
निर्देशचिह्नम्	:—
मध्ये भावादिदर्शकं चिह्नम्	()
त्रुटि–पूर्ति–चिह्नम्	Λ
समासे पदावगतिचिह्नम्	-

अभ्यासः

निबन्धरचनायाः सर्वप्रथमं साधनम् अभ्यास एव। केचित्तु लेखारम्भात्पूर्वमेव व्याकुला जायन्ते—"किं लिखेयं न स्फुरति किमपि" इति। अनभ्यासस्यैवायं दुष्परिणामः। किमपि स्फुरेद् वा न स्फुरेत्, कृतनिश्चयो लेखितुं प्रवर्ततैव। अभ्यासः सर्वंचित् साधयिष्यति। सति चाभ्यासे यदद्य दुष्करं श्वोऽवश्यं सुकरं भविष्यति। अतोऽभ्यासे कदापि प्रमादो मा भूत्, अभ्यासो निरन्तरं विधीयताम्।

पूर्णसाफल्यस्य आशा

तामेतां पूर्वोक्तां निबन्धपद्धतिमाश्रित्य बालाः शिक्षार्थिनोऽवश्यं निबन्धनिर्माणे कुशला भविष्यन्ति इति निश्चितमहमाशासे। एतामेव

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पद्धतिमाश्रित्य लिखिता कतिपये निबन्धाः पुस्तकेऽस्मिन् निदर्शनतयोपन्यस्ताः सन्ति, यान् पठित्वा तादृशानेव निर्मातुं प्रभविष्यन्ति शिक्षार्थिनो बालाः। प्रौढाश्च प्रौढनिबन्धनिर्माणशिक्षाणायाऽस्मत्सम्पादिताम् "आदर्शप्रस्तावरत्नमालाम्" निभालयेयुः, यत्र सर्वोऽप्ययं विषयः पूर्णतया विवेचितः समालोचितश्च। अथ च पंचाशीतिर्निबन्धाः सरलाः प्रौढाश्च योग्यातियोग्यानां विदुषां लेखकानां संगृहीतास्तत्र। तदेतेन पुस्तकद्वयेन निबन्धनिर्माणपद्धतिः कियत्पर्यन्तं सम्पन्नविवेचना जाता इत्यत्र तु विद्वांस एव प्रमाणं स्युः।

—सम्पादकस्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ

बालनिबन्धादर्शः

तत्र परिचयात्मका निबन्धाः

१—श्रीगणेशः

अखिलेषु कार्येषु सर्वप्रथमं भवति पूजनमस्य। विघ्नहरोऽयं देवः। विघ्नविघाताय एव पूज्यते प्रथमं सर्वत्र, भगवान् श्रीगणेशोऽयं गजाननो लम्बोदरः सिन्दूरवर्णश्चतुर्भुजः पाशाङ्कुशाभय-मूषकध्वजपाणिः प्रसन्नवरदमूर्तिः ऋद्धि-सिद्धिभ्यां सदा संसेव्यमानो विराजते।

श्रीभगवत्या पार्वत्या स्नानमाचरन्त्या स्वशरीरमलेन निर्मितः पुरुषाकृतिः पिण्डो जीव जीवेति जीवितो द्वारदेशेऽवस्थापितोऽन्तः प्रवेशमवरुन्धन् महादेवेन छिन्नमस्तकः पार्वतीकृतानुरोधात् पुनर्महादेवेनैव गजशीर्षं समादाय सन्धायोज्जीवित इति गजाननो बभूवेति ह स्माचक्षते पौराणिकाः केचित्।

सर्वारम्भेषु श्रीगणेशनामस्मरणादेव च साम्प्रतं 'कार्यारम्भ'शब्दस्थाने 'श्रीगणेश'मेव प्रयुञ्जानाः समुपलभ्यन्ते बहवः—"अध्ययनस्य श्रीगणेशः कृतः" "भोजनस्य श्रीगणेशोऽकारि" इत्यादि।

"श्रीगणेशो विघ्नकारिणामधीश्वर इति रौद्रोऽयं देवः, अत एव विघ्नभीतेः सर्वैरपि सर्वप्रथमं मान्यते—'मा नो विघ्ना भूवन्निति' क्रूरनिसर्गाणां अनार्याणां देवता आसीदयम्, कालान्तरे चास्य आर्यैः स्वकीयवैदिकदैवतेषु सन्निवेशोऽकारि, तत एवार्वाचीनग्रन्थेष्वेवास्य समुपलभ्यते भूयसी

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चर्चा न पुनर्वैदिकसाहित्ये" इति केचिदाधुनिकाः पाश्चात्त्यविद्वद्गवेषणानुसारिणो ब्रुवन्ति ।

परं भारतीयार्ष-साहित्य-तत्त्वविचक्षणाः प्राच्या विद्वांसो नैतत् सहन्ते। ते हि तत्तच्छ्रुति-स्मृति-पुराणादिप्रमाणजातैः श्रीगणेशस्य वैदिकार्यदेवतात्वमेव द्रढयन्ति । किमपि स्यात्, भगवान् श्रीगणेशोऽद्य सकलस्यापि आस्तिकसंसारस्य प्रथमाराध्यः पूज्यः स्तुत्यः स्मरणीयश्चास्ति। वैष्णव-शैव-सौर्यादिसम्प्रदायवद् "गाणेशो"ऽप्यस्ति एकः सम्प्रदायः, यस्योपास्यः श्रीगणेश एव, मन्त्रश्च गणेशगायत्री, रहस्यविद्या च 'गणपत्युपनिषत्' । तेषामयमेव परमात्मा । ब्रह्मवैवर्तपुराणस्य गणेशखण्डे विवृतोऽस्य महीयान् महिमा । गणेशादेव जायते सर्वं जगत्, अन्ते लीयते चास्मिन्नेव, अयं सर्वादिः स्वयमनादिः सर्वान्तः स्वयमनन्तः, सच्चिदानन्दस्वरूपो भूमाऽयमेव।

स्थूलविग्रहश्चाप्यस्य विराड्रूपस्य भगवतः प्रतीकम् । विशालतरमुदरमन्तर्लीनं जगत् सूचयति । उत्तमाङ्गं चातिमहद्विज्ञानवैभवं गमयति । ऋद्धिः सिद्धिश्च माया चाऽविद्या चेति समष्टिव्यष्ट्युपाधिरूपे । वाहनश्च मूषकः सर्वेषां जीवनमोषकतया कालरूपः । स चास्य सर्वदाऽधस्तिष्ठति वशीकृत इति न तस्य अस्ति प्रभावोऽणुरपि श्रीगणेशे, तेन कालपरिच्छेदातीतोऽयं भगवान् श्रीगणेश इति ज्ञायते निश्चयेन । वेदान्तिनां ब्रह्मेवानिर्वचनीयस्वरूपः सर्वस्वरूपोऽयमेव मायोपाधिक ईश्वरः, अविद्योपाधिको जीवश्चेति सर्वरूपाय सर्वसाक्षिणे सर्वान्तर्यामिणे श्रीगणेशाय भूयो भूयो नमस्क्रियते गणपत्युपनिषच्छब्दैरेव—

नमस्ते गणपतये । त्वमेव सर्वं खल्विदं ब्रह्मासि ।
अव वक्तारम् । अव श्रोतारम् । ओम् ।

(सम्पादकस्य)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

२—गौः

गौरेकः चतुष्पात् पशुः। भूमण्डलस्य सर्वेष्वपि प्रायः प्रदेशेषु प्राप्यते। भवति सरला मुग्धा चास्या आकृतिः। तृणानि चरित्वाऽमृतमयं दुग्धं ददाति। अस्या वत्सा वृषा भूत्वा हलेषु शकटीषु शकटेषु च युज्यन्ते। आकृतयो वर्णाश्चाप्यासां दृश्यन्ते विभिन्नप्रकाराः। पर्वतप्रान्तेषु प्रायो ह्रस्वाकारा गावः तृणप्रायभोजनाः स्वल्पदुग्धाश्च। समतलप्रदेशेषु च बृहदाकाराः स्थूलाः तृणान्न-कार्पासबीज-खल्यादि-स्निग्धप्रायभोजनाः पर्याप्तदुग्धप्रदाश्च भवन्ति गावः। वर्णतश्च कृष्णाः कपिलाः श्वेता रक्ताः पीताः कर्बुराश्चेति नैकविधाः। वृषाश्चापि ह्रस्वाकृतयो विशालाकाराः स्थूलाः कृशाङ्गा महाशृङ्गा लघुशृङ्गाः कृष्णाः कपिलाः श्वेता रक्ताः पीताः कर्बुराश्चेत्यनेकप्रकाराः। कृषिप्रधानस्य भारतवर्षस्य तु सर्वस्वं गाव एव। अत्र किमस्ति वस्तु यद् गवामेव कृपया नोत्पन्नं स्यात्! सर्वप्रथमं जीवनौषधिरूपमन्नमेव गृह्यताम्—गोजाता वृषा हलैर्भूमिं कर्षयन्ति खनन्ति उर्वरां कुर्वन्ति, तैरेवोप्यन्ते क्षेत्राणि, कूपेभ्यो जलमुद्धृत्य सिच्यन्ते। संपन्नं परिपक्वं च तत्सस्यं पुनस्तैरेव संशोध्यते गृहं प्रत्यानीयते च। को वाऽस्ति मानवो जगति योऽन्नं वस्त्रं वा विना जीवितमपि शक्नुयात्। तदुभयमिदं भारतवर्षे तु गवामेव कृपया लभ्यते, कामं देशान्तरेषु यान्त्रिकैर्हलैरुष्ट्रादिभिर्वा पश्वन्तरैरपि पृथिवी कृष्येत खन्येत उप्येत चापि।

अन्नाद् व्यतिरिक्तं मानवजीवनोपयोगि सर्वमन्यदपि गाव एव प्रयच्छन्ति, पश्यत! जातमात्रस्य हि शिशोर्मातृस्तन्यादतिरिक्तं गोदुग्धमेव प्राथमिकं भोजनम्, येन स प्राप्नोति अवश्यप्रापणीयां शारीरिकीं पुष्टिम्। अथान्नभक्षणयोग्यो भूत्वापि अन्नैः सार्धं परमापेक्षितान् दुग्ध-दधि-घृतादीन् स्निग्धपदार्थान् लभते खलु गवामेवानुकम्पया। किञ्च गोजातानां वृषाणां

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कृपया लब्धानामिक्षुरसगुड-शर्करा-सितशर्करादीनां सम्मिश्रणेन प्रगुणीकृतैर्गव्यैरेव पायसघृतादिभिः सिद्धैरनेकविधैर्मिष्टान्नैः प्रतिदिवसमनुभवन्ति रसास्वादानन्दं सर्वे मनुष्याः। नास्ति मानवजीवनस्य कोऽपि भागो यत्र गोभिरुपकारो न विधीयते। अन्ते मरणकालेऽपि गोदानमेव पारलौकिकं श्रेयःसाधकम्। एवमासूलचूडं मानवजीवनस्य पूर्णतया निर्वाहिका गौरेव, सर्वथा सत्यं चेदं वचः कस्यापि महापुरुषस्य—"गावः प्रतिष्ठा भूतानाम्" इति।

यथा माता पुत्रं सर्वतो रक्षसि पालयति प्रीणयति, सर्वदा तस्मिन् स्निह्यति न च कदापि विरज्यते पुत्रात्, तथा गौरपि मानवान् सर्वापद्भ्यो रक्षति पालयति प्रीणयति दुग्धादिना, स्निह्यति चान्तश्चेतसा, आशीर्वादैः संवर्धयति च। भर्त्सिता ताडिताऽपि नो विरज्यते, सदा सुखमेव साधयति मानवसंसारस्य। अत एव "गावो विश्वस्य मातरः" उच्यन्ते। गाव एव च ऐहलौकिक-पारलौकिक-श्रेयःसाधनीभूतस्य धर्मस्य सर्वप्रधानमङ्गम्। गव्यैरेव पदार्थैः सम्पद्यते यज्ञः, गवामेव च दुग्ध-दधि-घृतादिभिः सम्पन्नेन पञ्चामृतेन भवति पूजनं देवतानाम्। प्रायश्चित्तेषु चान्तर्बहिः शुद्धिमभीप्सुभिरुपयुज्यते गवामेव पयो-दधि-घृत-मूत्र-गोमयमयं पञ्चगव्यम्। इदमन्तःकरणमलानां काम-क्रोधादीनां शारीरिकाणाञ्च धातुवैषम्यजनितानामतिदूषितानामपि रोगाणां परमं शोधकं निवारकञ्चास्ति। गोजातैर्वृषैरेवोत्पादितैर्यव-तिल-धान्य-शर्करादिभिर्निष्पादितैः हविर्भिरेव संसाध्यन्ते यज्ञाः, ततो वृष्टिर्वृष्टेरन्नं ततः प्रजाः, इति सत्यतरमिदमुच्यते "गावः स्वस्त्ययनं महत्।"

पाश्चात्त्यविज्ञानशास्त्रिभिः परीक्ष्येदं निर्णीतं यद् गोदुग्धे सन्ति तानि सर्वाण्यपि तत्त्वानि यानि मानवजीवनाय परमोपयोगीनि, यानि च मानवस्य भोजनेऽपेक्ष्यन्ते। भारतीयायुर्वेदशास्त्रिभिश्च सर्वदुग्धेभ्यो गोदुग्धस्यैवोत्तमत्वमुद्घोष्यते, सर्वेष्वपि रोगेषु क्रियते तस्यैवोपयोगः। उच्यते च गोदुग्धविषये—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"जरा-समस्तरोगाणां शान्तिकृत्सेविनां सदा।"

गव्यं दधि नवनीतं घृतं चापि प्रशस्यतरं मन्यते, यथा—

"उक्तं दध्नामशेषाणां मध्ये गव्यं गुणाधिकम्।"

"नवनीतं सुधातुल्यं विशेषादमृतं शिशोः।"

गव्यं घृतं—बलं ददाति, अग्निमान्द्यं हरति, त्रिदोषं नाशयति, अन्धत्वं दूरीकरोति, मेधां लावण्यं कान्ति तेज ओजश्च वर्धयति, कृमीन् नाशयति, आयुष्करं परमरसायनं चास्ति।

गवां श्वासैरनन्ता रोगा विनश्यन्ति विशेषतश्च क्षयरोगः। क्षयरोगी गवां मध्ये वसन् नीरोगतामासादयति, हृद्रोगी च गवां दर्शनेन स्पर्शनेन तन्मध्यनिवासेन च सद्यो रोगात्तस्माद् विमुच्यते। गवां मूत्रं गोमयं चापि कियतां रोगाणामस्ति परमौषधम्। गोमूत्रेण प्रायः सर्वेऽपि उदररोगा विनश्यन्ति, आमवातस्य चेदं परिपूर्णमौषधम्; कृमिरोगाणाञ्च। महारोगस्य कुष्ठस्यापि सर्वोत्तममौषधं गोमूत्रम्। गोमूत्रस्य निरन्तरपानेन स्नानेन च कुष्ठं सर्वथा विनश्यति। यकृत्प्लीहादीनामुदररोगाणान्तु प्रसिद्धमिदमौषधम्। गोमयं च पामादिचर्मरोगाणां सिद्धमौषधम्। संक्रामकरोगाणां कीटाणवश्चानेन नश्यन्ति। गोमयरसे विषूचिकारोगनाशिका विचित्रा शक्तिर्विद्यते इति पाश्चात्त्यविज्ञानिनोऽपि मन्यन्ते, धर्मशास्त्रिणस्तु स्थाने स्थाने गोमयलेपनायाऽऽदिशन्ति। गोमयस्य गन्धेनैव असङ्ख्याः संक्रामकरोगाणां कीटाणवो विनश्यन्ति, नवीनानाञ्च तेषां न भवत्युद्भवः। एवं प्राच्यायुर्वेददृष्ट्या पाश्चात्त्यविज्ञानदृष्ट्या च मानवानां स्वास्थ्यरक्षणविधौ विद्यते गवां सर्वोत्तमं स्थानम्।

गौः परमः सात्त्विकः प्राणी, तत्सेवया न केवलं शारीरिका एव रोगा विनश्यन्ति; अन्तःकरणस्यापि रोगा दूषिताः संस्कारास्तामसा भावाः क्लिष्टा वृत्तयश्च सर्वथा विनश्यन्ति। उदयमासादयन्ति च साधवः संस्काराः सात्त्विका भावा अक्लिष्टाश्च वृत्तयः। गवामेव सेवया लौकिकं पारलौकिकं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

च श्रेयो लब्धवन्तो बहव इति न परोक्षमितिहासचक्षुषां विदुषाम् । को न जानाति रघुवंशविभूषणस्य राज्ञो दिलीपस्य गोसेवाफलभूतां पुत्रप्राप्तिम्, सत्यकामस्य गौतमशिष्यस्य गोसेवया तत्त्वज्ञानप्राप्तिञ्च । सर्वमिदं गवां माहात्म्यं ज्ञानचक्षुषा निरीक्षमाणा महर्षयः शास्त्रेषु स्थाने स्थाने गवां महिमानं वर्णयामासुः, समीहन्ते स्म च—

"गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः ।
गावो मे सर्वतः सन्तु गवां मध्ये वसाम्यहम् ॥"

(सम्पादकस्य)

Funding by IKS-MoE.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

३–विद्यालयः

मार्गशीर्षो मासः, सार्धदशवादनसमय एव भुक्त्वा भोजनं गृहाद् निरगमं भ्रमणाय। अद्य नासीन्मम कार्यान्तरोपरोधः। नवागतोऽहम्, अपरिचितप्रायो नगरनिवासिजनस्य, एकाकी राजमार्गे पूर्वतोऽचलम्।

अथ नातिदूर एव वामतः सुन्दरोद्यान-मध्यगतमुपरिदोधूयमान-पताकं सुधाधवलं विशालं सौधमेकमदृश्यत। किमिदमिति चिन्तयत्येव मयि टन् टन् टन् टन्निति समश्रावि घण्टिकानादः। अति साधारणशान्त-वेशाः करकलितपुस्तकनिकरा विद्यार्थिनो धावं धावं तत एव व्रजन्ति। प्रथमेयं घण्टिका किमिति मुधा धावसि। टन् टन् टन्नित पुनरभून्नादः। अरे! त्वर्यतां जातोऽयं द्वितीयो नादः। अनुपस्थितौ पतिष्यति दण्डः, सर्वे त्वरया प्रविष्टाः।

अहमपि तद्दर्शनकौतुकी प्राविशं प्रधानद्वारेण, पुरोऽपश्यञ्च, उपस्थिति-पञ्जिकामादाय द्वावध्यापकौ प्रत्येकं नामधेयमुच्चैरुच्चारयतः, विद्यार्थिनश्च 'श्रीमन्तोऽस्मि' 'उपस्थितोऽस्मि' इत्यादिवचसा स्वामुपस्थितिं बोधयन्तः पङ्क्तिबद्धाः शान्तास्तिष्ठन्ति। सर्वे सम्मिलिताः स्वस्ति-प्रार्थनामन्त्रान् वैदिकान् मन्द्रगम्भीरेण स्वरेणाघोषयन्।

तावदहं महाभवनमस्तके क्रमशो लिखितैः कृष्णवर्णैः स्थूलस्थूलैरक्षरैः पर्यचैषम्। यदेषोऽस्ति "श्रीसरस्वती संस्कृतविद्यालयः" श्रुतपूर्वोऽयं मम। एतच्चास्य प्रधानं विशालभवनं "श्रीकृष्णगीताभवनम्" नाम। पाश्चात्य-सभ्यतापाशपतितस्यापि मम संस्कृतभाषाप्रणयितया अत्रत्य–परमशान्त–सर्वथाऽकृत्रिमसाधारणवेषभूषा-संदर्शन–सञ्जातसद्भावतया च परमं कुतूहलमुदपादि, एतस्य समस्तपरिचयप्राप्तये।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"टन्" सर्वे विद्यार्थिनः स्वस्वश्रेणिस्थाने समुपविष्टाः प्रवृत्ताश्च सर्वेऽध्यापका अध्यापयितुम्। उपविष्टोऽहमपि शिलायामेकस्याम्। अथासन् कतिचन स्वतन्त्रा इतस्ततो वृक्षतलेषु हसन्तो हासयन्तश्च भ्राम्यन्तः। विज्ञातं प्रश्नेन यदेषाऽस्ति प्रथमशास्त्रिश्रेणी घण्टिकायामस्यां स्वतन्त्रा। नास्ति पठनसमयोऽयमस्याः। तेषु खल्वेको ममाभिमुखमायात्। आगम्यतास्, आस्यतां भो भद्र ! इति सादरमभ्यर्थितो मम पार्श्वे समुपाविशत्। कौतुकपरवशेन मया प्रश्नपरम्परया लब्धो विद्यालयस्य सर्वोऽपि परिचयः। "टन् टन्" सहसा सावधानीभूय सह सहाध्यायिभिः पुस्तकान्यादाय अध्ययनाय प्रायात् सः।

रामणीयकमत्रत्यं दिदृक्षुरहमुपरिभागे गतोऽवालोकयम्, पुरोभित्तिकायामेवास्ति सुन्दरं लघुमन्दिरम्। यत्र वेणुपाणिः सुस्निग्धश्यामवर्णा, कमलदल-विशालनयना, स्मितवदना, त्रिभङ्गी-ललितावस्थाना परमरमणीया बलान्मनसि विशन्तीव भगवतो मनोमोहनस्य मधुरतरा मूर्तिः, वामतश्चास्या विराजते गौरवर्णा, स्मितविकसितवदनारविन्दा परममनोरमाकृतिर्भगवती रासेश्वरी।

भगवद्दर्शन-सञ्जातविपुलाऽऽह्लादोऽहं परावृत्य सर्वाणि भवनानि इतराणि कोष्ठकानि पशुशाला-कूपाराम-वृक्षलता-क्षेत्रादिकञ्च दृष्टवान्।

पृष्टं मया कियत्समयावधि भवति पठनपाठनम्, आचार्यसाक्षात्कारश्च कदा शक्यते कर्तुम्। उत्तरे ज्ञातं चतुर्वादनसमये भविष्यत्यवकाशः, आचार्यस्य दशमी घण्टिका रिक्ता, तदैवोचितः साक्षात्कारः। अवकाशानन्तरञ्च न तिष्ठति स क्षणमपि विद्यालये। लब्धो मया समयः समेषामध्यापकानां अध्यापनश्रवणस्य, प्राप्तश्च तन्नामधेयादिपरिचयः, छात्रेभ्यः मध्ये मध्ये रिक्तसमयेषु सञ्जातः साक्षात् परिचयोऽपि तेषाम्। 'टन् टन् टन्......इति जातो घण्टिकानादः। परिगणिता मया नवाऽऽसन्। आः दशमीयं वेला, प्राप्त आचार्यसाक्षात्कारसमयः। छात्रसङ्केतानुसारमाचार्यभवनाभिमुखमागमम्। वेत्रासनमध्यासीन आचार्यः समाचारपत्रं पठति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्वारागतञ्च मां ग्रीवामुन्नमय्य वीक्ष्य यावत् पिपृच्छिषति किञ्चित् तावदेव विहितशिष्टाचारोऽहं "शक्नोम्यन्तराऽऽगन्तुम्" इति प्रार्थयम्। आम् ! आगम्यताम्, आगम्यतामित्यपरिचितचरोऽपि आसन्द्यामुपवेष्टुमादिष्टः आचार्यकृत-सविनयशिष्टाचार-सङ्कुचितोऽहमुपविष्टः । समारभ्यत वार्तालापो विद्यालयस्यैव विषये। घण्टार्धमात्रे एव सर्वोऽपि स्थापनकालाद्यावधि विद्यालयेतिहासः प्रश्नपरम्परयाऽधिगतो मया । आचार्यवर्येण च परमसौहार्देन नोद्वेगमावहता सर्वं परिचायितं, पूर्वलिखितं समस्तं विवरणजातमपि दर्शितम् । परीक्षापरिणामाः, प्रबन्धसमितिः, अध्यापकवर्गः, विद्यालयसम्पत्तिः, छात्रावासः, इत्यादिषु नातिष्ठदवशिष्टो विषयः, यत्राऽहं नाभवं पूर्णपरिचितः। अस्तु, क्षम्यतां बहुसमयो युष्मदीयो मया गृहीतः, मम जिज्ञासा सर्वा अपि श्रीमद्भिः परिपूरिता इति तदर्थं धन्यवादः, दीयतामाज्ञा, भवतामपि जातः पुनरध्यापनसमयः। 'ओम्'।

बहिरागत्याऽऽचार्यभवनात् शिलायामेवोपाविशम्। अचिन्तयञ्च श्रुतपूर्वं तमेव विद्यालय-परिचयम्, अथाऽभूदवकाश-घण्टिकानादः। टन् टन् टन् टन्......इति। सोल्लासं कारामुक्ता इव सहर्षं गन्तुमारभन्त विद्यार्थिनः। अथागत एकश्छात्रः प्राङ्गणभूमौ निखातयोर्वंशस्तम्भयोरुपरिभागे दृढसूत्रग्रथितं जालमतानीत्। इतरौ रबरकन्दुके वायुपूरिण्या वायुमापूरयतः। क्रमेण त्रयः, पञ्च, अष्टौ, दश, पञ्चदश, विंशतिः छात्राः समागताः। सर्वे हृष्ट-पुष्टशरीरा विकसितवदना नवयुवका भद्रवेषा झटिति सङ्घद्वये विभक्ता इतस्ततश्चोपस्थिताः। कन्दुकोत्फालनक्रीडामारब्धवन्तः। अहमप्यासं तत्क्रीडाव्यसनी पश्येयं कथं क्रीडन्ति इति स्थितः। ऊर्ध्वंदृष्ट्य उत्प्लुत्योत्प्लुत्य जालमुभयत उत्फालयन्ति कन्दुकम्। ब्रवीति चैकः उच्चैः— 'शून्यमेकम्', 'एकं द्वे', 'द्वे त्रीणि', 'बहिस्सीमम् नहि नहि अन्तस्सीमम्' सावधानम् गृह्यताम्, जालस्पर्शः, सप्तदश–एकादश–पञ्चदश, आः चतुःस्पर्शः सप्तदश, विंशतिः, हन्त ! विजयिनो वयमिति सकरतलध्वनिः हसन्ति। गम्यतामितः प्रारभ्यतां पुनरिति क्रियासमभिहारेण पारस्परिक–

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्खलनगणनातत्परा: पाश्चात्त्यामपीमां क्रीडां संस्कृतशब्दमयीं प्राच्यामिव सम्पादयन्त: क्रीडन्ति । अस्तंगतो भगवान् भास्कर: । अभूत् क्रीडा-विराम-नाद: । सन्ध्यामुपासितुं गता: सर्वे । मामन्विष्यन् समागत: सुहृद् रमाकान्त: । आगम्यताम्, गृहं गच्छाव:, क्व व्यतियापितं सर्वं दिनम्, अहन्तु एतयैव बाष्प-गन्त्र्या समागत:, गृहं गतश्च ज्ञातवान् नागतोऽसि भ्रमणाय निर्गत इदानीं यावत् । परस्परमालपन्तावावां गृहमागतवन्तौ ।

(प्रत्यक्षदर्शी कश्चित्)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

४–गङ्गा

इयं हि परमपावनी भगवती गङ्गा भारतीया। सर्वोत्तमा दिव्या नदी। या च स्वेन महत्त्वेन सर्वतीर्थेषु मूर्धन्यतां गता। ऋग्वेदादौ भारतीयतीर्थेषु सर्वप्रथमतयेयं संस्तूयते–"इमं मे गङ्गे यमुने सरस्वति शतुद्रि स्तोमं सचत" इति। अन्यत्रापि—

"गङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु॥" इति च।

अस्या एव जाह्नवी, भागीरथी, हैमवती, शैलसुता-सपत्नीप्रभृतीनि नामान्तराणि। इयमेव त्रिधात्मना स्वर्गं पातालं मर्त्यलोकञ्च याति तस्मात् त्रिपथगेत्युच्यते। जह्नोराश्रममध्यादधस्तादागतेयमिति जाह्नवी नाम। स्वर्गादवतरन्तीयं शिवजटास्ववरुद्धा पुनर्भगीरथस्य प्रार्थनया बिन्दुसरोवरे न्यपतत्। ततः सप्तधाराकारेण निरगच्छत्। ह्लादिनी–पावनी–नलिनी नाम्न्यस्तिस्रो धाराः पूर्वस्यां दिशि, वङ्क्षु-सीता-सिन्धुनामधेयास्तिस्रो धाराः पश्चिमायां दिशि, एका च धारा भगीरथनिर्दिष्टे वर्त्मन्यागच्छत्, सैषा भगवती भागीरथी नाम। यया भगीरथेन सगरवंशः समुद्धृतः। हिमवतः प्रभवतीति हैमवती नामास्याः। महादेवशिरसि स्थितेति हेतोः शैलसुता-सपत्नीत्यादि आख्यायते।

इयं भगवती गङ्गा जनेभ्यो जलसेचनादिकर्मणा भुक्तिं, स्नानस्मरणाऽऽ-चमनादिना दुरितक्षयाद् मुक्तिञ्च ददाति। यावान् महिमा एतस्याः संस्कृते हिन्दीभाषायाञ्च वर्णितो विद्यते नैतावान् कस्या अपि इतरस्या नद्याः। स्थाने खलु इयमस्माकं जननी सुरसरिदिति।

एषा हि हैमवती हिमालयस्य "गंगोत्तरी"–नामकस्थानादुद्गच्छति। ततो दुर्गम–विषम-पथपतनभीत्येव आदौ आत्मानं सर्वात्मना लघुना आका-रेण वहति। पर्वतस्य वक्षःस्थलं विदार्य्य, विषमप्रस्तराणां मुखानि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चरणाघातैः सम्मर्द्य, पूरयित्वा च गिरिगह्वराणि, आत्मनो विजयाभिमानमुच्चैः कलकलध्वनिना घोषयतीव, सहर्षं जनेभ्यो मुक्तहस्ताभ्यां परमनिर्म्मलानि निजवारिबिन्दु–स्थूलमुक्ताफलानि वितरतीव, आसन्ध्यमधिपर्वतं चरित्वा स्वान् वत्सान् पयसा पोषयितुं सरम्भाशब्दं स्नुतस्तनी गौरिव वत्स-वत्सला जननी गङ्गापि आगच्छति महता वेगेन हरिद्वारभूमिम्। अत्र च सुतस्नेहभरेणेव बिभर्त्ति आत्मानं बृहदाकारेण। अन्ते च कृतकृत्या भगवतीयं लीयते "गङ्गासागरसंगम"-स्थाने वङ्गसागरे।

गंगायास्तटे सन्ति भूयांसि सुसमृद्धानि महानगराणि। येषु हरिद्वारः, प्रयागः, कर्णपुरम्, वाराणसी, पाटलीपुत्रम्, कलिकाता च मुख्यतया गण्यन्ते। हरिद्वारे वाराणस्याञ्च वाचामगोचरतां गतं गङ्गायाः सौन्दर्यम्। हरिद्वारे तु परमनिर्म्मले आदर्शशुद्धे गाङ्गेयवारिणि पर्वताः प्रतिबिम्बच्छद्मना आत्मानं दिदृक्षन्ते इव। अथवा–आत्मीयं स्थावरभावं विहातुकामा गङ्गायां स्नान्तीव। यद्वा कस्यचित् स्नातुमागतस्य परमभागवतस्य चरणरेणुस्पर्शं–यस्मै पूर्णकामो भगवानपि स्पृहयति—कामयन्ते ध्रुवम्। अपि वा–मन्ये पुष्प-फल-भारनतैरात्मीयैस्तरुभिराराधयन्ति "विमलतरतरङ्गां मातरं चारुगङ्गाम्"। सायं प्रातः स्नातुमागतानां भक्तजनानां "जय गङ्गे" इति ध्वनिना मुखरितानि जायन्ते दिगन्तराणि। अधिजलं बहून् घृतपूरितान् दीपान् दर्शं दर्शं "नेदं नभोमण्डलमम्बुराशिः" इति अपह्नुतिरपि नैव निह्नुते प्रकृतम्। अपि तु "इदं नभश्चारु, नचाम्बुराशिः" इत्यात्मना सम्पद्यते।

वाराणस्याञ्चापि दशाश्वमेधघट्टे मणिकर्णिकातः प्रारभ्य हरिश्चन्द्रघट्टं यावत् दिवसावसानसमये काष्ठमञ्चस्थानां वंगीयानां सङ्कीर्तनमण्डलीनां भवति नयनसुखदं मनोरमं दृश्यम्। यत्र च मण्डलेश्वरो मुक्तकेशः सन् धृतपीताम्बरः, ऊर्ध्वबाहुरुत्थाय प्रथमं गायति सङ्कीर्तनपदम्। अन्ये च तदनुयायिनो गृहीतकांस्यघण्टिकाः सज्जीकृतमुरजास्तदेव पदं मुहुर्मुहुरुच्चैरुच्चारयन्ति। भवन्ति तत्रैवंविधा अनेकाः संकीर्तनमण्डल्यः प्रभूतानि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कथामण्डपानि च नौकाभिर्जलविहारं विदधतां सम्पन्नपरिवाराणां दृश्यञ्चापि रमणीयतरं नयने हरति। यत्र नौकासु सकेशरा विजया घोट्यते आत्मानुरूप आनन्दोत्सवो मान्यते।

गङ्गायास्तटे पुण्याहेषु बहुस्थानेषु मान्यन्ते महान्तो मेलाः। येषु प्रधानतया निर्दिश्यन्ते—गढ़मुक्तेश्वरः, राजघाटः, प्रयागः, भृगोराश्रमः (बलिया), सोनपुरञ्च, षड्वर्षानन्तरं हरिद्वारस्य प्रयागस्याचार्धकुम्भीपर्व, द्वादशवर्षानन्तरं कुम्भपर्वं चायाति। मध्ये मध्ये महावारुण्यादीनि पर्वाणि अप्यागच्छन्ति। एषु दूरदेशेभ्यो हिन्दुजनता स्नातुमागच्छति। यात्रिणां पर्णशालाभिरेकं पृथगेव सम्पद्यते महानगरम्। कथाव्याख्यानादीनाञ्च भवति सुप्रबन्धः। सर्वे सम्प्रदाया महता समारोहेण स्वं स्वं यात्रामहोत्सवं मानयन्ति। अत्रत्या जनसंख्या लक्षाण्यतिक्रम्य संस्पृशति कोटिम्।

सन्ति हि गङ्गाया भूयांसो भौतिका लाभाः—यथा हि, गङ्गाजलं निर्मलं निर्दोषं चास्ति। चिराय रक्षितमपि न विकृतिमापद्यते। अत्र विषये नास्ति कस्यापि विमतिः। पाश्चात्यवैज्ञानिकैस्तु साधु साधितमस्य महत्त्वम्! अत एव देशान्तरयायिनां पोतानां मध्ये यात्रिणां पानार्थमिदमेव सञ्चित्य नीयते। नेदं चिरविधृतमपि दूष्यते कीटाणुभिः। अपि चास्मिन् क्षिप्ता रोगाणां कीटाणवो झटिति म्रियन्ते इति बहुधा परीक्षितम्। अनुश्रूयते—महाकुष्ठिनोऽपि सतत-गङ्गावास-जलसेवनादिना नीरोगं गताः, के सन्ति पुनः साधारणरोगिणः। नात्र चित्रमनिर्वचनीयस्तावद् गङ्गाजलस्य महीयान् महिमा।

गङ्गाजलेन सिच्यन्ते क्षेत्राणि। हरिद्वाराद् गङ्गाया एका महाकुल्या (नहर) निस्सारिता विद्यते; या कर्णपुरं यावद् गच्छति। यया अनुर्वरा अपि भूमयः शस्यश्यामला विधीयन्ते। अन्यथा तु युक्तप्रान्तः शुष्कतां गच्छेत्। काऽऽशा स्यात् प्रभूततरधान्यराशेः।

अन्यच्च—बाष्पगन्त्रीणामाविष्कारात् पूर्वं गङ्गैवास्माकं प्रधानतमं व्यापारसाधनमासीत्, विद्यते साम्प्रतमपि। यस्याः प्रवाहेण व्यापारिणो

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जना नौकासु क्रय्यवस्तूनि स्थापयित्वा निर्भयमनायासञ्च स्थानान्तरं यान्त्यायान्ति च। सम्प्रति बाष्पगन्त्रीणां भूयस्तयाऽवश्यमेवाल्पतां गतोऽयं व्यापारविधिः।

साम्प्रतञ्च गङ्गाजलाद् विद्युदपि समुत्पाद्यते। यया हस्तस्पर्शमात्रेणैव "तमसो मा ज्योतिर्गमय" इति वैदिकप्रार्थना आध्यात्मिकरूपेण मा भूत्, भौतिकरूपेण तु अक्षरशः सत्यतां याति। यथा रावणस्य भवने बन्दीभूतः सन् वायुः किङ्करतां गत आसीत्। तथैवास्माकं गृहेषु स विद्युता ग्रीष्मे शीतः शीतकाले चोष्णः सन् कैङ्कर्यमावहति। विद्युदेव चलचित्राणां प्रधानतमं साधनम्। दासीवेयं विद्युदस्माकं गोधूमपेषणमपि विदधाति। व्यवसायगृहेषु वस्त्राणां भाण्डानामन्येषाञ्च पदार्थानां जायते भूयस्यां सङ्ख्यायां निर्माणं विद्युतैव। एतदादीनि दैवदुर्लभानि सुखानि अस्माकं सुलभतामुपगतानि।

किञ्च पूर्वजैः गङ्गायाः स्मरणं, स्नानं, स्पर्शनम्, आचमनम्, तत्रास्थिक्षेपणञ्च मोक्षदं स्मृतम्। संस्कृते हिन्दीभाषायाञ्च गङ्गाया महत्त्वबोधकानि महान्ति सुमनोहराणि स्तोत्राणि समुपलभ्यन्ते। संस्कृते भगवतः शङ्कराचार्यस्य 'गङ्गाष्टकम्', पण्डितराज-जगन्नाथस्य च 'गङ्गालहरी' परममनोहरे। हिन्दीभाषायां हिन्दीजन्मदातुः भारतेन्दु-हरिश्चन्द्रस्य 'गङ्गा-वर्णनम्' आलम-पद्माकरादीनाञ्च गङ्गास्तुतिरत्यन्तं भक्तिपूर्णा विद्यते।

(श्रीनिगमानन्दशास्त्री)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

५—यमुना

प्रवहन्ति भारतस्य प्रतिखण्डं प्रचुरा विशाला लघ्व्यश्च नद्यः, याभिर्देशोऽयं नदीमातृकः संवृत्तः, याभिश्च पर्वतेभ्य उत्कृत्योत्कृत्य समानीयमानया मृदा उत्तरोत्तरमुर्वरेयं भारतभूः सम्पद्यते धान्योत्पत्तिश्च वरीवर्ति भारतीयानां पोषणाय। तासु कतिपयास्तु निगमागमपुराणादिपुरातनग्रन्थेषु विगीतमहिमानो भूता अद्यापि अन्ताराष्ट्रियमहत्त्वं विश्रुतिञ्च गताः सन्ति। अस्ति यमुनायाः स्थानं तासु गङ्गाया एवानन्तरम्। निगमेऽपि इयं द्वितीयपदं बिभर्ति, यथा हि—"इमं मे गंगे यमुने सरस्वति शतुद्रि स्तोमं सचत"।

निगमेषु तु अस्या महत्त्वं निभाल्यत एव, पुराणेष्वपि बह्वयो गाथा अस्याः सम्बन्धमधिकृत्य निबद्धाः सन्ति। अनया स्वपरम-पुण्यप्रचयाद् दिवानिशं बोभूयमाना भगवतः श्रीकृष्णस्य विविधाः क्रीडा अक्षिलक्षीकृतास्तद्दर्शनानन्दश्च समनुभूतः। तथा हि, कदापि गाश्चारयन् नन्दानन्दवर्धनः चिरकालतः परिभ्रमणेन खिन्नः स्विन्नशरीरश्च भूत्वा एतत्तटप्ररूढस्य कस्यचित्तरोरधस्तात् छायासुखमनुभवति, कदापि गोपीवृन्देन सहितोऽनेकवल्लरी-परिवेष्टित-तटस्थितनिकुञ्जनिकुरेषु विविधा रासक्रीडा आरचयति, कदापि जलान्तः प्रविष्टः गोपकदम्बेन सह जलविहारेण सन्तोषयत्यात्मानम्। कृष्णानिष्टसम्पादनाय कंसेन क्रियासमभिहारेण प्रेषितानां अनेकेषां रक्षसां वधोऽप्यनया समवलोकितः। वसुदेवेन गोकुलं प्रति प्रापणाय शिरसा उह्यमानस्य शिशुरूप-धारिणो भगवतः श्रीकृष्णस्य पादस्पर्शं विधाय निष्प्रत्यूहगमनाय नीचैः संवृत्तेयम्। कृष्णहलधराभ्यां साकं मधुपुरीं प्रति गच्छता अक्रूरेण भगवल्लीलादर्शनमप्यस्या जले निमग्नेन भूत्वा कृतम्। अन्ततो भगवत्प्रेम-पाश-संयतेयं कालिन्दीरूपेण मनुष्यशरीरिणी भूत्वा तस्य पट्टमहिषीष्वन्यतमा संवृत्ता।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ऐतिहासिककालेऽपि किं किन्नावलोकितमनया ? आर्याणां प्रवृत्ति-केन्द्रन्तु अस्य तीरोपान्तप्रदेशा आसन्नेव, परमनया दिल्लीसमीपे प्रवहन्त्या युधिष्ठिरस्योत्थानपतने, पृथिवीराजस्य राज्याधिकारच्युत्या सहभावी हिन्दु-गौरवध्वंसो यवनप्रवेशश्च, विविधयवनराजवंशानां राज्याधिरोहणाधःपातो, विदेशीयैः कृतं भारतास्कन्दनम्, तुरुष्कशासकानुशासकानां विलसितानि, राजपुत्रैर्महाराष्ट्रियैश्च कृतं दिल्लीयानम्, आङ्गलप्रवेशो निस्सरणञ्च, स्वातन्त्र्यावाप्तिहर्षः, राष्ट्रपितुः स्वर्गाधिरोहणञ्चेति विचित्रं विभिन्नञ्च घटनाचक्रं समस्तमप्यस्या एव रोधसि संवृत्तम् । इत्थमस्माकमैतिह्येन संस्कृत्या उत्थान-पतनाभ्याञ्च साकमस्याः पुरातनः सम्बन्धोऽजायताद्य यावत् ।

इयमेव गङ्गा-सरस्वतीभ्यां सम्मिल्य त्रिवेणीरूपमाकलयति, यत्र पुरा भरद्वाजाश्रमोऽधुना च 'प्रयागो' नाम तीर्थराजो विशालनगरं च स्थितम् । सन्ति हि दिल्ली वृन्दावन-मथुरा-आगरेत्यादीनि भारतप्रख्यातानि नगराण्यपि अस्या एव तटे ।

गंगावदस्यास्तटेऽपि बहूनि तीर्थानि सन्ति येषु प्रतिवर्षं लक्षशो जनाः प्रतिवर्षं पापापनोदनाय चिरन्तन-शान्त्युपलब्धये सिस्नासवः समागच्छन्ति । प्रचुराः परित्यक्तैषणाः साधवोऽस्यास्तटे विचरन्ति । प्रतिद्वादशवर्षं प्रयागे कुम्भपर्व भवति । अन्या अपि बह्व्यो मेलास्तीर्थयात्राश्च अस्या रोधसि मान्यन्ते ।

इयं हि हिमालयाद् यमुनोत्तरीस्थानाद् निष्क्रम्य पूर्वमत्यल्पधारारूपेण तन्वी ततः क्रमशोऽन्यस्रोतांसि आत्मविग्रहे निलीनानि विधाय विशाला भूत्वा समतलभुवि प्रवहन्ती दिल्लीनगरमूलं प्रक्षाल्य मथुरा-वृन्दावनयोर्यात्रिकेभ्यो जलनिमज्जनसुखं तदुपलक्षितपुण्यपुञ्जञ्च जनयन्ती आगरानगरे 'ताजमहल' इत्यस्य जगतः सप्तमाश्चर्यस्य सम्मुख एव स्थिता तच्छोभां द्विगुणयति । ततो विन्ध्यप्रदेशे काननैरुपगूहिता चम्बल-सिन्धु-वेत्रवतीत्यादि-नदीनां पयसा भूयोऽपि पयस्वनी अगाधतोया सती प्रयागे त्रिवेणीसंगमे गङ्गाया अङ्के संगोपयत्यात्मानम् ।

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्याममस्या जलम् । तटोद्गततमालतरुभिरस्याः कार्ण्यं विवृद्धमपि आकाशनैर्मल्यस्य प्रतिच्छायया विचित्रामेकां वर्णयितुमशक्यां सुषमां जनयति, येन सर्वमपि वातावरणमन्धकारितमिवोपलक्ष्यते ।

महान्तो यमुनाया लाभाः । पञ्चाम्बुप्रदेशे 'ताजेवाला' इति स्थानात्, उत्तरप्रदेशे फैजाबाद 'ओखला' इति स्थानाभ्याञ्च तिस्रो महाकुल्याः (नहर) निःसारिता विद्यन्ते, याभिः पञ्चाम्बुप्रदेशस्य दक्षिणभाग उत्तर-प्रदेशस्य च पश्चिमखण्डः सिच्यते, अन्यथा मरुभूमितो नातिदवीयस्तया तत्प्रदेशानां सर्वमपि मरुमयं सम्पद्येत ।

पर्वतेषु वृक्षाः समुत्पाट्य अस्यां प्रवाह्यन्ते, येन ते सर्वथा नगण्येन व्ययेन शीघ्रमेव समतलभुवि समागच्छन्ति । जगाधरी-स्थाने तदमूल्यं दारु बहिर्निस्सार्यते, विविधस्य वस्तुजातस्य निर्म्माणं क्रियते तदनन्तरम् ।

इयं पञ्चाम्बूत्तरप्रदेशयोः स्वाभाविकी सीमा । प्रान्तद्वयेनैवास्या लाभा गृह्यन्ते । अन्या अपि विद्युदादिकोत्पादिका बह्वयो योजनाः विचार्यन्ते, याभिर्भूयान् लाभो लप्स्यते भविष्यत्काले इत्येवाशास्यते ।

(उपसम्पादकस्य)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

६—उत्तरप्रदेशः

भारतस्य सर्वेषु प्रान्तेषु, विशालतम उत्तरप्रदेशो जनसंख्यापरिणाह-शिक्षा-सुशासन-ऊर्वरत्व-वैभवदिशा प्रामुख्यं बिभर्त्यद्य। गङ्गा-यमुने स्वस्व-सहायकनदीभिः सह नवीनमृदा जलसेकेन च प्रभूतधन-धान्योपेतमेनं प्रदेशं कुरुतः। अन्यदपि कारणमस्य समृद्धेरिदं यत् प्राचीनकालतः प्रसह्यैतद्धन-जिघृक्षया असंख्याका आक्रान्तारः सीम्नि प्रवेशद्वारे पञ्चाम्बुप्रान्त एव सन्निरुध्यन्ते स्म, येन नहि कदापि परैरस्य मोषोऽक्रियत। निश्चिन्ततया समृद्धिपराकाष्ठामुपगतोऽयं प्रदेशः प्रत्येकक्षेत्रेऽनेकेषां महापुरुषाणां कर्मभूमिः समजायत, येषां प्रभावेण समस्तेऽपि भारते परिवर्तनं समभूत्, भवति भविष्यति च।

रामकृष्णकेलयोऽत्रैव संवृत्ताः। ऋषयोऽस्मिन्नेव प्रवहन्तीनां नदीनां तटे वेददर्शनं चक्रुः। भारतीयामरसंस्कृतेः प्रसारोऽपि प्रदेशादस्मात्सम-वर्तत। पुरेव अधुनापीयमेव भूमिर्महनीयमहसां विश्रुतयशसां भक्तानां, विचारकाणां, शिक्षाविशेषज्ञानां, राजनीतिविदाञ्च महापुरुषाणां खनिरिव जाता। अस्माकं प्रधानमन्त्री दिग्दिगन्तरेषु प्रथितयशा जवाहरलाल एत-त्प्रदेशीय एव। अस्मिन्नेव प्रदेशेऽद्य सुदृढं शासनं सुरक्षाया वातावरणं च समवलोक्यते। अयं प्रान्तः पुरा 'आर्यावर्तेति' नाम्ना प्रख्याप्यते स्म।

उत्तरप्रदेश उत्तरभारतस्य मध्ये स्थितः। अस्योत्तरदिशि तिब्बतदेशः, उत्तरपूर्वस्यां नैपालराज्यम्, पूर्वस्यामाधुनिकबिहारप्रदेशः, दक्षिणस्यां मध्यभारत-विन्ध्यप्रदेशौ पश्चिमायाञ्च दिल्ली-पञ्चाम्बुप्रदेशौ स्थितौ। आङ्गलराज्ये एतदन्त आगराऽवधप्रदेशद्वयतया 'युक्तप्रान्त' इति नाम्ना प्रख्यात आसीदयम्। परं नवविधानानुसारं साम्प्रतं 'उत्तरप्रदेशो'ऽस्य नाम।

अस्मिन् प्रान्ते नैकविधा विशेषताः सन्ति। अत्र षड् विश्वविद्यालयाः कतिपये चाध्यापकशिक्षणाऽऽयुर्वेदिक-कृषि-वास्तुकला-स्थापत्य-समाजसेवा-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शिक्षणविद्यालयाः सन्ति। कर्णपुरं बृहद् व्यापारिकं, व्यावसायिकमौद्योगिकञ्च केन्द्रं विद्यते। मुरादाबादस्य पात्राणि, अलीगढ़स्य द्वारावरोधनानि, मेरठस्य कर्त्रिका, गाजीपुर-जौनपुरयोः सुगन्धितैलानि, देहरादूनस्थ व्रीहयः, मैनपुरी-लखनऊनगरयोस्ताम्रकूटं मथुरायाश्च पेटका इति सर्वं सर्वत्र प्रख्यातमस्ति। विश्वविश्रुतमनुपमसौन्दर्यवच्च ताजमहलभवनमस्मिन्नेव प्रदेशे आगरानगरे स्वशोभां विकिरति। वाराणसी-मथुरा-प्रयाग-प्रभृतीनि नगराणि हिन्दुधर्मस्य केन्द्राणि सन्ति। अत्रैव प्रदेशेऽयोध्यानगरे भगवान् श्रीरामो जज्ञे, भगवान् श्रीकृष्णचन्द्रो मथुरायामवतीर्णः। सुगतेनापि अत्रैव बौद्धमतं प्रसारितम्।

राज्यपालो धारासभायां बहुमतदलेन विरचितमन्त्रिमण्डलसाचिव्येन राज्यशासनं सञ्चालयति। विधिनिर्माणाय धारासभा (Lagislative Assembly), धारापरिषद् (Lagislative Council) इति परिषद्द्वयं विद्यते। शासनसौकर्याय समस्तं राज्यमेकपञ्चाशद्जनपदेषु विभक्तमस्ति। प्रत्येकजनपदस्य प्रमुखाधिकारी उपायुक्तो नियुक्तः। सर्वसाधारणस्य शासने वरीवृध्यमानप्रवेशाय प्रतिग्रामं पञ्चायतनिर्माणमपि जातम्।

अस्मिन् प्रदेशे सार्ध-पञ्चकोटिर्जना निवसन्ति, येषु हिन्दूनां बाहुल्यम्। मौहमदीया अपि प्रायेण समस्तजनसंख्याया पञ्चदशप्रतिशतपरिमितसंख्याकाः सन्ति। हिन्दीभाषाभाषिणामत्र प्राधान्यम्। उर्दूभाषा तु मौहमदीयैरेव स्वीकृता। संस्कृतमपि प्रचुरैर्जनैः पठ्यते, प्रयुज्यते च कैश्चित्।

अत्रत्या बहवो जनाः कृषीवलाः, यतः कृषिरेव प्रधानव्यवसायः। साम्प्रतं कर्णपुरादिनगरेषु औद्योगिकैरपि बहूनां यन्त्रालयानां संस्थापनमकारि, येन श्रमिकत्वमपि कतिपयैः स्वीकृतमाजीविकार्थम्।

हिन्दूनां प्रामुख्याद् मिश्रितसंस्कृतेरभावाच्च सनातनधर्मानुयायिनोऽत्रत्या जना हिन्दुत्वे सर्वश्रेष्ठपरम्पराणां वास्तविकप्रतिनिधिभूताः प्रायेण रूढिप्रिया अपि निभाल्यन्ते। परन्तु भारतीयवैशिष्ट्यधारिणी यवनसंस्कृतिरपि अस्मिन्नेव प्रान्तेऽक्षिलक्षीक्रियते। दीपावली-विजयादशमी-अन्नकूट-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भ्रातृद्वितीया–होलिका–रक्षाबन्धन-रामनवमी–जन्माष्टमी–शिवरात्रि-गणेश-चतुर्थी-अनन्तचतुर्दशीत्याद्युत्सवा हिन्दुषु, ईदुलफितर-बारहवफात-मुहर्रम-रमजानादयो मौहम्मदीयेषु महता समारोहेण सम्मान्यन्ते ।

जनसंख्यानुसारं शिक्षाप्रसारो यद्यप्यत्यल्प एव तथापि श्री सम्पूर्णानन्दसञ्चालितेन शिक्षाविभागेन अधुना प्राथमिक-माध्यमिकोच्चशिक्षाया नवं संघटनं विधाय उत्तरोत्तरं तत्प्रसारः क्रियते। अत्र षड् विश्वविद्यालयाः, ये काशी–अलीगढ़–प्रयाग–लखनऊ–आगरा–गोरखपुरेत्याख्येषु नगरेषु संस्थापिताः । रुडकीस्थ-वास्तुकलामहाविद्यालयोऽपि गतवर्षे विश्वविद्यालयस्तरमारोपितः। शीघ्रमेव काशीस्थ-राजकीय-संस्कृतकालेजोऽपि संस्कृत-विश्वविद्यालयः करिष्यते। अत्र षट् कृषिमहाविद्यालयाः, त्रयोदश यान्त्रिकशिक्षणसंस्थाः, त्रयो वास्तुकलामहाविद्यालयाः, चत्वारश्च पाश्चात्यभैषज्य-पद्धतिसंस्थाः, अष्टौ आयुर्वेदिकमहाविद्यालया अन्ये च दश विविध-विषयाणां महाविद्यालयाः सन्ति ।

स्वास्थ्याय नैनीताल-मसूरी-अलमोड़ा-रानीखेतप्रभृतीनि स्थानानि प्रख्यातानि । बद्रीनाथ-केदारनाथ-हरिद्वार-हृषीकेश-वृन्दावन-मथुरा-गढमुक्तेश्वर-प्रयाग-वाराणसी-अयोध्या-सारनाथादीनि तीर्थत्वेन प्रसिद्धानि । 'लखनऊ' अस्य प्रदेशस्य राजधानी। अन्यान्यपि मेरठ-आगरा-बरेली-कानपुर-अलीगढ-हापुडादीनि विभिन्नवस्तुभ्यो विश्रुतानि ।

अत्र वस्त्र–सितशर्करा–चर्मवस्तु–कर्गद–वनस्पतिघृत–सीसकादीनां निर्माणाय विविधा यन्त्रालयाः सन्ति । कुटीरोद्योगायापि प्रोत्साहनं दीयते। पात्रनिर्माणं, पट्टवस्त्रेषु वल्लर्यादिगुम्फनम् हस्तिदन्तकार्यञ्चापि कतिपयनगरेषु सुष्ठुतया क्रियते ।

समस्तभारतस्य विविधदिशा अयमेव प्रदेशः केन्द्रं हृदयञ्च। राष्ट्रस्य शासनसूत्रमपि एतत्प्रदेशोत्पन्नैः राजनीतिज्ञैर्धार्यते। पुरा अधुनापि सुधाराय उन्नत्यै च परिचालितेष्वान्दोलनेषु नेतृत्वमयमेव प्रायो बिभर्ति। उत्तरोत्तरं भूयसीमुन्नतिं प्राप्नुयादिति प्रार्थ्यते दीनबन्धुर्भगवान् परमेश्वरः।

(उपसम्पादकस्य)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

७—वाराणसी

इह भारतवर्षे सन्त्यनेकानि तीर्थानि। प्रायेण सर्वाणि नदीतटे स्थितानि। महर्षिसेवितजलमेव तीर्थमिति प्रसिद्धम्। कल्मषशून्यैर्महात्मभिः सेविताः प्रदेशाः पवित्राः पूज्याश्च भवन्ति। अस्ति वाराणसी खलु तीर्थम्। इयं गङ्गातटे स्थिता। इयं मर्त्यलोकस्थितस्य भगवतो विश्वनाथस्य अधिवासः। यथा 'जरुसलम्' ख्रिस्तीयानाम्, यथा वा 'मक्का' मोहम्मदीयानां तथा वाराणस्यपि आर्याणां भक्तिभाजनं श्रद्धास्पदञ्च तीर्थं विद्यते।

काश्यां मरणे मुक्तिरिति श्रद्दधाना वृद्धावस्थायां शिक्षिता अशिक्षिता वा धनिका निर्धना वा इह निवसन्ति मृत्युप्रतीक्षाञ्च कुर्वन्ति।

सेयं वाराणसी कदा प्रतिष्ठामगमदिति विशिष्य न ज्ञायते। इदं तु प्रसिद्धं यदिक्ष्वाकुकुलोत्पन्नो राजर्षिः श्रीहरिश्चन्द्र इहैवात्मनश्चाण्डालाय विक्रयं चकार। इदञ्च दृढतरं प्रतीयते यदा भगवान् बुद्धः सारनाथे मृगाजिरे धर्मानुशासनमकरोत्तदाऽपि वाराणसी परमविदुषां ब्राह्मणानामावास आसीत्। तदात्वेऽपि सहस्रशो भक्तिप्रवणा यात्रिका इमां पूतां शिवपुरीं तारकं तीर्थमिति धिया सोत्कण्ठमागच्छन्ति स्म। ब्राह्मणगाथासु बौद्धकथानकेषु च बहुमानेनास्या वर्णनं कृतं लक्ष्यते। इदं ह्यार्याणां पुण्यतमं तीर्थमित्यसहमाना धर्मान्धा अन्यधर्मद्वेषिणः तुरुष्का मुगलाद्याश्च पुनः पुनर्वाराणस्यामाक्रमणानि कृत्वा मन्दिराणां दुर्दशां भ्रंशं चाकुर्वन्। अवरङ्गजीवहतकेन तु श्रीविश्वनाथमन्दिरमपि खण्डितम्। तत्र च मस्जिदस्य निर्माणमकारयत्। परं वाराणसीसुषमा तु अद्यापि सैव। सामगानां पुण्यो वेदध्वनिः कर्णरन्ध्रे प्रविश्य पवित्रं हि तत् करोति। अद्यापि बटूनां वेदस्वरो द्यां स्पृशति। अद्यापि शास्त्रार्थप्रवृत्तानां विप्राणां कलकलो दिक्षु प्रसरति। अद्यापीदं पुण्यतमं तीर्थमिति श्रद्धया समागच्छन्ति लक्षशो यात्रिकाः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अद्यापि देवालयेषु सायं प्रातश्च तूर्यनादा माङ्गल्या शङ्खनादाः समुत्तिष्ठन्ति। किं बहुना, निर्जरा सुरयुवतिरिव नगरीयं पूर्ववद् विराजते ।

वाराणस्या दर्शनेन अन्या एव विलक्षणा भावना हृदये समुत्पद्यन्ते। यदा वयं रेलयानमारुह्य प्रातः भागीरथीसेत्वतिक्रमणं कुर्वन्तो वाराणस्यां दृशौ पातयामस्तदा यत् पश्यामो नहि तत्कदापि विस्मर्तुं शक्यते। बाल-सूर्यकिरणैर्लोहितीकृतानि भास्वन्ति मन्दिराणि, हर्म्यशृङ्गाणि, अवतार-भूमीरनुगङ्गं नगरीविशालतां निरीक्ष्य यो भावो यात्रिकचेतसि समुद्भवति नहि तं कश्चिदपि पाश्चात्त्यो द्रष्टुं शक्तः ।

मन्दिराणि प्रायेण गङ्गायास्तटे स्थितानि सन्ति । निशान्ते एतेषु यात्रिकाणां सम्बन्धो भवति। विशालानि बद्धभूमीनि सरित्तीर्थानि विशेषतो रम्याणि। तेषु दशाश्वमेधतीर्थं, मणिकर्णतीर्थं, केदारतीर्थञ्चेति त्रयमति-प्रख्यातं विद्यते। विश्वनाथ मन्दिरस्य अति निकटे आख्यानेषु प्रसिद्धं दशाश्वमेधतीर्थं बहून् यात्रिकान् समाकर्षति ।

अत्र भारतवर्षस्य प्रत्येकभागतो विविधवेषधारिणो विविधभाषाभाषिणो यात्रिकाः समागत्य नगर्या वैचित्र्यं वर्धयन्तो निरन्तरं रात्रिजागरणं विधाय भक्तवत्सलपरमेश्वरस्य कीर्तनं कुर्वते। 'भगवत्यां भागीरथ्यां स्नानं निः-शेषपापानामपहारकं विद्यते' इति तेषां श्रद्धा ।

अत्र वयोवृद्धा ज्ञानवृद्धाश्च निवसन्ति। अत्र मन्दिराणि प्रायेण पाषाण-निर्मितानि सन्ति । अत्र निर्माणसौष्ठवन्तु स्वल्पमेव, परं पवित्रता तु अतिशयिता । विश्वनाथमन्दिरमन्नपूर्णामन्दिरञ्चान्यमन्दिरापेक्षया परम-माहात्म्ययुक्ते। यदि श्रद्धा-भक्तिसम्पन्नः कश्चिद् यात्रिकः शिवलिङ्गं स्प्रष्टुं लभतेऽन्नपूर्णां वा साक्षात् कुरुते तदा 'जन्म सफलम्' इति धन्यमात्मानं मन्यते। वेणीमाधवमन्दिरं चात्र स्वचित्रनिर्माणेन भृशं विस्मयं जनयति दर्शकानाम्। अस्य समीप एव अवरङ्गजीवनिर्मिता मस्जिदस्ति। यस्याः शृङ्गे मन्दिरस्यैवेति प्रसिद्धम्। एकतरमपि समारूढेन जनेन सर्वापि नगरी द्रष्टुं शक्या। अत्र जयपुराधीशेन श्रीमानसिंहेन कारिता वेधशालापि विराजते ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रात्रौ च वाराणस्या विचित्रा दीप्तिमत्ता दिवसादपि समधिकां शोभां जनयति। रात्रिं यावत् मन्द्रध्वनियुक्ता घण्टा मन्दिरेषु नदन्ति। स्फटिक-वच्छुभ्रेण पयसा पूर्णा मन्दाकिनी मन्दमन्दं प्रवहति। प्रतिफलितानि चास्यां दृश्यन्ते प्रकाशमानानि हर्म्याणि मन्दिराणि च। पारेगङ्गञ्च श्रूयन्ते देवार्चायां संलग्नानां स्तोत्रपाठाः।

अस्ति चात्र श्रीमालवीयसंस्थापितो विश्वविद्यालयः। सन्ति चेह वज्रकनिर्मिताः पन्थानः। सन्ति च वैद्युताः प्रदीपाः। सन्ति चापां नालिका नगराधिकृतैः संविहिताः। यद्यपि साम्प्रतिकवातावरणस्य प्रभावोऽत्रापि दृश्यते तथापि महत्सु तीर्थेषु, मन्दिरेषु, देवतासु स्थायिनी श्रद्धाऽनुरक्तिश्च वरीवृत्यते एव। भवेन्नाम अत्र भ्रष्टाचारो देवता अपि अत्रैव निवसन्ति।

(श्रीचारुदेवशास्त्रिणां प्रस्तावतरङ्गिणीतः सरलीकृत्य संक्षिप्य च संगृहीतः)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

८–हिन्दुविश्वविद्यालयः

संस्कृतिः समुन्नतराष्ट्राणामात्मा भवति जीवातुतामुपगता । संस्कृतिविहीनराष्ट्राणि शीघ्रमेव नामशेषाणि भवन्ति। समुच्चसंस्कृते रक्षणेन तु परेषां वशर्वाततां गतान्यपि पुनर्नवोत्साहेन समुत्तिष्ठन्ति । पराधीनदशायां संस्कृतौ गर्वं तद्गौरवञ्च पराधीनतोत्पन्नदैन्यं दूरमपसारयति। अत एव विजेतारः पूर्वं राष्ट्रस्याधारस्तम्भभावंगतां संस्कृतिमेव विनाशयितुं बद्धपरिभवन्ति। परं भाविसन्ततिषु संस्कृतिसङ्क्रमणं सरित्प्रवाह इव भवति। प्रवाहोऽयं यद्यबाधगत्या वहति तदैव तत्सत्ताऽनारतमवतिष्ठते, अन्यथा समूलविनाशोऽवश्यम्भावी। स्वल्पोऽप्यवरोधः संस्कृतिमयं पयः संशोषयति। कतिपयाः परम्परा ईदृश्यो भवन्ति याभिः संस्कृतिप्रवाहोऽबाधगत्या प्रवहति। ताः परम्पराः समुचितशिक्षासंस्थाभिरेव संरक्षितुं शक्यन्ते। अतः शिक्षासरणीरीदृशी स्यात् या खलु स्वकक्ष्यं पूरयितुमलं भवेत्। इत्थं शिक्षापद्धत्या महत्त्वं मौलिकं प्रमुखं सर्वोत्कृष्टतमञ्चास्ति।

यवनैः स्वशासनसमये प्रसह्य स्वपरम्पराणां भारतीयेषु समारोपणस्य प्रयासः कृतः, यस्य प्रभावपूर्णः प्रतिरोधः कथमप्यक्रियत। सम्मुखीनाक्रमणस्य प्रतीकारः सारल्येन कर्तुं शक्यते। अतो यवनराज्ये भारतीया स्वाधीना शिक्षणपद्धतिः स्वरूपमपरित्यज्य स्वलक्ष्यपूर्तौ शक्ता अतिष्ठत्। परमाङ्गलैर्भारतीय–समुच्च-संस्कृतेर्विनाशाय अन्यान्येव कूटनीतिपूर्णानि षड्यन्त्राणि व्यरचिषत। येषां ज्ञानमपि तत्फलं निरीक्ष्य कथमप्यभवत्। लार्ड–विष्टिङ्गसमये श्रीमैकालेमहोदयो भारतीयशिक्षणपद्धतौ आमूलपरिवर्तनसम्पादनाय भारतवर्षम्प्रति प्रेषितोऽभवत्। येनागत्य सुविविचिन्त्य ईदृश्येका योजना प्रचालिता, यया शनैः प्राचीनशिक्षणपद्धतिर्नष्टप्राया संवृत्ता। अहमहमिकया राजसेवकतायै प्रयतमानानां युवकानां बाहुल्यमजायत समस्तेऽपि भारते । [illegible] शिक्षिता जनाः पश्चिमं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रेरणास्रोतो मन्वानास्तदनुकरणं गौरवं जानन्ति। स्वसंस्कृतिस्तैः 'रूढिवाद' इति कृत्वा परित्यज्यते।

दृष्ट्वैतद् नितान्तं परिखिन्नमनाः प्रातःस्मरणीयो महामनाः श्रीमालवीयो विविधविध-प्रवृत्ति–पूर्णस्य स्वजीवनस्यान्यतमं ध्येयं प्रचलितशिक्षा-पद्धतिपरिवर्तनमकरोत्।

विजेतॄणां साम्राज्यवादिनां विजितराष्ट्रस्य राष्ट्रीयतत्त्वानां समूलोन्मूलनाय अन्यापि एकास्ति परिपाटी। ते तद्रूपधरा भूत्वा तदुद्धाराय परमहितैषिणो भूतास्तदन्तः प्रविश्य तस्य निःशेषविनाशं शीघ्रतया प्रयोजयन्ति। यदा मालवीयमहोदयः स्वमन्तव्यानि कार्ये परिणमयितुं विचारयन्नेवास्त, थियोसोफिस्टसम्प्रदायस्य 'श्रीमती एनीबेसेण्ट'महोदया प्राचीनसंस्कृतेः संस्कृतस्य चोद्धाराय स्वयमेव बद्धपरिकरा भूत्वा स्वस्मै गुरुपदमभिलषन्ती पाश्चात्त्यसभ्यता-गौरवञ्च भारतीयविद्यया निरीहेषु बालेषु पातयितुमुत्कण्ठिता केन्द्रीयहिन्दुकालेजसंस्थापनाय प्रयतितुमारब्धा। परं न तत्प्रयासेन साफल्यमुखमवालोकि। अन्ततः श्रीमालवीयः पाश्चात्त्यशिक्षा-प्रभावापसारणाय भारतीयताया नवोन्मेषाय च हिन्दुबालकानां समन्वित-शिक्षायै विश्वविद्यालयमेकं स्थापयितुमचेष्टत। स प्राचीनब्राह्मणवृत्तिमङ्गीकृत्य भिक्षापात्रमादाय धनमेकत्रीकर्तुं समस्तस्यापि भारतस्य भ्रमणं चकार। प्रभोरिच्छया तेन स्वयाचनस्य समुचितमुत्साहप्रदमुत्तरमप्यलम्भि। कुटीत आरभ्य प्रासादपर्यन्तं सर्वेष्वपि स्थानेषु लक्ष्यानुकूलप्रतिक्रिया समजायत। लक्षशो रूप्यकाणि प्राप्तानि तेन।

१९१६ ख्रीष्टाब्दे लार्ड हार्डिङ्गद्वारा हिन्दुविश्वविद्यालयस्य शिलान्यासो जातः। ततः प्रारभ्य स्वमरणपर्यन्तं महामना एवास्योपकुलपतिपदमलञ्चकार। विश्वविद्यालयसंस्थापने धनप्रदानेन प्रोत्साहनेन च साहाय्यप्रदेषु श्रीदरभङ्गानरेशः प्रामुख्यमावहति। अन्यैरपि काश्मीर-पटियाला-टेहरी-जयपुरादिराज्याधीशैर्विरलाप्रभृतिभिः श्रेष्ठिप्रवरैश्च भूयसी सहायता प्रादायि। हैदराबादीयनिजाममहोदयेन चाप्यस्मिन् शिक्षादानमहामखे

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सादरमाहुतिः समर्पिता। इत्थं कोटिपरिमितं धनमेकत्रीभूतम्। राजकीय-नियमपूर्त्या तत्कालमेव भारतसर्वकारस्य स्वीकृतिरपि समासादिताऽभूत्।

अधुना भवननिर्म्माणाय समुचितभूमिप्राप्तिसमस्या महनीययशसो मालवीयस्य चित्तमाकुलितं चकार। अन्ततो याचकप्रवरः काशीनरेशान्तिकं समायात्, स्वयाच्ञां च प्राकटयत्। तेनापि सहर्षं नगरतो नातिदवीयसि स्थानेऽभिलषितभूमिदानं व्यधायि। योजनानुसारं भवननिर्माणमपि जातम्। केन्द्रीय-हिन्दुविद्यालयः आङ्गलादिभाषाणां शिक्षणाय, संस्कृत-महाविद्यालयः संस्कृताध्ययनाय, आयुर्वेदमहाविद्यालयः प्राचीनचिकित्सा-पद्धतिप्रसाराय, विज्ञानमहाविद्यालयो भारत एव समुच्चविज्ञानशिक्षा-प्रबन्धाय, आकरकर्मान्तप्रवर्तनाय योग्यविदुषां निर्माणाय खनिगवेषणा-संस्था, वास्तुकलाप्रशिक्षणाय वास्तुकलामहाविद्यालयः, यान्त्रिकशिक्षायै यान्त्रिकशिक्षणसंस्था चेति विविधा महाविद्यालयाः स्वल्प एव समये निर्मिता भूत्वा स्वकार्यमारेभिरे।

अस्य विश्वविद्यालयस्य निर्माणाय हिन्दुराष्ट्रस्य समस्तैरपि सम्प्रदायै-र्योगो दत्तः। देशस्य प्रत्येकभागतश्छात्रा विविधविद्या-शिक्षाग्रहणाय समागच्छन्ति। पुरा शिक्षणमाध्यमं प्रत्येकप्रान्तीयछात्रसुविधायै आङ्गल-भाषा आसीत् यतोऽयं विश्वविद्यालयोऽन्तर्देशीय एव नान्ताराष्ट्रीयश्चाप्यस्ति। परं भारतस्वाधीनतानन्तरं हिन्दीभाषायां राष्ट्रभाषापदं गमितायां राष्ट्र-भाषैवाधुना शिक्षणपरीक्षणयोर्माध्यमत्वेन स्वीकृता।

अत्रत्यं वातावरणं भारतीयसंस्कृतिमयं परमपावनं धार्मिकतत्त्वप्रादु-र्भावानुगुणपञ्चास्ति। संस्कृतपठनं सर्वेषामावश्यकम्, तदर्थं प्रबन्धोऽपि कृतो विद्यते। शिलान्यासत एवैकस्यादर्शभगवन्मन्दिरस्य स्थापना भवनानां मध्येऽनुभूयते स्म। मालवीयमहाभागस्य तन्निर्माणाय संकल्पोऽप्यासीत्। घनसञ्चयोऽपि जातः, परं न लक्ष्यपूर्तिरभवत्। मालवीयनिधनान्तर-मिदमपि जातम्। साम्प्रतं विशालमेकं भगवन्मन्दिरं विदेशीययात्रिकाणां दर्शकानां भगवच्चरणारविन्दाभिलाषपरकाणाञ्च अहरहर्ध्यानमाकर्षति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

योग्यताऽनुभवाचारादिदृष्ट्या उत्कृष्टाध्यापकानां चयनाय सततं पूर्णोऽपि प्रयत्नः क्रियते, येनाधुना ईदृशा उत्कृष्टाध्यापकाः सर्वेषु विभागेषु शिक्षणकार्यं निर्वहन्ति यच्छात्रा अहमहमिकया स्थानं प्रवेशञ्च लब्धुं यतन्ते ।

भारतराज्यसङ्घस्य राष्ट्रपतिरस्य विश्वविद्यालस्य प्रधाननिरीक्षकः (Rector) उत्तरप्रदेशस्य राज्यपालः कुलपतिः (Chancellor) एक उपकुलपतिः (Vice-Chancellor) सहायकोपकुलपतयः (Pro-Vice-chancellors) रजिष्ट्रारप्रभृतयोऽधिकारिणोऽस्मिन्, ये प्रबन्धसमिति (University Council)—सहायतया प्रबन्धं चालयन्ति । प्रबन्धसमितेरपि भागद्वयमस्ति–सिण्डीकेटः सिनेटश्च । हिन्दव एव प्रायेणास्याः सदस्याः । ते एव सहायकाः ।

भारतसर्वकारोऽपि प्रतिवर्षं किञ्चिद् धनं साहाय्यरूपेण (Grant in Aid) समर्पयति । परीक्षाशुल्केन, शिक्षणशुल्केन वदान्यप्रदत्तदानद्रव्येण चास्य संचालनं भवति ।

विविधमहाविद्यालयेषु विविधविषयाधीतिभ्यः स्नातकेभ्यः तत्तद्विषयानुसारमुपाधिप्रदानं भवति। अन्येभ्योऽपि राजनीतिज्ञेभ्यो विशेषसहायकेभ्यः शिक्षाविशेषज्ञेभ्यश्च 'डाक्टर' (Doctor) इति उपाधिः सम्मानाय सादरं समर्प्यते ।

पुरा अस्य सर्वमपि कार्यं हिन्दुभिः प्रायेण हिन्दुच्छात्राणां कृते हिन्दुधनेन हिन्दुतामयवातावरणे सञ्चाल्यते स्म । नामाप्यस्य 'हिन्दुविश्वविद्यालय' इति विश्रुतिमगात् । परं भारतस्वातन्त्र्यानन्तरमसाम्प्रदायिकविधानानुसारं किञ्चित्परिवर्तनमवश्यकरणीयत्वेन विधातुमापतितम्, येनास्मिन्नब्दे (१९५१) भारतीयसंसदि शिक्षामन्त्रिप्रेरणया 'काशीविश्वविद्यालयविधेयकम्' इति नाम्ना स्वीकृतमभूत् विधेयकमेकम्, तदनुसारं हिन्दुव्यतिरिक्ता अपि जनाः प्रबन्धसमितेः सदस्यत्वाय योग्या अभिमता अभवन् । धार्मिकशिक्षा ऐच्छिकीत्यपि स्वीकृतम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१९४६ खिृष्टाब्दपर्यन्तं श्रीमालवीय एवोपकुलपतिपदमलञ्चकार, परं वार्धक्येन किमपि कर्तुमशक्तः स परमविदुषो विश्रुतदार्शनिकस्यान्ताराष्ट्रीयख्यातिजुषः 'डाक्टर' इत्युपाधिभाजो राधाकृष्णन्महोदयस्य योग्यहस्ते विश्वविद्यालयप्रबन्धभारं समार्पयत् । तस्यापि रूसदेशे भारतीयराजदूतत्वेन गमनेऽधुना श्रीगोविन्दमालवीय उपकुलपतित्वेन कार्यं संचालयति । विश्वविद्यालयः स्वोत्कृष्टकार्यकलापेन नैकविधप्रवृत्तिजातेन समस्तभारतीयविश्वविद्यालयानतिशेते । भविष्यत्कालेऽपि उत्तरोत्तरमुन्नतिपथमारोहेदित्यस्माकं प्रभोरग्रे साञ्जलिः प्रार्थना ।

(उपसम्पादकस्य)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

९--विजयदशमी

यद्यपि परिपूर्णः समस्तोऽपि संवत्सरो विविधैरुत्सवैः, तथापि चत्वार एव प्रधानाः उत्सवाश्चतुर्णामपि वर्णानाम्। तद्यथा ब्राह्मणानां श्रावणी, वैश्यानां दीपमाला, शूद्राणां होलिका, तथा क्षत्रियाणामेषा विजयदशमी। प्रतिवत्सरमुत्सवविशेषोऽयमाश्विनमासस्य सिते पक्षे दशम्यां महता समारोहेण मान्यते भारतीयैः। नगरे नगरे मेला भवन्ति विजयदशम्युत्सवस्य समारोहः।

वर्षर्तुना प्रायो भवन्ति सर्वे नृपादयो यात्रातो निरुद्धाः। तृणजालकैर्जलैश्च पन्थानो जायन्ते लुप्तप्रायाः। अत एव कथितं महाकविना वाल्मीकिना वर्षावर्णने "स्थिता हि यात्रा वसुधाधिपानां प्रवासिनो यान्ति नराः स्वदेशम्।"

अनेन वृष्टेरुत्पातेन सर्वे दुःखिता आसन्, आश्विनशुक्लदशमीपर्यन्तमेते उत्पाता भवन्ति शान्ताः; आकाशो निर्मलो भवति, स्वच्छा जायन्ते पन्थानः, नदी-कूपतडागानां जलं पूर्वावस्थामायाति। अतो यात्रार्थमयं कालः शोभनोऽतीव विजयदायकश्च। विजयेच्छुभिरस्मिन्नेव विजययात्रा विधीयते। चिन्तामणिग्रन्थकर्त्रा त्वस्या विजयदशम्याः कालस्य नामैव "विजय" इति धृतम्।

"आश्विनस्य सिते पक्षे दशम्यां तारकोदये।
स कालो विजयो नाम सर्वकामार्थसाधकः॥"

अर्थात्—अयं कालो विजयकारकः। अस्मिन्नेव विजयेच्छुभिः शत्रुविजयार्थं तथा चान्यकार्यसिद्ध्यर्थं च प्रयाणं कर्तव्यम्। ततश्च कार्ये शत्रौ वा सफलता विजयो वा निश्चित एव। अत एव सीतामाहृत्य लङ्कां समाश्रितवतो रावणस्य विजयार्थं सतीहरणपापस्य दण्डदानाय राघवो-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्मिन्नेव दिवसे विजययात्रां चकार। विजयदशम्या द्वितीयं नामधेयं "दशहरा" इति, अत्र प्रमाणं रावणस्य दश शिरांसि हर्तुं श्रीरामचन्द्रेणास्मिन् दिने प्रयाणं कृतमत एवास्योत्सवस्य "दशहरा" इति नाम बभूव।

तथा च शुम्भ-निशुम्भासुर-भयभ्रान्ते जगति सुरप्रार्थनया अस्मिन्नेव आश्विनशुक्लदशमीदिने प्रादुर्बभूव शुम्भ-निशुम्भमर्दिनी महादुर्गा। अत एव विजयदशम्याः पूर्वं नवरात्रेषु दुर्गापूजनं भवति। अत एवोत्सवोऽयं विजयदायकः, विजयस्मारकश्च मान्यते च आधुनिकैर्महता समारोहेण प्रतिवर्षम्।

न केवलमाधुनिका एव, पूर्वजा अपि महता समारोहेणैनं विजयोत्सवं मानयन्ति स्म, भविष्योत्तरपुराणे श्रीकृष्णो युधिष्ठिरं प्रति विजयदशम्या उत्सवप्रकारमेवं वर्णयति—

"अलङ्कृतो भूषितभृत्यवर्गः परिष्कृतोत्तुङ्गतुरङ्गनागः।
वादित्रनादप्रतिनादिताशः सुमङ्गलाचारपरम्पराशीः॥"

भृत्यवर्गैः सार्धं स्वयमलङ्कृतो नृपो हस्त्यश्वान् समलङ्कृत्य गायन् वादयन् मङ्गलाचारं कुर्यात्। तथा च स्वपुरोहितं पुरस्कृत्य स्वनगरसीमापारे गत्वा तत्र शत्रोः प्रतिकृतिं विधाय तस्या हृदयं बाणैर्विद्धयेत्। पुरोहितो मन्त्रोच्चारणं कुर्यात्। विजयदशम्यामेवं कुर्वन् नृपः कदापि पराजयं न लभते। प्रतीयतेऽनेनायमुत्सवो बहु प्राचीनः। न केवलं प्रजाः, नृपा अपि अस्मिन् विशेषपात्राण्यासन्।

अद्यत्वेऽपि तथैव सर्वत्र भारतेऽयं विजयदशम्या उत्सवो मान्यते। क्षत्रियाः स्वास्त्राणि पूजयन्ति। गृहे गृहे दुर्गापूजनं भवति। स्वराज्ये राजानोऽलङ्कृत्य समलङ्कृते गजे समारुह्य निर्गच्छन्ति। प्रतिनगरं मेला भवन्ति। दूर-दूरस्था अपि जनास्तत्र सम्मिलन्ति। नूतनानि वस्त्राणि परिधाय प्रमुदिता अभिनवरचितासु पण्यवीथिषु भ्रमन्ति, किञ्चित् क्रीणन्ति, किञ्चिद् भक्षयन्ति, केचिद् गायन्ति, नृत्यन्ति, तथान्ये निष्फलैः कोलाहलैरेव हर्षोत्कर्षमाविष्कुर्वन्ति।

Funding by IKS-MoE

BVRSSMV
CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नगराद्वहिः विस्तृतक्षेत्रे कृत्रिमैका लङ्का निर्मीयते। वंशैः कर्गलैः रावण-कुम्भकर्ण-मेघनादादीनां प्रतिकृतयो विरचय्य तत्रावस्थाप्यन्ते। सूर्यास्तसमयेऽखिलो जनसमुदायः प्रतिकृतीरभितो वर्तुलीभूय तिष्ठति। अथ रावणादिवधस्याभिनयो भवति। धृतरामलक्ष्मणवेषौ गृहीतकार्मुकौ द्वौ सुन्दरौ बालकौ तत्र क्षेत्रे समागत्य तेषां कृत्रिमरावणादीनां हृदयं बाणैर्विध्यतः। तदा रावणादयो मृता ज्ञायन्ते, तान् दग्ध्वा "विजयतां श्रीरामचन्द्रः" इति क्रियासमभिहारेण विजयो जोघुष्यते। हसन्तो गायन्तो नृत्यन्तो नरास्ताभ्यां रामलक्ष्मणाभ्यां सह गृहं प्रत्यावर्तन्ते। एवमद्यत्वे प्रतिवर्षं प्रतिनगरमयमुत्सवः समारोहेण सह मान्यते। जातेर्नितरामुपकारं जनयत्ययमुत्सवः। यथा शिक्षाप्रदश्चायम्, पूर्ववीरस्मृतिपूर्वकं वीररसस्य सञ्चारो भवत्यस्मिन् भारतीयानां चेतस्सु, यथेयं भारतभूमीरत्नगर्भा, वसुन्धरा तथा वीरजनन्यपि—इति द्योत्यतेऽनेन। "आचारः प्रथमो धर्मः" विविध-धनैश्वर्यसम्पन्नोऽपि दुराचारी निर्धनेनापि सदाचारिणा हन्यते, यथा रामेण रावणः। अतो रामवदाचरणीयं न तु रावणवत्। तथा च सीतायाः सतीत्वम्, भरत-लक्ष्मणयोर्भ्रातृप्रेम, हनुमतो निष्कारणा प्रभुभक्तिः—इत्यादीन् विविधादर्शान् शिक्षयत्ययं विजयदशम्युत्सवः। तथा रामायणस्यानन्तादर्शपूर्णं इतिहास आबालवृद्धं विजातीयानामपि सुखेन हृदयङ्गमो भवति। एवमुत्सवविशेषोऽयं नानाशिक्षाप्रदो विविधलाभपूर्णो नितरामुपयोगीति।

परमद्यत्वे केषुचित्प्रान्तेषु पशुवधसुरापानादिकाः शास्त्रनिषिद्धाः कुप्रथाः प्रचलिता अस्यां विजयदशम्याम्। याभिरस्या वास्तविकं रूपं विकृतिं गतमिवास्ति। एतासां निरोधपूर्वकं यद्यस्योत्सवस्य समारोहः क्रियेत तदा निश्चयेनोत्सवलक्ष्यं पूरयिष्यति। विजयदशमी चेयं पुनरपि दुष्टदलनं विधाय, विजयञ्चादाय भारतसमक्षमागमिष्यति।

(श्रीप्रकाशचन्द्रशास्त्री)

Funding by IKS-MoE
780

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१०—दीपमाला

को हि भारतीयो न जानाति दीपमालामहोत्सवम् ? भारतवर्षे यः प्रतिवर्षं कार्त्तिककृष्णामावस्यायां महता समारोहेण सहर्षं मान्यते। यत्र तत्र सर्वत्रैव अविरलानि दीपकानि प्रज्वाल्यन्ते, तदैवास्य उत्सवस्य दीपमालेति नाम प्रख्यातिं गतमस्ति।

उत्सवो नूनं पूर्वघटितघटनया सम्बद्धो भवति। अयमपि तथा। श्रूयते—रावणं निहत्य अस्मिन्नेव दिनेऽयोध्यामाजगाम भगवान् श्रीरामचन्द्रः। तथा रामदर्शनपिपासितैरयोध्यावासिभिः प्रमुदितैः परिमार्जिता रथ्या राजमार्गा गृहाश्च। स्थाने स्थाने प्रज्वालितानि दीपकानि। दत्तं विप्रेभ्यो बालेभ्यो याचकेभ्यश्च मिष्टान्नम्। तथा चानेनायमाशयोऽपि द्योत्यते—यत् पाप-पाखण्डरूपं रावणं हत्वा रामरूपो धर्मः समागच्छति यदा, तदा मानुषाणां स्वान्त-स्वरूपाणि दीपकानि प्रज्वलन्ति, तेषां प्रकाशे साधकाः स्वलक्ष्यमार्गं लभन्ते। इदमस्ति दीपमालाया आध्यात्मिकं रूपम्। तथा चास्मिन्नेव दिने वामनरूपमास्थाय भगवता विविधैर्विबुधैः सार्धं वलिना बन्दीकृता लक्ष्मी मोचिता। अत एव लक्ष्मीपूजनं क्रियतेऽस्मिन् दिने, यत् ततो मुक्ता साऽस्माकं गृहे समागच्छेत् न गच्छेदन्यत्र। अस्मिन्नेव दिने जैनमतप्रवर्तकस्य अन्तिमतीर्थङ्करस्य भगवतो महावीरस्यापि निर्वाणं बभूव। तथा चायमेव आर्यसमाजप्रवर्तकस्य स्वामिनो दयानन्दस्य महाप्रयाणदिवसः। यद्यपि नैतदस्माकमुत्सवोत्कर्षो यतो हि महापुरुषवियोगः खेदकरो भवति, परमेतयोरपि महापुरुषयोर्दीपमालया सम्बन्धः, एतदर्थं कृतो निर्देशः।

किञ्च भारतं कृषिप्रधानो देशः। वृष्टेरुत्पन्नऽन्न राशिर्गृहे समागतः। तं दृष्ट्वा प्रफुल्लिताः कृषि-गोरक्ष्य-वाणिज्यकर्माणो वैश्या उत्सवं कुर्वन्ति, तथा च वर्षाकाले निरुद्धं वाणिज्यमस्माद् दिनादेव पुनरारभ्यते। तथा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

च यथा शरत्पूर्णिमा विशिष्टा भवति प्रकाशे सर्वासु निशासु, तथैव कार्त्तिककृष्णामावस्या विशिष्टा भवति तिमिरे। एतदपि दीपमालोत्सवस्य बीजम्। किमपि कारणं स्यादुत्सवोऽयं विशिष्टं महत्त्वं बिभर्ति। विशेषतो वैश्यजात्या अस्य सम्बन्धः।

सम्बद्ध-घटनाभिस्तथा पुराण-सनत्कुमार-संहितादिग्रन्थानामुल्लेखेन स्पष्टं प्रतीयते यदुत्सवोऽयं नितरां पुरातनः। तथा चैकादशशताब्द्यां समागतेन 'अबूरेहन'-नाम्ना विदेशयात्रिणा दीपमालाया उल्लेखः कृतः।

लोका बहुदिनानि पूर्वमेवोत्सवे संलग्ना जायन्ते। धनत्रयोदशी, नरकचतुर्दशी, अप्यस्यैव उत्सवस्य द्वे अङ्गे, त्रिष्वेव दिनेषु कूप-तडाग-मार्ग-शालासु दीपप्रज्वालनं ग्रन्थेषु विहितम्।

प्रथमदिने त्रयोदश्यां नराः पात्राणि क्रीणन्ति। 'धनत्रयोदशी' शब्देन प्रतीयते यदस्मिन् दिने वैश्यानां सुवर्ण-रजतयोरादानप्रदानमभवत् पूर्वम्। अधुना पात्राणां व्यवहारस्तस्यैव विकृतं स्वरूपम्। द्वितीयदिने नरक-चतुर्दशी भवति। भगवता श्रीकृष्णेनास्मिन् दिने नरकासुरो व्यापादितः। अधुनाऽपि लोका मलरूपधरं नरकं गृहान्निस्सारयन्ति। तथा च रात्रौ यमप्रीत्यर्थं दीपदानं कुर्वन्ति।

अमावस्या खल्वस्योत्सवस्य प्रधानो दिवसः। अस्य दिनस्य दर्शनीयं भवति दृश्यम्। सर्वे प्रमुदिता दृश्यन्ते। गृहद्वार-रथ्या-शाला-मार्गाः संशोधिताः क्रियन्ते। नगरस्य कायकल्प इव सम्पन्नो भवति। न केवलं गृहानेव, नरा नार्यश्च स्वात्मानमपि भूषयन्ति विविधैः वस्त्रालङ्कारभूषणैर्गन्धद्रव्यैश्च। अवर्णनीयो भवति बालकानामामोदप्रमोदः। प्रमुदितानि भवन्ति मोदकानि दृष्ट्वा तेषां स्वान्तानि। पण्यवीथयः समलंकृता भवन्ति नानापक्वान्नद्रव्यैः। किं बहुना समग्रं नगरमेव नृत्यतीवोत्सवस्योत्सवे। यदा तु सन्ध्या भवति तदा तु स्वर्गायते खलु मर्त्यलोकः, आमावस्यं निविडं तमस्तिरस्क्रियते प्रतिस्थानमविरलं प्रज्वलिताभिर्दीपमालाभिः। "बलिबन्धनान् मुक्ता श्री समागच्छेदस्माकं गृहान्" एतदर्थं प्रतिगृहं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लक्ष्मीपूजनं प्रार्थना च क्रियते। केषुचित्प्रान्तेषु गोपूजनमपि विधीयते। परस्परं मिष्टान्नस्यादानप्रदानं भवति। विप्रेभ्यो बालकेभ्यो याचकेभ्यश्च पक्वान्नं वण्ड्यते। स्तोत्रपाठो रात्रिजागरणञ्च क्रियते। व्यापारिणो नूतनामायव्ययवाहिकामस्मिन्नेव दिने समारभन्ते। मन्त्रसाधकानां तान्त्रिकाणामप्ययमेव प्रधानो दिवसः। तेऽपि मन्त्रतन्त्रसाधना-परा अभिनवां सृष्टिं रचयन्तो दृश्यन्ते। इत्थं विविधप्रकारैरयमुत्सवो मान्यते, न केवलं हर्ष एव; विशिष्टा उपकारा अपि सन्त्यस्योत्सवस्य। स्मारयति रामायणस्य विविधादर्शान्। अभिनवां करोति श्रीरामस्य स्मृतिम्। यथा लोकानां दुःखखेदरूपो मलोऽपनीतो हर्षेण दीपमालया, तथा वर्षपर्यन्तमेकत्रीभूतं गृहरथ्या-मार्गाणां कर्कट–कूटमपि (कूडा–कर्कट) दूरीकृतमनया दीपमालया। वर्षर्तावुद्भूता विविधरोगाणां कीटाणवो मशकादयश्च विनाशिता निजया स्वच्छतया। तथा च तैलदीपगन्धेनाप्यायितः पवनः पावनो जातः। एवं "यत्र रामः समागच्छति तत्राज्ञानजं तमो नश्यति, प्रकाशो जायते, तथा च स्वच्छतायां लक्ष्मीः प्रतिवसति। यत्र स्वच्छता तत्र श्रीरामस्य निवासस्तत्रैव लक्ष्मीनिवासः" इमं पाठं प्रतिवर्षं पाठयति दीपमाला। मिष्टान्नस्य आदानप्रदानेनैकतायाः प्रचारो भवति, वर्धते पारस्परिकः स्नेहः। तथा व्यापारिणो गतवर्षस्य आय-व्ययविभागं कृत्वा नूतनं वाणिज्यमारभन्ते। एवं सन्ति विविधा लाभा अस्या दीपमालायाः।

"द्यूतक्रीडा" नामास्ति महती कुप्रथाऽस्मिन्नुत्सवे। एतदति निन्द्यं कर्म। नास्ति कुत्रापि विधानमस्याः। द्यूतक्रीडया महानपकारो भवति देशस्य। अस्मिन्नुत्सवे एव बहवो मनुष्या द्यूतव्यसनिनो जायन्ते। सर्वस्वं द्यूते विनाशयन्ति। कलङ्कोऽयमेतदुत्सवस्य। अतोऽस्य निराकरणं कृत्वा रामायणकथाकीर्तनं कुर्वद्भिर्दीपमालायाः समारोहः कर्तव्यो येन यथार्थो लाभः सम्पद्येत।

(प्रकाशचन्द्रशास्त्री)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

११--ग्रामोत्सवः

येन केनाप्यपदेशेन प्रमुदितमनसां ग्रामीणानां क्वचित्स्थाने सम्पातो ग्रामोत्सवो भवति । कदाचित्कस्यचित् संग्रामप्रवीणस्य वीरस्य यशः कीर्तनाय, कदाचिद् ग्रामाधिदेवताया गुणानुवर्णनाय, कदाचिद् लौकिकस्य कस्यचित् साधोर्दर्शनलाभाय, कदाचिद् धर्माय देशाय वा त्यक्तजीवनस्य कस्यचित्पुरुषविशेषस्य श्रद्धया अर्चनाय तच्चरितश्रवणाय वा लोका एकत्रीभवन्ति । तं परमानन्दावसरमेनमुत्कण्ठया प्रतीक्षन्ते । यथा यथा उत्सवः समीपमायाति तथा तथा तेषां शिशूनां विशेषत औत्सुक्यं वर्धत उत्तरोत्तरम् ।

उत्सवदिने प्रातरेवोत्थायाऽऽवश्यकमाह्निकं कृत्वा उज्ज्वलवेषं परिधाय विविधवस्तूनि क्रेतुमर्थराशिं गृहीत्वा स्त्रीभिः साकं पुरुषा मोदमानाः गृहेभ्यो निष्क्रामन्त उच्चावैर्ग्राम्यगीतैर्हृदयोल्लासं प्रकटयन्ति । उत्सवभुवं प्राप्तास्ते यथेष्टं विचरन्ति, स्निग्धैर्वयस्यैः साकं विस्रब्धमालपन्ति, हास्यवचनानि व्याहरन्ति, प्रणयसूचकानीङ्गितानि च कुर्वन्ति, स्वयंकृता गीतिका गायन्ति, हर्षोन्मादपूर्णास्ते समुद्धतं च समाचरन्ति ।

उत्सवभुवि यत्र तत्र क्रमविशेषं विनैव नानापण्यानामापणानां स्थितिर्भवति । तत्रापूपिका मौदकिकाश्च अपूपान् मोदकान् अन्यानि च रसमयानि मिष्टान्नानि सम्पाद्य तेषां प्रदर्शनपुरस्सरं यात्रिकान् प्रलोभयन्ति, आकर्षन्ति च प्रचुरं जननिवहम् । इत्थं धनौघमप्यर्जन्ति । येऽपि विपणिनः खलु लवणमयानि चणकचूर्णादीनि खाद्यानि विक्रीणते तेषां पार्श्वेऽपि वहवो जनाः समागच्छन्ति क्रेतुमिच्छया । इत्थं मेलके सर्वत्र चिन्ताशून्यानां ग्राम्याणां केवलं खादतमोदताऽश्नीतपिबता चैव प्रवर्तते ।

प्रियतर-पदार्थ-दिदृक्षवः क्रेतुमिच्छुकाश्च जनाः क्रीडनकविक्रेतॄणां रुच्यवस्तुविक्रेतॄणाञ्च पण्यवीथिकासु अपि महान् सङ्घातो दृश्यते । अह-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

महर्घ्यपूर्विकया च ते क्रीणन्ति तान् पदार्थान् न च तेषामुपयोगमनुपयोगं मात्रयापि विचारयन्ति।

अत्र मेलके बालमनोविनोदाय प्रेङ्खणानि मण्डलपरिवर्तीनि चानेकत्र संस्थाप्यन्ते, एतेषु पौनःपुन्येन समारुह्यापि शिशवो न तृप्तिमुपयान्ति। क्वचिदैन्द्रजालिकः समीपस्थितानां प्रेक्षकाणां कुतूहलं जनयति। तत्र प्रबुद्धा अपि विमुग्धा भवन्ति, किमुताप्रबुद्धा अर्भकाः। क्वचिदाहितुण्डिक आश्चर्यंकरीः खेलाः प्रदर्श्य वृत्तिमर्जति। क्वचित्कूटवैद्या विविधवीर्या वनौषधीः समुद्घुष्य स्वान् वैद्यान् प्रख्यापयन्तः कियतोऽप्यातुरानभिमुखीकुर्वन्ति बहुधनं च तान् मुष्णन्ति।

क्वचिद् ज्योतिर्विदाभासा मञ्जुलेङ्गितेन अतिमधुरेण चालापेन यात्रिणः स्त्रीकामुकान् वृद्धसमूहं च विशेषतः समाश्वासयन्ति। अपरत्र लब्धस्वल्पसामुद्रिकज्ञानः कश्चिद् भविष्यत्पृच्छापरवशान् लोकानाकारयति। अयमपि प्रतारणे कुशलः। अयं किमप्यजानानोऽपि हस्तरेखां भूयो भूयः परीक्ष्येव पुरुषशीलस्य स्त्रीस्वभावस्य च सम्भाव्याः प्रायोभवाः काश्चन वार्ताः कीर्तयित्वा समृद्धिं व्यृद्धिं वा प्रष्टुराकारतोऽनुमाय गृहकलहादिकं निपुणं विचार्य कथयति। इत्थमयमपि पुष्कलं धनमर्जयति।

अन्यत्र व्यसनिनः कांश्चिद् ग्रामीणान् प्रतारयितुं द्यूतमारचयन्ति द्यूतकारकाः। तत्र अक्षैर्दीव्यन्तो मूर्खा ग्राम्याः प्रयत्नैरर्जितं चिरसञ्चितं स्वधनं क्षणेनैव विनाशयन्ति। ततोऽधन्या वयम्, करुणाशून्यः खल्वीश्वरः, दयाहीनो विधिरित्येवमाक्रोशन्ति।

अपरे पुनः सुरापायिन आपानमुपेत्य मनोहत्य पीत्वा सुरां मत्ताः क्षीबाः, स्खलद्गतयश्च भूत्वा कथं कथमपि ग्रामाय प्रयान्ति, वाच्याश्च भवन्ति ग्रामवृद्धानाम्।

अस्तं यियासति भगवति भास्करे समाप्तो भवत्युत्सवोऽपि। प्रहृष्टवदना लोका गृहान् प्रति त्वरया गच्छन्ति। गृहगताश्च स्वानुभवानुसारं मिथः सम्भाषन्ते प्रमोदन्ते च।

(प्रस्तावतरङ्गिणीतः संक्षिप्य सरलीकृत्य च संगृहीतः)

—:०:—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चरितात्मका निबन्धाः—

१--मर्यादापुरुषोत्तमो भगवान् श्रीरामचन्द्रः

अद्य समाचारपत्रेषु, विविधदलमन्तव्येषु देशनेतृप्रवचनेषु च 'रामराज्यमस्मल्लक्ष्यम्' 'रामराज्यमस्माभिः स्थापयिष्यते' इत्यादिवाक्यजातमाकर्ण्यते। राष्ट्रपिता महात्मगान्धिराङ्गलदेशीयान् देशान्निस्सार्य रामराज्यस्थापनमेव स्वचरमलक्ष्यमकरोत्। रामराज्यं सुवर्णराज्यं, कल्याणराज्यं, सर्वविधाभावहीनञ्च राज्यमिति नार्थान्तरम्। सर्वेषामेव विचारकाणां राजनीतिविदां ध्येयं रामराज्यस्थापनमेव समवर्तत पुरापि। किन्तद् रामराज्यं यत् क्षणायापि अस्मद् दृष्टि मनो बुद्धिञ्च न विजहाति ?

साहित्य-रसास्वादन-पराणां सहृदयानां मतमिदं यत्साहित्याध्ययनेन पुरुषार्थचतुष्टयं समुपलभ्यते, तच्च 'रामवत्प्रवर्तितव्यं न तु रावणवद्' इत्युपदेशप्राप्तिद्वारा। किन्तद्रामचरितं यदनुकरणेन पुरुषार्थचतुष्टयं हस्तगतं भवति ?

समस्तेऽपि भारते प्रतिनगरं प्रतिग्रामञ्च राममन्दिराणि दृष्टिपथमुपयान्ति। प्रतिगृहं रामायणग्रन्थः समुपलभ्यते हिन्द्यां संस्कृते वा। यदापि द्वौ पुरुषौ मिलतः 'श्रीरामो जयति' इति परस्परं संभावनपुरस्सरं कथयतः। सर्वत्रापि श्रीरामसम्बन्धीनि तीर्थानि निभाल्यन्ते। यदापि वयं श्वसिमस्तदापि प्रतिश्वासं रामनामैव उच्चार्यते रसनया। प्रत्यापणं प्रतिमन्दिरं प्रतिरथ्यं प्रतिचतुष्पथञ्च रामचरिताभिज्ञा विद्वांसो रामकथाः कथयन्तः श्रावयन्ति श्रोतृवृन्दाय। नामकरणसंस्कारे भारताभिजनानां नामसु प्राय आदौ अन्ते वा रामनाम-सम्बन्धीनि अक्षराणि नियोज्यन्तेऽवश्यमेव। इत्थं रामनाम, रामचरितञ्च भारतभुवः प्रतिकणं भारतीयानाञ्च प्रतिरोम व्याप्तमस्ति। राम-कृष्णौ द्वावेव परमात्मनोऽवतारौ

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यौ हृदयमधिकृत्य समस्तमपि भारतीयानां चेष्टितजातमद्यापि भौतिकता-ग्रस्ते जगति तिष्ठतः। बालोऽपि रामचरितस्यानभिज्ञो न निभाल्यते देशेऽस्मिन्। अद्य मानवतावादस्य प्राधान्यम्, परमृते रामात् तदुत्तमं निदर्शनं नान्यत् संभवितुमर्हति। मर्यादापुरुषोत्तमोऽयम्। स्वल्पापि वार्ता तच्चरितस्य समुपदिशत्येव किञ्चित्, प्रदर्शयत्येव कमपि अत्युच्चादर्शम्। निर्दिश्यत एव कोऽपि मार्गो येन पुरुषार्थचतुष्टयं प्राप्तुं शक्यते।

पुरा शतरूपया सह तपश्चरता मनुना भगवतः श्रीविष्णोर्मनोरग्रिमे भवे पुत्रभावग्रहणस्य वरो लब्ध इति पौराणिकी श्रुतिः। ऐक्ष्वाकं कुलमलङ्कर्तुर्दशरथस्य पट्टराज्ञीत्रयादेकोऽपि पुत्रो नासीत्समुत्पन्नः। प्रौढतामुपगतेन तेन महर्षिश्रृङ्गिप्रसादात् पुत्रचतुष्टयं सम्प्राप्तम्। स्वकमनीयक्रीडाभिः पित्रोः पौरजानपदानाञ्चानन्दं वर्धयद्भिस्तैः सुरासुरमनुजवन्दितपाद-पयोजाद् वशिष्ठात्स्वकुलगुरोरखिला अपि विद्याः समाधिगताः। विश्वामित्रानुरोधात् तन्मखस्य निष्प्रत्यूहपरिसमाप्तये सुबाहु–ताडिकादयो विघ्नकरा राक्षसाः सहानुजेन तेन यमालयं प्रेषिताः। अनन्तरञ्चाहल्यां पतिशापात्प्रस्तरभूतामतारयत्। श्रीरामः कौशिकेन सह सीतास्वयम्बरं द्रष्टुं मिथिलामुपगतः। तत्र च पश्यतामेवासफलतां गतानां समस्तानां भूपतीनां चापभङ्गं विधाय परशुरामस्य गुरुधनुर्भङ्गं निशम्य कुपितस्य मानमर्दनं सम्पाद्य भगवती जानकी परिणीता गृहञ्च प्रत्यावर्तत सहानुजः।

सर्वविधमुपयुक्तं ज्ञात्वा स्ववार्धक्यञ्च निरीक्षमाणो दशरथो यदा तस्य यौवराज्यपदे अभिषेकं कर्तुमैच्छत् तदैव मन्थरामन्त्रणया भरतजननी कैकेयी चिरेण संरक्षितं वरद्वयं ययाचे राज्ञो दशरथात्। किं-कर्तव्यविमूढं पितरं संबोध्य प्रणम्य परित्यज्य च परममनस्वी श्रीरामः पितृभक्त्या उत्कर्षं प्रदर्शयन् सह सीतया लक्ष्मणेन च वनं प्रति प्रस्थितवान्। पौरैरनुस्त्रियमाणमात्मानवलोक्य प्रत्यावर्तनाय सविनयमनुरुरोध तान्। अनन्तरं तर्या पारेगङ्गं भरद्वाजाश्रमे समागत्य तन्निर्देशेन दण्डकारण्ये पञ्चवट्यां निवसितुं प्राविशत्। तत्रात्रिसपर्यां कृत्वा विराधं निहत्य तन्निवर्तनाय समागतस्य भरतस्य सम्भावनं विरचय्य पादुकाद्वयं तस्मै समार्पयत्। मुनिजनहर्ष-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कारिणा तेन तत्रावैधमाचरन्ती शूर्पणखा छिन्ननासिका कृता। ततस्तया प्रयोजितानां चतुर्दशसहस्रसैन्यसमेतानां खर-दूषणत्रिशरसां हननं विधाय अगस्त्याश्रमोऽपि सनाथितस्तेन।

गोदावरीतीरे स्वपर्णकुटीरे भ्रात्रा जायया च सह सुखं समयं यापयन्तं रामं मारीचसाहाय्येन दशाननो दूरमपसार्य सीतामपहृत्य रुदन्तीं बलादुत्थाप्य विकटप्रतिरोधं कुर्वन्तं तत्पापकर्मणि जटायुषं निहत्य तां लङ्कां प्रति नीतवान्। ततो जानकीवियोगार्तो विलपन् श्रीरामो वालिहननेन सुग्रीवमैत्रीं सम्पाद्य हनूमन्तं सीतापर्यन्वेषणाय दक्षिणदिशि प्रेषितवान्। तेन लङ्कापुर्यां गत्वा सीतायै रामाभिज्ञानं समर्प्य प्रत्यावर्तनसमये स्वात्युत्कटसामर्थ्यं प्रदर्शयितुं लङ्कापि भस्मसात्कृता। अनन्तरं ऋक्ष-वानर-सैन्येन सागरोपरि सेतुं निर्म्माय भगवान् श्रीरामो लङ्कायां जगाम। तत्र एकदा लक्ष्मणमूर्च्छादुःखमनुभूय सपुत्रपौत्रपरिजनो रावणो यमपुरीपथिकः कृतः। अनलप्रवेशशुद्धां सीतां स्वीकृत्य स पुष्पकेण विमानेन व्योममार्गेण तदवलोकनसञ्जाततीव्रोत्कण्ठां चिरतृषितां चातकीमिव प्रतीक्षमाणामयोध्यां तत्र स्वपदार्पणेन समतोषयत्। अनन्तरं गुरुजनानुज्ञातः सिंहासनमलङ्कुर्वन् धर्मराज्यं प्रवर्तितवान् निखिलेऽपि जम्बूद्वीपे।

अत्रान्तर एव रावणगृहनिवासं निमित्तीकृत्य प्रसृते सीताविषयके जनापवादे श्रीरामः प्रजाहितं तदनुरञ्जनञ्च प्राणप्रियायाः प्राणेभ्यश्चापि प्रियं मन्वानः सीतां गर्भिणीमपि निर्जने वने तत्याज। तत्र गङ्गायां प्रसूतपुत्रा सा वाल्मीकेराश्रमे दुर्भाग्यदिनान्ययापयत्। ततः सीताप्रतिकृत्यैव राजसूययज्ञानुष्ठाने निरतेन रामेण यज्ञीयाश्वः परित्यक्तः यो कुशलवाभ्यां गृहीतः। येन तयो रामसैन्येन तुमुलं युद्धमभवत्। अनन्तरं रामेण सञ्जातस्तयोः परिचयः। रामोऽपि बहूनि वर्षाणि यावत् राज्यसुखमनुभूय प्रजासु धर्मसञ्चारं विधाय सत्ययुगञ्च प्रवर्त्य लोकमिमं परित्यक्तवान्।

तुच्छजीवस्य मानवत्वविधायकाः सर्वेऽपि गुणा भगवति श्रीरामे पुञ्जीभूताः सन्तः तत्र विग्रहिणो बभूवुः। सर्वासु अवस्थासु तस्मिन् समभावो निर्द्वन्द्वता चासीत्। चित्रितमपि—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"आहूतस्याभिषेकाय विसृष्टस्य वनाय च।
न मयाऽवलोकितस्तत्र स्वल्पोऽप्याकारविभ्रमः ॥"

पित्रोरन्तःसुखाय तेन राज्यमपि परित्यक्तञ्च। प्रपीडितजनत्राणाय स बाल्येऽपि सन्नद्धोऽतिष्ठत्। शरणागतवात्सल्यं तस्य रामायणे प्रतिपदं समवलोक्यते। साधूनां त्राणाय अधार्मिकाणामत्याचारपराणां विनाशाय तच्चापः प्रतिक्षणं सज्योऽभूत्। रावणं बालिनञ्च निहत्य तेन नारीमर्यादा समभिरक्षिता। भक्तवत्सलताऽपि तस्य प्रख्याता। प्रजाजनानुरञ्जनाय तु तेन स्वप्राणैरपि प्रियतमा सीतानिर्जने वने मृल्लोष्ठवद् निपातिता। स्वकर्तव्यात् च्युतः शूद्रको यमालयं प्रेषितस्तेन। धन-धान्य-परिपूर्णमासीत्तद्राज्यम्। पितृ-भ्रातृ-जाया-पुत्र-प्रजेति सर्वम्प्रति तेन स्वकर्तव्यं सुष्ठुतया परिपालितम्। अत एव स मर्यादापुरुषोत्तमः। अत एवाद्यापि सर्वविध-सुखसम्पन्नराजस्य प्रतीकं वाचकञ्च 'रामराज्यं' जातम्। अभिवाञ्छ्यते भौतिकता–प्रधानेऽपि युगेऽस्मिन् रामराज्यम्। अत एव सर्वैरपि रामविजय एवाकाङ्क्ष्यते। रामवत्प्रवर्तनेनैव पुरुषार्थचतुष्टयस्य प्राप्तिः करिष्यतेऽस्माभिः।

(उपसम्पादकस्य)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

२. लीलापुरुषोत्तमो भगवान् श्रीकृष्णचन्द्रः

द्वापरान्ते कलेरादौ युगसन्धौ महाभये ।
राजन्यवर्गे कंसादो राक्षसं भावमाश्रिते ॥ १ ॥
धर्मेषु विहतेष्वत्र पाखण्डेषूद्गतेषु च ।
साधूषु पीड्यमानेषु पूज्यपूजा-व्यतिक्रमे ॥ २ ॥
व्रजभूमौ शौरसेने देशे परमपावने ।
मथुरायां महापुर्यां देवकीवसुदेवयोः ॥ ३ ॥
कारायां कंसनृपते रुद्धयोर्यदुवर्ययोः ।
भाद्रे मासि कृष्णपक्षे रोहिण्यां बुधवासरे ॥ ४ ॥
अष्टम्यामर्धरात्रे च प्रादुर्भूतो महाप्रभुः ।
भगवान् कृष्णचन्द्रोऽयं श्रीलीलापुरुषोत्तमः ॥ ५ ॥
दिशः प्रसेदुर्गगनं निर्मलोडुगणोदयम् ।
ववुर्वाताः सुखस्पर्शाः प्रसन्नाश्च जलाशयाः ॥ ६ ॥
आनन्दः साधुमनसि समजायत सर्वतः ।
सर्वापि प्रकृतिः पूर्णा प्रसन्ना समपद्यत ॥ ७ ॥
भीतौ स्वौ पितरौ वीक्ष्य भगवान् मधुसूदनः ।
मेघगम्भीरया वाचा माधुर्यपरिपूर्णया ॥ ८ ॥
प्रोवाच 'मा भयं वो भूत् कंसादीन् दुष्टराक्षसान् ।
हनिष्यामि, करिष्यामि सुखिनः सर्वसज्जनान् ॥ ९ ॥
तात ! मां गोकुले शीघ्रं नय त्वं नन्दवेश्मनि ।
उत्पन्नामधुनैवात्र योगमायां समानय' ॥ १० ॥
आदिश्य भगवानेवमभवत् प्राकृतः शिशुः ।
वसुदेवस्तमादाय मुक्त-सर्वात्मबन्धनः ॥ ११ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रापयामास निर्विघ्नं गोकुले नन्दमन्दिरे।
समादाय सुतां तस्य कारायां पुनरागतः॥ १२॥
ज्ञातजन्माथ कंसोऽसौ व्योमभाषाविमोहितः।
सुतामादाय देवक्या रुदत्यास्तु स्वसुर्बलात्॥ १३॥
निजघान नृशंसोऽयं सा गता दिव्यदृश्यत।
देवीभूता कंसमाह "क्वचिज्जातस्तवान्तकृत्"॥ १४॥
ततो यशोदा बुबुधे जातमानन्ददं सुतम्।
नन्द-पुत्र-समाचारः पप्रथे गोकुले तदा॥ १५॥
जगुर्गोप्यो भृशं प्रीता वस्त्राभरण-भूषिताः।
नन्दस्य गृहमागत्य यशोदां वर्धयन्ति च॥ १६॥

दिष्ट्या त्वं वर्धसे देवि! दिष्ट्या जातस्तवात्मजः।
दिष्ट्या नन्दस्य वंशोऽयं जातः सर्वसमुन्नतः॥ १७॥
पुत्रजन्मोत्सवानन्द–प्रफुल्ल–हृदयस्तदा।
नन्दोऽदात् कोटिशो धेनूर्विप्रेभ्यः साध्वलङ्कृताः॥ १८॥
पुत्रजन्मोत्सवे तस्मिन् नन्दो गोपगवां पतिः।
अन्येभ्योऽपि यथाकामं प्रददौ सर्वसम्पदः॥ १९॥
श्रुत्वा कन्यावचो व्यग्रः कंसो राजा व्यचिन्तयत्।
देवक्या अष्टमो गर्भो न स्त्री भवितुमर्हति॥ २०॥
दुर्मन्त्रिभिर्मन्त्रयित्वा राक्षसान् बालघातने।
न्ययोजयदात्मशत्रोः कृष्णस्य वधकाङ्क्षया॥ २१॥
पूतना प्रेषिता तेन राक्षसी बालघातिनी।
कृष्णेन शिशुना तस्याः पीतं स्तन्यं सहासुहाभिः॥ २२॥

व्योमोऽपि निहतस्तेन वात्यारूपधरोऽसुरः।
पातितः शकटश्चापि दैत्यः शकटमाश्रितः॥ २३॥
विविधा बालकक्रीडाः सर्वसत्त्वमनोहराः।
कुर्वन् स ववृधे कृष्णः शुक्लपक्ष इवोडुपः॥ २४॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हैयङ्गवीनस्तैन्ये प्राङ् मात्रा बद्ध उलूखले ।
उलूखलं निकर्षन् स यमलार्जुनमध्यतः ॥ २५ ॥
निष्क्रामन् कृतवान् सद्य उद्धारं यक्षपुत्रयोः ।
विनिष्क्रामन् उद्धार कुबेरस्यात्मजावुभौ ॥ २६ ॥
नलकूबर–मणिग्रीवौ शापाद् वृक्षत्वमागतौ ।
प्रत्यहं यमुनाकूले वत्सान् धेनूरचारयत् ॥ २७ ॥

वने तत्र मुदा युक्तः श्रीहरिर्बालरूप-धृक् ।
अकरोद् विविधाः क्रीडा वाह्यवाहादिलक्षणाः ॥ २८ ॥
श्रीनन्द-नन्दनं वीक्ष्य वंशीवादनतत्परम् ।
मनांस्यासन् प्रसन्नानि गोपी-गोप-गवां तदा ॥ २९ ॥
बकासुरोऽघासुरश्च हतौ राक्षसपुङ्गवौ ।
वत्सासुरो धेनुकश्च हतो वा घातितोऽथवा ॥ ३० ॥

क्रीडा–कन्दुकव्याजेन कालियो निरवास्यत ।
निर्भया च कृता तेन कालिन्दी निर्विषोदका ॥ ३१ ॥
कार्यव्यग्रासु गोपीषु क्रीडा-मनुजबालकः ।
चोरयित्वाऽपि निभृतं सस्वदे नवनीतकम् ॥ ३२ ॥
गोपीनां तु मनस्तत्र कृष्णे मदनमोहने ।
प्रेमासक्तमभूद् येन तन्निष्ठ-हृदयाशयाः ॥ ३३ ॥
गोप्यः सदा तदासक्तास्तद्दर्शनमहोत्सुकाः ।
निन्युर्दिनानि दुःखेन गोचारणगते हरौ ॥ ३४ ॥

स साक्षी सर्वभूतानां सर्वकामवरप्रदः ।
विबुध्य मनसो भावं तासां रासं चकार ह ॥ ३५ ॥
वंशीनादैः समाहूय ब्रह्मरात्रे महाप्रभुः ।
अखण्डसच्चिदानन्द 'आत्मारामोऽप्यरीरमत्' ॥ ३६ ॥
गोपा गोप्यश्च गावोऽपि वत्सा वत्सतरास्तथा ।
श्रीकृष्णे सच्चिदानन्दे वत्सलाः सर्वदाऽभवन् ॥ ३७ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कंसेन प्रहिता घोराः केश्यरिष्टादयोऽसुराः ।
निहताः कृष्णचन्द्रेण कंसषड्यन्त्रकारिणः ॥ ३८ ॥
अन्तिमः षड्यन्त्रोऽयं भोजराजेन चिन्तितः ।
आहूय मल्लयुद्धेन घातये मधुसूदनम् ॥ ३९ ॥
अक्रूरः प्रेषितस्तेन मथुरां प्रतिनीतवान् ।
कृष्णं सरामगोपालं सह नन्दादिभिर्हरिम् ॥ ४० ॥
गोप्यस्तद्विरहव्यग्रा नेत्राभ्यां मुमुचुः शुचः ।
विवशा वारणे तास्तु निवृत्ताः स्वगृहान् प्रति ॥ ४१ ॥
कृष्णः कुवलयापीडं रङ्गद्वारि स्थितं गजम् ।
निहत्य सह रामेण प्रविवेश सुहृद्वृतः ॥ ४२ ॥
चाणूरो मुष्टिकश्चापि शलस्तोशलकस्तथा ।
मल्लाधिपतयो युद्धे निहता नन्दसूनुना ॥ ३४ ॥
शेषाः प्रदुद्रुवुर्मल्ला भयभीता यथादिशम् ।
गोपालाः कृष्णपक्षीया जयघोषं वितेनिरे ॥ ४४ ॥
अन्तिमे षड्यन्त्रेऽपि व्यर्थीभूते व्यघोषयत् ।
कंसो दुष्टमतिर्मन्दो "निस्सारयत गोपकान् ॥ ४५ ॥
कृष्णं बध्नीत, रामं च नन्दं तत्पितरं यथा" ।
एवं प्रलापिनं कंसं तरसाऽऽप्लुत्य मञ्चके ॥ ४६ ॥
कृष्णो जग्राह केशेषु पातयामास भूपरि ।
भूपृष्ठे पोथयामास भूभारं संजहार च ॥ ४७ ॥
उद्दधार स तान् सर्वान् यादवान् दुःखकर्षितान् ।
ये पुरा कंससंविग्ना विदेशेषु पलायिताः ॥ ४८ ॥
कारातः पितरौ देवो मोचयामास यत्नवान् ।
सान्दीपनेर्गुरोः सर्वा विद्याः समधिजग्मिवान् ॥ ४९ ॥
जरासन्धविरोधस्य मिषेण भगवान् हरिः ।
भूभारं क्षपयामास दुष्टक्षत्रियजं पुनः ॥ ५० ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अष्टादशतमे युद्धे कालाख्यं यवनेश्वरम् ।
युक्त्याऽथ घातयामास मुचुकुन्ददृशैव तु ॥ ५१ ॥
जरासन्धस्य पुरतः हरिश्चक्रे पलायनम् ।
नाऽयं वध्यो मया शत्रुरिति सञ्चिन्त्य मानसे ॥ ५२ ॥

आरचय्योदधौ दुर्गं द्वारकां दिव्यदर्शनाम् ।
पुरीमावास्य तत्रैव यादवान् समनाययत् ॥ ५३ ॥
यादवानां कृतो राजा कंसस्य जनकस्तु सः ।
उग्रसेनो महाबुद्धिः स्वयं तत्सेवकोऽभवत् ॥ ५४ ॥

आयुषः प्रथमं भागं व्यतिगम्यैवमात्मनः ।
अपरं भागमाविष्टः परमं महिमान्वितम् ॥ ५५ ॥
रुक्मिणीं भीष्मकसुतामुपयेमे महाप्रभुः ।
राक्षसेन विधानेन श्रीलीलापुरुषोत्तमः ॥ ५६ ॥

सप्तान्याः सत्यभामाद्याः सुन्दरीः परिणीतवान् ।
अष्टावेता हि कृष्णस्य महिष्यो मुख्यतां गताः ॥ ५७ ॥
भौमासुरमथाहत्य राजकन्या विमोच्य सः ।
स्त्रीः षोडशसाहस्रमुपयेमे शताधिकम् ॥ ५८ ॥
एवं महागृहस्थोऽयं पुत्रपौत्रादिमान् प्रभुः ।
द्वारकामावसन् कृष्णो यदुराजो व्यराजत ॥ ५९ ॥
राज्ञो युधिष्ठिरस्याथ राजसूयमहोत्सवे ।
साहाय्यं कृतवान् पूर्णं पार्थसख्य मनुव्रतः ॥ ६० ॥

ब्राह्मणं वेशमास्थाय मल्लयुद्धेऽरिसूदनः ।
भीमेन बलिना तत्र जरासन्धमजीघतत् ॥ ६१ ॥
अमूमुचद् राजसङ्घं सहदेवेन सादरम् ।
बन्दीकृतं तु कारायां मागधेन बलीयसा ॥ ६२ ॥
यज्ञे यौधिष्ठिरे तस्मिन् मुख्यमासनमास्थितः ।
लेभेऽग्रपूजां सर्वेषु राजन्येषु महर्षिषु ॥ ६३ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यज्ञेऽत्र सेवाकार्येषु व्यापृतोऽयं महात्मनाम् ।
विनीतं भावमापन्नोऽकार्षीत्पादावनेजनम् ।। ६४ ।।
नामृष्यच् छिशुपालोऽस्य पूर्वपूजामसूयकः ।
अवाच्यं भाषमाणोऽसौ चक्रेण विनिपातितः ।। ६५ ।।

कृष्णोऽयं भारते नेता निर्भीकः सत्यपक्षगः ।
राजनीतौ राष्ट्रनीतौ क्रान्तिकारी महानभूत् ।। ६६ ।।
धर्मस्य राष्ट्रवर्गस्य रक्षिता पालकस्तथा ।
अध्यात्मविद्या-मर्मज्ञो भगवान् भक्तवत्सलः ।। ६७ ।।

धर्मपक्षाश्रिता आसन् पाण्डवा भगवत्प्रियाः ।
अधर्मं पक्षमाश्रित्य कौरवास्तानपीडयन् ।। ६८ ।।
दुर्योधनादिभिर्दुष्टैः पीडिता दुःखिता भृशम् ।
द्यूते पराजिताः कूटैर्वनवासं च लम्भिताः ।। ६९ ।।
तेषां विपत्तावेतस्यां हरिरेव सहायकः ।
बभूव नान्यः सम्बन्धी 'कृशे कस्यास्ति सौहृदम्' ।। ७० ।।
अज्ञातवासकालं च व्यतिगम्य समागताः ।
भागं स्वं प्राप्तुमाहुस्ते नाऽदाद् दुर्योधनो यदा ।। ७१ ।।

सन्धिदूतस्तदा भूत्वा कौरवानगमद्धरिः ।
प्रोवाच न्याय्यवचनं विग्रहं शमयन्नसौ ।। ७२ ।।
'युष्माकं भ्रातर इमे पाण्डवास्तुल्यभागिनः ।
अल्पीयसापि भागेन तोषणीया इमेऽपि वः ।। ७३ ।।
सर्वं तिष्ठतु युष्माकं दीयतां ग्रामपञ्चकम् ।
एतावतैव सन्तुष्टाः स्थास्यन्ति खलु पाण्डवाः' ।। ७४ ।।

श्रुत्वापि वचनं न्याय्यं भवितव्यविमोहितः ।
दुर्योधनो व्याजहार सर्वनीतिविदं हरिम् ।। ७५ ।।
नास्ति भागस्तु राज्येऽस्मिन् पाण्डवानां मनागपि ।
किं ग्रामपञ्चकं ब्रूषे दातुं तेषां सहायकृत् ।। ७६ ।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्यर्थः श्रमोऽयं भवतः सन्ध्यर्थः परिगण्यताम् ।
"सूच्यग्रं नैव दास्यामि विना युद्धेन केशव" ।। ७७ ।।
सर्वोपायेषु शान्तेस्तु व्यर्थीभूतेषु भारते ।
महाभारतयुद्धस्य दध्वने रणदुन्दुभिः ।। ७८ ।।
स्वकीयं यादवं सैन्यं कौरवेभ्यो ददौ हरिः ।
"स्वयं च पाण्डुपुत्राणां धर्म्यं पक्षमुपाश्रितः" ।। ७९ ।।
'नाऽहं शस्त्रं ग्रहीष्यामि' प्रतिज्ञाय तदा हरिः ।
तौत्र-वेत्रधरो हस्ते भगवान् भक्तवत्सलः ।। ८० ।।
रश्मीन् जग्राह वाहानामर्जुनस्यास सारथिः ।
यद् दृष्ट्वा सञ्जयः प्राह गीतान्ते सारमादिशन् ।। ८१ ।।
'यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम' ।। ८२ ।।
श्रीकृष्णकृपया लब्धो विजयः पाण्डवै रणे ।
निर्बलैर्निस्सहायैश्च विहीनैः साधनैरपि ।। ८३ ।।
निस्सहायसहायोऽसौ निष्किञ्चन-जनप्रियः ।
निर्बलानां बलं कृष्णः पतितानाञ्च पावनः ।। ८४ ।।
निर्बला निस्सहायाश्च रक्षिताः पालितास्तथा ।
ऐश्वर्यमदमत्तास्तु चूर्णिता दण्डिता भृशम् ।। ८५ ।।
द्रौपदी च परित्राता तेन कौरवकश्मलात् ।
दीनः सुदामा भक्तोऽसौ सर्वसम्पत्तिभाक् कृतः ।। ८६ ।।
समग्रं जीवनं ह्यस्य श्रीकृष्णस्य महात्मनः ।
परार्थमेव घटितं न स्वार्थं किमपीहितम् ।। ८७ ।।
स्वकीयाः परकीया वा अत्याचारपरायणाः ।
दीनानां पीडका येऽपि निहताः सर्व एव ते ।। ८८ ।।
ऐश्वर्यमदमत्ता ये धर्म-ब्राह्मणद्रोहिणः ।
दण्डिताः सर्वकल्याणं साधितं परमात्मना ।। ८९ ।।
कंसो वा शिशुपालो वा दन्तवक्त्रादयस्तथा ।
स्वकीया एव ते सर्वे दीन-धर्म-द्रुहो हताः ।। ९० ।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वकीयैर्यादवैर्दृप्तैर्मदमान-बलान्वितैः ।
संशोधयाम्बभूवाऽसौ दुष्टराजन्यकं क्रमात् ॥ ९१ ॥
मर्यादोल्लङ्घिनो वीक्ष्य स्वकीयानपि यादवान् ।
पारस्परिकयुद्धेन प्रभासे समनीनशत् ॥ ९२ ॥
अयं स्वः परकीयो वा भावो नासीन्महात्मनः ।
'कण्टकं कण्टकेनैव द्वयं चापीशितुः समम्' ॥ ९३ ॥
चरितं कृष्णचन्द्रस्य सर्वतो भद्रमस्ति नः ।
चित्रं तु कर्मयोगस्य दर्पणे प्रतिबिम्बितम् ॥ ९४ ॥
जन्मतस्तु समारब्धा लीलास्ताः परमाद्भुताः ।
राजनीतिरहस्येन पूर्णाः पूर्णतमास्तु याः ॥ ९५ ॥
जन्म दिव्यं कर्म दिव्यं दिव्यं माधुर्यमस्य तु ।
ज्ञानं गीतामयं दिव्यं दिव्यं लीलाकदम्बकम् ॥ ९६ ॥
गोपीप्रेम परं दिव्यं दिव्यं दर्शनमस्य च ।
किं किं न दिव्यं कृष्णस्य चरितं परमात्मनः ॥ ९७ ॥
शिक्षितं बालकेनैव गोरक्षणमनेन तु ।
स्वतन्त्रजीवनं चापि शिक्षितं सुखदं शिवम् ॥ ९८ ॥
बाललीला रासलीला युद्धलीला महाद्भुताः ।
सर्वं लीलामयं दिव्यं कृष्णस्य चरितं शुभम् ॥ ९९ ॥
संघर्षमयमेतस्य जीवनं परमाद्भुतम् ।
दिव्यलीलामयं विष्णोः परमानन्ददायकम् ॥ १०० ॥
पुण्यं यशस्यं पापघ्नं दुःखशोकविनाशकम् ।
इदं चरित्रं पठतां भूयान्मङ्गलमुत्तमम् ॥ १०१ ॥
सर्वेषां सर्वसुखदः सच्चिदानन्दविग्रहः ।
कल्याणं साधयेत्कृष्णः श्रीलीलापुरुषोत्तमः ॥ १०२ ॥

(सम्पादकस्य)

—:o:—

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

३–लोकमान्यस्तिलकः

आसीत् त्रिचतुरवर्षेभ्यः पूर्वं भारतवर्षं परतन्त्रम्। तदा कतिपयैः पुण्यचरितैर्महानुभावैस्तदुद्धारकर्मणि श्रेष्ठतमो भागो गृहीतः, येषु प्रमुखतमो लोकमान्य–तिलक एव विद्यते; येन सर्वतः पूर्वं "स्वतन्त्रताऽस्माकं जन्मसिद्धोऽधिकारः" इति मन्त्रः प्रादायि भारतीयेभ्यः। यदद्य सुकरं प्रतीयते तिलकसमये तत्करणमासीत् प्रचुरकष्टाह्वानतुल्यम्। अत एव मनस्विनोऽस्य चरितं रोमाञ्चकारि शिक्षाप्रदञ्चास्ति।

जूलाईमासस्य २३ तारिकायां १८५६ ख्रिष्टाब्दे कोङ्कणप्रान्तीय–रत्नागिरि-प्रदेशे एकस्मिन् ग्रामे चित्पावनब्राह्मणकुले जन्म प्राप्य श्रीमान् बालगङ्गाधरतिलकः १८७६ ख्रिष्टाब्दे प्रथमश्रेण्यां 'बी० ए०' परीक्षामुत्तीर्य १८७९ ख्रिष्टाब्दे वाक्कीलोऽप्यभवत्। अग्रिमवर्षे श्रीचिपलूणकरशास्त्रिसहायतया अभिनवाङ्गलविद्यापीठमेकं संस्थाप्य १८८४ ख्रिष्टाब्दे संस्थापितया दक्षिण-शिक्षासमित्या "फर्गूसनकालेज" इति नाम्ना प्रख्यातं महाविद्यालयमुद्घाट्य तत्राध्यापकत्वेन स्वकमात्मानमपि समार्पयत्। किञ्चित्कालानन्तरं तां संस्थां परित्यज्य श्रीआगरकरेण साकं मराठी-भाषायां 'केसरी' आङ्गलभाषायाञ्च 'मराठा' इति समाचारपत्रद्वयं सञ्चाल्य स्वयञ्च सन्पादको भूत्वा जनतायां नवचैतन्यं समुत्पाद्य अधिकाधिकसाहससञ्चाराय च गणपतिशिववीरोत्सवावपि सम्प्रचारितौ। तदा कांग्रेसस्य नामापि न श्रूयते स्म। अतो भारतीय-स्वातन्त्र्यान्दोलनस्य जनकोऽप्ययमेव मन्तव्यः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१८५७ ख्रिष्टाब्दे सम्पन्नविद्रोहानन्तरं विदेशीयसत्ताया भारतीयेषु विश्वासनाशेन राज्यकार्येषु नासीद् भारतीयानां स्वल्पोऽप्यधिकारः। तत्प्राप्त्यर्थं शिक्षितवर्गेण १८८५ ख्रिष्टाब्दे कांग्रेससंघटनं विहितम्। प्रतिवर्षमेकत्रीभूयैकवारं राजभक्तिमयानि भाषणानि विधाय निवर्तन्ते स्म। आङ्गलदेशीया अपि तदा सममिलन्त तदधिवेषनेषु। नासीत्तत्र काचिदपि क्रान्तिः। १८९० ख्रिष्टाब्दे लोकमान्यः प्रथमवारं तदधिवेशने गतः। १८९५ ख्रिष्टाब्दे पुण्यनगराधिवेशनावसरे स्वागतसमितेर्मन्त्रित्वमपि निर्वाहितम्। परं संस्थायां मृदुदलीय–राजभक्तानां प्राधान्येन नारोचत तिलकाय सा।

अस्मिन्नेवाब्दे मुम्बईप्रान्तीय-धारासभायाः सभ्योऽपि निर्वाचितोऽयमभूत्। अब्दद्वयानन्तरं पुण्यनगरे प्लेगमहामारी–प्रकोपावसरे स्वास्थ्यनियमानां बलात्पालनाय आङ्गलसैनिकानां नियुक्त्या विविधदुःखाक्रान्ते लोके 'दामोदरहरिचापेकर'नामधेय–महाशयेन प्लेगसमितेरध्यक्षस्य हत्या विहिता, येन भारतीयजनसमुदायेन तत्समाचारपत्रैश्च कृतस्य बृहदान्दोलनस्य परिणामे भारतीयेषु शासकानामातङ्कः अत्याचारश्च वृद्धिं गतः। तेष्वेव दिवसेषु स्वसमाचारपत्रे श्रीतिकलकेन साधितासीद् नीतिविहिता शिववीरानुष्ठिता 'अपजलखानहत्या', येन प्रतिपक्षिभिः कृतोऽयं कलकलो यत् लोकमान्यः स्वलेखै राजनैतिकहत्याः प्रोत्साहयति। इत्थमस्य समाचारपत्रे प्रकाशितैः कतिपयलेखैः शासकवर्गेण सञ्चालिते राजद्रोहाभियोगे सार्धैकवर्षाय कारागारे निपातितेनानेन तत्र निगमान्वेषणं विधाय आङ्गलभाषायां 'ओरायने'–ति नामा प्रसिद्धो ग्रन्थोऽलेखि। यत्प्रभावितस्य प्रख्यात–योरूपीयविदुषो मोक्षमूलरस्य प्रार्थनया समयात्पूर्वमेव कारागारादुन्मुक्तोऽयमभूत्।

१९०५ ख्रिष्टाब्दे लार्डकर्जनेन विहितस्य वङ्ग-भङ्गस्य विरोधे आन्दोलनसञ्चालनाय अनेनैकत्रीकृतानि लक्षशो रूप्यकाणि। परं १९०७ ख्रिष्टाब्दे

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सूरतनगरे संवृतस्य कांग्रेसाधिवेशनस्यावसरे मृदुदलेन साकं समुत्पन्नेन मतभेदेन श्रीतिलकस्योग्रदलं कतिपयवर्षेभ्यः कांग्रेसमत्याक्षीत्।

तस्मिन्नेव समये शासकमण्डलेन स्ववसरं निरीक्ष्य 'केसरी' समाचार-पत्रे प्रकाशितैः कतिपयलेखैः जूनस्य २४ तारिकायां १९०८ ख्रिष्टाब्दे राज-द्रोहस्य जातिगतद्वेषप्रसारस्य चाभियोगे गृहीत्वा षड्वर्षेभ्यः पुनर्दण्डयित्वा देशाद् निर्वास्य ब्रह्मदेशीय–माण्डलानगरस्य दुर्गे दृग्बन्धिरूपेण संस्थापितः। अभियोगावसरे नितान्तमार्मिकभाषणं ददतानेन निगदितमासीद् यत् यद्यपि विचारकैः प्रमाणितोऽहमपराधी तथापि निर्दोषोऽस्मि, कदाचिद्भौतिकजगतोऽस्य नियन्त्र्याः शक्तेर्विधाने तदुद्देश्यं यस्य प्रातिनिध्यं मया क्रियते मम कष्टसहनेनैव अधिकं सफलं भविष्यति। कारागारे सर्वा अपि यातना मनस्विभावेन सोढ्वा कर्मयोगी तिलकः सुप्रसिद्धं लोकप्रियं 'गीतारहस्य'मिति नामानं ग्रन्थं व्यरचयत्। १९१४ ख्रिष्टाब्दे प्रथमविश्व-व्यापि–युद्धावसरे कारावासाद्विमुक्तोऽयमभवत्।

स्वराज्यप्रदाने ब्रिटेनप्रतिज्ञास्वविश्वासं कुर्वतानेन पुण्यनगरे अप्रैलस्य २६ तारिकायां १९१६ ख्रिष्टाब्दे भारतीयस्वशासनसमितेः (Indian Home Role League) संस्थापनानन्तरं स्वमतभेदं विस्मृत्य 'लखनऊ' नगरे संयोजिते कांग्रेसाधिवेशने पुनरपि सहयोगो दत्तः। मृदुदलीयानां प्रभावनाशेन संस्थायां तिलकदलस्यैव आधिपत्यं जातम्। अस्मिन्नेवाधि-वेशने लोकमान्यप्रयत्नैः स्वराज्योपलब्ध्यै लीगकांग्रेससहयोगयोजनास्वी-कृत्या साम्प्रदायिकैक्येन कतिपयवर्षानन्तरं समारब्धेऽसहयोगन्दोलने महत्साहाय्यमभवत्।

स्वराज्यप्रदाने समस्तभारतेन खिलाफतविषये च यवनैः सह ब्रिटेनेन कृतस्य विश्वासघातस्य प्रतीकारे किमपि कर्तुं समालोचितुमारब्धा देश-नेतारः। तदैव पञ्चाम्बुप्रान्ते संवृत्तैर्भयानकात्याचारैः क्षुब्धक्षुब्धो दुःखितश्च लोकमान्यः पीडितानां सहायतायै इतरनेतृगणेन साकं "अमृतसर"–नगरे समागतः। खिलाफतान्दोलने सहयोगदानस्य वचनमपि दत्तं यवनेभ्यः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीगान्धिरसहयोगान्दोलनमारब्धुमुद्यत एवासीत् तदैव भीतभीतेन चकित-चकितेन दुःखितेन च भारतवर्षेण समाकर्णितं जूलाईमासस्य ३१ तारिकायां १९२० ख्रिष्टाब्दे निशायां लोकमान्यस्य स्वर्लोकगमनम् ।

लोकमान्यः प्रमुखराजनैतिकनायकत्व-धुरं धारयन् समाजसुधारको लेखकश्चाप्यभवत् । अस्य विविधकार्यकदम्बैर्जनतयापि 'भगवान्' इत्युपाधिना विभूषितोऽयम् ।

(उपसम्पादकस्य)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

४--महामना मदनमोहनमालवीयः

दिसम्बरमासस्य २५ तारिकायां १८६९ ख्रिष्टाब्दे प्रयागसमीपवर्तिनि ग्रामे ब्राह्मणकुले जनिमुपलभ्यानेन प्रयागस्थ-म्योरसेंट्रलमहाविद्यालये शिक्षा समधिगता। १८८४ ख्रिष्टाब्दादारभ्य १८८७ पर्यन्तं गवर्नमेण्टहाईस्कूलेऽध्यापकतां निर्वाह्य "कालाकांकर" नाम्नि तदधीशस्य व्यक्तिगतमन्त्रित्व-कार्यं कुर्वता हिन्द्यां निस्सरतः 'दैनिकहिन्दुस्तान' इति नामधेयस्य समाचार-पत्रस्य, प्रयागात् प्रकाश्यमानस्य 'इण्डियन औपिनियन'' (Indian opinion) इति साप्ताहिकस्य च सम्पादकत्वमप्यकारि। १८९९ ख्रिष्टाब्दे वाकीलपरीक्षामुत्तीर्य कुर्वंश्च तत्कार्यं १९१२ ख्रिष्टाब्दपर्यन्तं संयुक्तप्रान्तीयधारासभाया निर्वाचितसदस्योऽप्यभूत्।

१८८५ ख्रिष्टाब्दतः प्रचलतो राष्ट्रियमहासभापोतस्य प्रथमसञ्चालकेषु प्रमुखतमो भूत्वा १९०९-१९१८ ख्रिष्टाब्दयोस्तदधिवेशनाध्यक्षोऽपि निर्वाचितोऽभूत्। मृदूग्रविचारधारयोरयं मध्यममार्गावलम्बी स्थितः। १९३२-१९३३ ख्रिष्टाब्दयो राष्ट्रियमहासभाधिवेशनयोः प्रधानत्वपदे निर्वाचितोऽप्ययमधिवेशनात् पूर्वमेव शासकवर्गेण निगृहीतः।

१९१० ख्रिष्टाब्दतः १९१९ पर्यन्तं 'इम्पीरियललेजिस्लेटिव'-कौसिलस्य सदस्यो भूत्वा १९१९ ख्रिष्टाब्दे रौलटविधानस्य विरोधे त्यागपत्रं दत्तवान्। विधाननिर्मातृपरिषदोऽधिवेशने पञ्चाम्बुप्रान्ते सैनिकशासनस्य तत्कृतात्याचाराणाञ्च विरोधे सेनापतिं 'डायरं' दोषिणं संसाधयतानेन पञ्चहोरापर्यन्तं भाषणमकारि। तत्प्रभावितेन तेन क्षमाप्रार्थना कृता। पीडितानां सहायतायै कांग्रेसस्य अमृतसरीयाधिवेशनस्य अध्यक्षो भूत्वा पञ्चाम्बुप्रान्ते समागतः। १९१६ ख्रिष्टाब्दतः १९१९ पर्यन्तं भारतीयौद्योगिकसमितेः सदस्यत्वेन मतविरोधे स्वकीयः पृथग् लेखोऽलेखि। यथाशक्ति च विधाननिर्मातृ-संसदि लोकहिताय प्रचुराणि कार्याणि समनुष्ठितानि।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भारतीयसंस्कृतेः विनाशेन, राष्ट्रियगौरवापसारणेन, भारतीयनवयुवकानां राजसेवकत्वायैव प्रोत्साहनेन च प्रचलितशिक्षाप्रणालीमनुपयोगिनीं नितान्तमहितकरीञ्च पर्य्यालोच्य राष्ट्रीयताप्रसारणाय, प्राचीनसंस्कृतेर्गौरववर्धनाय, उत्तमशिक्षया श्रेष्ठसन्ततिनिर्माणाय च श्रीमता मालवीयेन १९१६खिृष्टाब्दे काश्यां हिन्दुविश्वविद्यालयं संस्थाप्य तदुपकुलपतिपदे (Vice-Chancellorship) स्वयमेवाधिष्ठितोऽभवत् ।

१९२२–२३ खिृष्टाब्दयोर्हिन्दूमहासभाया अध्यक्षो भूतः । १९१४ खिृष्टाब्दे केन्द्रीयव्यवस्थासभायाः सदस्यत्वं विरोधिदलस्य नायकत्वञ्च सम्पाद्य समुद्रतट–करविधानस्य विरोधमाचरँस्तां परित्यक्तवान् । १९३२ खिृष्टाब्दस्य सितम्बरमासे साम्प्रदायिकनिर्णयानुसारं तथाकथिताऽस्पृश्यवर्गस्य विशालवर्गात् पृथक्करणस्य विरोधे यरवदाकारागारे श्रीगान्धिना गृहीतस्य मरणपर्यवसायिव्रतस्यावसरे सपद्येव श्रीमालवीयो मुम्बईनगरे गत्वा हिन्दुनेतॄणां सम्मेलनमेकं विधाय स्वयञ्च तदध्यक्षत्वेन सन्धिमनुष्ठापितवान् । यदनुसारं प्रान्तीयधारासभासु नियतहिन्दुस्थानेभ्योऽस्पृश्यवर्गाय कतिपयस्थानानां संविभागः संवृत्तः, परन्तु तेषां गणना हिन्दुषु एव भविष्यति । एतदनन्तरं मालवीयमहानुभावेन राजनीतिकजीवजीवने कश्चिद् महत्त्वपूर्णो भागो न गृहीतः । कदाचिदेव भारतीयसमस्यासु स्वविचारान् प्रकटयति स्म ।

राष्ट्रियमहासभायाः (Congress) वर्तमाननेतृमडलेन गृहीतमार्गे सहयोगदानं दुष्करं मत्वा कतिपयवारं मतभेदमाचरन् स्वविरोधिविचारान् प्रकटयन्नपि तस्यां मातृवत् श्रद्धा-समादराभ्यां परिपूर्णमन्तःकरणं सर्वदा धारयति स्म । १९३०–३३ खिृष्टाब्दयोः पूर्णरूपेण देशनायकत्वधुरं संधार्यानेन कारावसयात्रापि कृता । अस्मै कांग्रेसस्य यवनतोषिणी नीतिर्नारोचत कदापि ।

अत्युत्कृष्टप्रेरकशक्तियुक्त आसीद् महामनाः । हिन्दुभावः सदैव अस्मिन् जागरूकस्तिष्ठति स्म । हिन्दूनामुत्थानाय तेषामुपरि सर्वकारेण अन्यैश्च

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्रियमाणानामत्याचराणां प्रतीकाराय सर्वस्वमपि समर्पयितुं सर्वदा सन्नद्धोऽयमतिष्ठत् । अन्ततो नवाखलीप्रभृतियवन-प्रायस्थानेषु मुसलिमलीगस्य प्रत्यक्षक्रियायाः (Direct Action) परिणामे धर्मान्धयवनैः क्रियमाणान् निरीहहिन्दुषु हत्याकाण्ड–सतीत्व-भ्रंशप्रभृत्यत्याचारान् निशम्य भृशं दुःखितचेता महामना वार्धक्येन किमपि कर्तुमशक्तः १९४६ ख्रिष्टाब्दस्य नवम्बरमासस्य द्वादशतारिकायां स्वप्राणान् तत्याज ।

इत्थं महामना अर्धशताब्दीतोऽप्यधिककालपर्यन्तं निरन्तरं राजनीतिकक्षेत्रे, धार्मिकक्षेत्रे, सामाजिकक्षेत्रे च चिरस्मरणीयाः सेवाः कृतवान् । संवृत्तश्चायं भारतस्य, भारतीयतायाः, हिन्दूनां वैदिक-धर्मस्य चोद्धारकेषु अन्यतमः ।

(उपसम्पादकस्य)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

५–महात्मा गान्धिः

अस्त्येषु दिवसेषु भोगवादस्य प्राधान्यम् । येन स्वार्थपरायणतामुत्पाद्य संघर्षेण युद्धान्येव जन्यन्ते, यैर्मानवता-नाशस्तु भवत्येव, अशान्तेर्बीजान्यपि नापगच्छन्ति क्षणमात्राय । चिरस्थायिशान्तेः साम्राज्यं तु भारतीय-समुच्च-संस्कृतेः प्रसारेणैव शक्यते, यस्य प्रातिनिध्यमस्मिन् युगे महात्मा गान्धिः कृतवान् । अद्य आपद्ग्रस्ताय जगते गान्धिगृहीतादर्शस्य वरमावश्यकता वर्तते । अतो विद्यतेऽस्य चरितमवश्यमेव शिक्षावहम् ।

श्रीगान्धिः पोरबन्दरनगरेऽक्तूबरस्य द्वितीयतारिकायां १८६९ ख्रिष्टाब्दे राज्यसचिवसद्मनि "पुत्तली बाई" कुक्षितो जन्म गृहीत्वा 'भावनगर' 'राजकोटयो' मैट्रिकपर्यन्तं शिक्षितो जातः । तात्कालिक-प्रथानुसारमेतद्विवाहः "कस्तूरबाई"–नाम्न्या सार्धमल्पीयसि वयसि समपद्यत । गृहे च धार्मिकवातावरणस्य प्राधान्येनास्मिन्नपि तत्प्रभावः प्रभूततयाऽपतत् । अतो वाक्कीलशिक्षायै इङ्गलैण्डगमनसमये मात्रा सह बद्धप्रतिज्ञो भूत्वैव तत्र गन्तुमशक्नोत् । वाक्कीलशिक्षां गृहीत्वा पूर्वं मुम्बईनगर्यां परतश्च दक्षिणाफ्रीका-प्रायद्वीपं प्रति गत्वा तत्र स्वकार्यं कुर्वतानेन तत्र गौराङ्गैः प्रवासिभारतीयेषु अहर्निशं क्रियमाणा विविधविधा अत्याचाराः समवलोकिताः, स्वयञ्चापि समनुभूताः । तद्विरोधाय भारतीयानां स्थितिसुधाराय च निष्क्रियप्रतिरोधनाम्ना विश्रुतमहिंसात्मकसत्याग्रहसदृशं प्रभावपूर्णमान्दोलनमारब्धमनेन । तत्र साफल्येन सत्यप्रयोगेषु श्रीगान्धेर्धारणा अत्यर्थं दृढीभूता । एतस्मिन्नवसरे मिलितेन स्वर्गीय–दीनबन्धु एण्ड्रूज (Andrews) महाशयेन दक्षिणाफ्रीका-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रधानमन्त्रिणा 'श्रीस्मट्स'–महोदयेन साकं श्रीगान्धेः सन्धिवार्ता कारिता, तदनुसारं गान्धिनापि "नेटालीयबोअरयुद्धे" जूलू-विद्रोहे च ओषधवितरकमण्डलस्य नेतृत्वं विधाय आहतानां शुश्रूषा सम्पादिता। प्रवासकाल एव अहिंसात्मकसत्याग्रहस्य प्रयोगं विकासं च कुर्वन् सिद्धान्तानप्यस्य स्थिरीकृतवान्। १९०८ ख्रिष्टाब्दे 'भारतस्वराज्य' नाम्नि पुस्तके प्रतिपादिता अहिंसासत्याग्रहयोः सिद्धान्ता मृत्युपर्यन्तं स्वीकृता अनेन।

१९१४ ख्रिष्टाब्दे मातृभूमिं प्रत्यागतेन तेन गुर्जर-प्रान्तस्य खेडाप्रदेश आङ्गलेषु विश्वासितया तेषां साहाय्याय एकस्य स्वयंसेवकदलस्य संघटनं कृतम्। परन्तु प्रथमविश्वयुद्धावसाने अपूर्णशासनसुधारप्रदानस्य रौलटविधानं निर्म्माय पञ्चाम्बुप्रान्ते कृतानामत्याचाराणाञ्च विरोधे खिलाफत-सम्बन्धे चारब्धेऽसहयोगान्दोलने १९२२ ख्रिष्टाब्दे राजद्रोहापराधे षड्वर्षावधिकदण्डप्रदानेन कारागारे निपातितोऽयं १९२४ ख्रिष्टाब्दे रुग्णतयोन्मुक्तोऽभूत्। असहयोगान्दोलनानन्तरं साम्राज्यवादिनां "विभज्य राज्यकरणम्" इतिकूटनीत्यनुसारं प्राचुर्येण प्रवृत्तानां साम्प्रदायिकसंघर्षाणां प्रायश्चित्ते एकविंशतिदिवसावधिकमुपवासं गृहीतवान्, येन भीतभीतैर्देशवासिभिः पं० मोतीलालस्य सभापतित्वे ऐक्यसम्मेलनं विधाय उपद्रवशान्तये प्रयत्नाः कृताः। दिसम्बरस्य ३१ तारिकायां १९२९ खृष्टाब्दे रजन्यां लवपुरे पूर्णस्वाधीनता-ध्येयमुद्घोषितमभवत्।

साईमनदलस्य वैफल्यानन्तरं १९३० खृष्टाब्दे पुनरारब्धे लवणसत्याग्रहे यरवदाकारायां निपातितोऽयं १९३१ खृष्टाब्दस्य जनवरीमासे लार्ड इरविनेन साकं सन्धिं कृत्वा लण्डनीय (गोलमेज) परिषदि कांग्रेसप्रतिनिधिर्भूत्वा गतः, परं सफलतां नाप।

१९३२ खृष्टाशब्दस्य जनवरीमासे गोलमेजपरिषत्तः प्रत्यावृत्तः संयुक्तप्रान्तीयकृषकसमस्याविषये लार्डविलिंगटनेन सह वार्तालापं चिकीर्षुरपि पुनर्निगृहीतो भूत्वा सितम्बरमासे यरवदाकारागारे एव ब्रिटिश-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रधानमन्त्रिप्रदत्त-साम्प्रदायिकनिर्णयानुसारं हिन्दुभ्यो हरिजनानां पृथक्करणस्य विरोधे मरणपर्यवसायिनमुपवासं धृत्वा पूनापैक्ट-स्वीकृत्यैव तत्याज। १९३३ खिृष्टाब्दे अहमदाबादीय-सत्याग्रहाश्रमं परित्यज्य वर्धानगराद् नातिदूरे सेवाग्रामे स्वपर्णकुटीरं संस्थापितमनेन। धारासभासु गमनस्य देशनायकानां प्रवृत्तिं निरीक्ष्य महात्मापि सत्याग्रहान्दोलनं समाप्य कांग्रेससदस्यतां परित्यज्य अस्पृश्योद्धार–ग्रामसुधार–ग्रामोद्योग-संघादिरचनात्मककार्येषु पूर्णरूपेण व्यापृतोऽपि यथावसरं सम्मतिप्रदानेन कांग्रेससहायतामप्यकरोत्। एतस्याज्ञयैव १९३७ खिृष्टाब्दे राष्ट्रीयमन्त्रिमण्डलैः स्वप्रान्तेषु खादीप्रोत्साहनं, हरिजनेभ्यः सुविधाप्रदानम्, ग्रामसुधारः, मादकद्रव्याणां प्रतिषेधः, मौलिकशिक्षापद्धतिश्चेत्यादीनि कार्याणि कृतानि।

सितम्बरस्य प्रथमतारिकायां १९३९ खिृष्टाब्दे यूरोपे शर्मण्यदेशेन प्रवर्तित-द्वितीयविश्वयुद्धावसरे वाइसरायेण पञ्चमतारिकायां परामर्शाय समामन्त्रितेन महात्मना मित्रराष्ट्रैः सह स्वसहानुभूतिस्तु प्रकटिता, परं तस्मिन् युद्धे भारतीयानां सक्रियसहायता-प्रदान-विषये कतिपयवारं दिल्लीं प्रति गमनस्य नाभूत् कश्चित्परिणामः। युद्धविषये स्वातन्त्र्येण स्वमत-प्रकाशस्य महात्मना समभ्यर्थितोऽधिकारो वाइसरायेण न स्वीकृतः। तत्परिणामे श्रीगान्धिना पुनर्युद्धविरोधी वैयक्तिकसत्याग्रहः समारब्धः। प्रचुरा नेतारो बन्दीभूताः। १९४१ खिृष्टाब्दे सत्याग्रहोऽयं स्थगितोऽक्रियत। एतस्मिन्नन्तरे श्रीसुभाषचन्द्रः स्वपाटवेन विदेशं गत्वा तत्र स्वतन्त्रभारतीय-सेनां निर्माय हिंसात्मकोपायैः पूर्णस्वाधीनतां प्राप्तुं प्रयासं कृतवान्। भारते च क्रिप्स-योजनाऽनङ्गीकारानन्तरं महात्मा "ब्रिटेननीतिर्भारते विभज्य शासनस्य वर्तते, साम्प्रदायिकमतभेदोऽपि तेनैव जनितः स्वस्थैर्याय, भारते साम्राज्यवादिनामवस्थितिपर्यन्तं साम्प्रदायिकैक्यमपि दुःशकम्" इति पर्य्यालोच्य स्वातन्त्र्याय समाकुलितो भूत्वा अगस्तस्याष्टमतारिकायां १९४२ खिृष्टाब्दे मुम्बईनगर्यामखिल-भारतीय-कांग्रेससमितेरधि-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वेशने 'भारतं त्यजत' (Quit India) इति प्रस्तावं स्वीकारितवान्, परिणामे नवमतारिकायां वार्तालापं वाञ्छन्नपि अन्यनेतृभिः सहायमपि शासकवर्गेण कारायां निपातितः। अस्य निग्रहेण समस्तभारते विद्रोह-प्रसारोऽभवत् यस्मिन् जनताया राज्यस्य च प्रभूता हानिर्जाता। अस्य मोचनाय सर्वे प्रयत्ना विफलीभूताः। वङ्गप्रदेशेऽन्नाभावेन प्रचुरा जना मृताः। अनेन प्राणपर्यवसायिव्रतं धारितम् । अस्य व्यक्तिगतमन्त्री श्रीमहादेवदेसाई पत्नी च श्री 'कस्तूरबाई' नामधेया कारायामेव स्वर्गं याता। अन्ततो रुग्णतयोन्मुक्तो महात्मा बहिरागत्य जिन्नामहोदयेन सार्कं साम्प्रदायिकसन्धिवार्ताश्चिकीर्षन्नपि विफलोऽभवत्।

वेवलप्रस्तावसमये सम्मतिदातुः स्थितिः स्वीकृतानेन। १९४२ ख्रिष्टाब्दे शासकवर्गविहितस्य दमनस्य विरोधे जनप्रतिरोधेन सन्तुष्टेनापि देशस्वाधीनतायै अहिंसात्मकनीतिरेव श्रेयसी मता। वास्तविकं भारतवर्षं ग्रामेष्वेव प्रतिवसति तेभ्य एव स्वतन्त्रताया आवश्यकता, अतोऽयमपि निवास-भोजन-वेषादिभिर्ग्रामीण एव संवृत्तः। जनतायाः श्रद्धाभाजनं भूत्वा सत्यप्रयोगान् करोति। हरिजनानामुद्धाराय 'हरिजनसेवकसङ्घ' इति नाम्नी संस्था संस्थापिता। स्वराज्यप्राप्तौ तद्-दृढीकरणाय च रचनात्मककार्यस्य महत्त्वं स्वीकृत्य 'ग्रामोद्योगसङ्घः' मौलिकशिक्षासङ्घः, गोसङ्घः, खादीसङ्घः इत्यादयः संस्थाः संस्थापिताः। भारतोद्धाराय कृतैरस्य कार्यकलापैः सर्वेऽपि भारतीयाः परमप्रेम्णा 'बापू' पदेन व्याजह्रुरेनम्।

परं हा हन्त ! हृदयं विदीर्यते, लेखिनी वेपते, जिह्वा सङ्कोचमापद्यते, मनो जडीभवति, नहि च प्रतिपादयितुं पार्यते यदाङ्गलैः पुत्तलिकायित-लीगीयानां साचिव्येन समन्तात् सन्धुक्षितं वह्निमुपशमितुमितस्ततः, कदापि वङ्गे, कदापि मगधे, कदापि देहल्यां द्वारि द्वारि संधावन् उपवासा-दिपरिक्षीणशरीरो वराको नो 'बापू' ३० जनवर्यां १९४८ तमे ख्रिष्टाब्दे गोडसेहतकेन गुलिकाभिर्निहत्य समाच्छिन्नोऽस्मद्हस्तेभ्यः। अस्तं गतो

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भारतभाग्यभानुः। क्व नु खलु अद्य राष्ट्रस्योद्धारकः स्वातन्त्र्यप्रासाद-निर्माता राष्ट्रपिता ?

स्वालौकिककार्यकलापैर्महात्मपदविभूषितो विश्वस्यानन्यसदृशो महा-पुरुषो भूत्वा श्रीगन्धिः काँग्रेसस्य श्रेष्ठनेता एव नासीत्, अपि तु परमोत्कृष्ट-विचारकः, साधकः, आङ्गलादि-भाषालेखकः, सम्पादकः ईश्वरभक्तः प्रकृतिचिकित्सकश्चापि विद्यते स्म।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

६—पण्डितजवाहरलालनेहरूः

विंशतितमायां शताब्द्यां विश्वेन विश्वयुद्धद्वयमवलोकितम् । तृतीयमपि प्रतिक्षणमाशङ्क्यते । विविधवादानां सङ्घर्षेण जगती निःशेषविनाशमुखं नीता प्रतीयते । एकमात्रं शान्तिरेवाभिलष्यते विश्वस्य सर्वसाधारणमानुषैः । तदर्थं समन्तादवलोकयन्तस्ते निराशामेव आकलयन्ति वराकाः । परं दृश्यते श्रीनेहरूरूपे एक आशाकिरणोऽद्यापि यः स्वसामर्थ्यानुसारं तदानयनाय अहर्निशं प्रयतमानस्तिष्ठति । अस्त्ययमद्य भारतभाग्यविधाता अस्माकं प्रधानमन्त्री । त्यागपूर्णमस्य जीवनमस्ति नितान्तं शिक्षाप्रदम् ।

नवम्बरस्य चतुर्दशतारिकायां १८८९ तमे ख्रिष्टाब्दे कश्मीरीयसारस्वतब्राह्मणकुले प्रयागनगरस्य मीरगञ्जप्रतोलिकायां जन्मलेभे महानुभावोऽयम् । जनकोऽस्य पं० मोतीलालो जननी च श्रीमती 'स्वरूपरानी' आसीत् । जन्मतश्चिरकालपूर्वं पूर्वजानां दिल्लीनगरे नेहरतटे वास्तव्यत्वेन "नेहरु" इत्युपनाम्नाप्ययं विश्रुतो जातः । तदानीन्तनेषु वाक्कीलेषु प्रसिद्धतमस्य श्रीमोतीलालस्य वैजयन्तप्रासादतुल्यं 'आनन्दभवन' इत्याख्यं निवासगृहं समस्तैश्वर्योपकरणजातेन परिपूर्णमासीत् । श्रीजवाहरलाल आसीदस्यैकमात्रः पुत्रः । अतोऽस्य पालनादिकं राजकुमारतुल्यमभूत् । पञ्चदशवर्षवयःपर्यन्तमस्य शिक्षणं गृह एव संवृत्तम् । अनन्तरमल्पीयस्येव वयसि इङ्गलैण्डं प्रति गत एष पुरातनपरम्पराभिः परमप्रख्यातायां "हैरो" इत्याख्य-शिक्षणसंस्थायां प्रविष्टो भूत्वा अनन्तरं 'ट्रिनिटीकैम्ब्रिज'' इत्याख्ये विश्वविद्यालये शिक्षामुपलभमानो 'बी० एस्० सी, एम० ए०' च भूत्वा वाक्कीलोऽपि (Bar at Law) संवृत्तः ।

पाश्चात्त्यदेशेषु भ्रमन्नयं सर्वत्रापि नवं चैतन्यं, सर्वविधां स्वाधीनतां, विचित्रमुत्साहं, विविधान् आविष्कारान् नवञ्च जीवनं प्रेक्ष्य भारतभुवोऽवस्थाञ्च स्मृत्वा भृशं दुःखावेशितमना भूत्वा मातृभूमिं स्वाधीनां विधातुं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रतिज्ञातवान् । अतः १९१२ खिष्टाब्दे इङ्गलैण्डतः प्रत्यावृत्तोऽयं प्रथमवारं कांग्रेसाधिवेशने सम्मिलितोऽभवत् ।

स्वपित्रा सह प्रयागीय-प्रधान-न्यायालये (High Court) वाक्कील-कार्यमारब्धवान् । १९१६ खिष्टाब्दे कमलया सह विवाहः, १९१७ अब्दे च इन्दिराया जनिरभूत् । १९१४ खिष्टाब्दे दक्षिणाफ्रीकाभूखण्डे प्रवासिभारतीयानामधिकाररक्षार्थं श्रीगान्धिना समारब्धे सत्याग्रहेऽनेन ५००० रूप्यकाणि प्रेषितानि । १९१८ खिष्टाब्दे भारतीय-स्वशासनसंस्थायाः (Indian Home Rule League) मन्त्री संवृत्तः । अस्मिन्नेव वर्षे कांग्रेसे प्रविश्य रौलटविधानस्य (Rowlat Act) विरोधाय प्रवृत्ते आन्दोलने पूर्णोत्साहेन कार्यं कुर्वन् वैभवशालिनं स्वपितरमपि पूर्णरूपेण राष्ट्रियक्षेत्रेऽवतारयन् द्विवारं कारावासयात्रां कृतवान् । जवाहरप्रेरणया सर्वमेव कुलमाबाल-वनिता-वृद्धं देशसेवायां लग्नम् । असहयोगावसाने स्वत्यागेन प्रयागीय-नगरसभायां निर्वाचितप्रधानो भूत्वा तत्रानेकान् सुधारान् कृतवान् । १९२३ खिष्टाब्दे नागपुरनगरे ध्वजारोहणसत्याग्रहस्य संघटनं कृतम् । कोकोनाडा कांग्रेसावसरे स्वयंसेवकदलस्य प्रथमाध्यक्षो भूत्वा कांग्रेसस्य प्रधानमन्त्रित्वायापि निर्वाचितोऽभूत् । अस्मात्कालादारभ्य सम्प्रतिपर्यन्तं सर्वरूपेणायं देशस्यैव सञ्जातः ।

१९२६ खिष्टाब्दे योरूपे गतोऽयं साम्राज्यविरोधिपरिषदोऽध्यक्षोऽभवत् । अनन्तरं रूसदेशे भ्रमन् तत्र प्रसृत-विचारधारया प्रभावितो भूत्वा प्रत्यावृत्य च भारते सर्वतः पूर्वं साम्यवादि-विचारधारां प्रचारितवान् । १९२८ खिष्टाब्देऽनेन भारतीय-स्वाधीनता–सङ्घः (Indian Indepen-dedt's League) संस्थापितः । अग्रिमवर्षेऽखिल-भारतीय-श्रमिकसङ्घ-समितेः (All India Trade Union Congress) कांग्रेसस्य चाध्यक्षो निर्वाचितोऽभूत् । अस्य नेतृत्वे लवपुरे पूर्णस्वाधीनतयाः प्रस्तावः स्वीकृतो जातः । जनवरीमासस्य २६ तारिकायां १९३० खिष्टाब्दे नोःशेषेऽपि देशे प्रथमः स्वाधीनतादिवसः सम्मानितः समजायत ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अस्मिन्नेव वर्षे कतिपयकारणैरसन्तुष्टानां श्रमिकाणां कृषिकाणां प्रार्थना यदा ब्रिटिशसर्वकारेण न श्रुता तदा श्रीगान्धिना समारब्धेऽसहयोगान्दोलने षण्मासावधिकदण्डेन कारागारे संस्थापितोऽयं तत्र नैनीतालकारागरे एव बन्दीकृतेन स्वपित्रा साकं गान्धि-इरविन-सन्धिसम्बन्धे महात्मना सह परामर्शाय यरवदाकारागारं प्रति प्रापितोऽभूत्। १९३२ ख्रिष्टाब्दे तत्सन्धि-विच्छेदे कृषिकाणां सेवया वर्षद्वयाय पुनर्दण्डितोऽपि मातू रुग्णतया पूर्व-मेवोन्मोचितः सर्वकारेण।

१९३४ ख्रिष्टाब्दे विहारभूकम्पानन्तरं वर्षद्वयाय पुनर्निगृहीतः कमलाया रुग्णावस्थया मरणशय्यापन्नायास्तस्या भैषज्यार्थं स्वीटजरलैण्डे गतः। परं हन्त! वराकं जवाहरं विहाय सा क्षयरोगेण असमय एव स्वर्लोकं याता।

१९३६–३७ ख्रिष्टाब्दयोः कांग्रेसस्य अध्यक्षो भूत्वा सार्वजनिकनिर्वा-चनावसरे निःशेषस्यापि देशस्य भ्रमणं कृतवान्। येन प्रभूतं साफल्यमाप्तम्, अष्टसु प्रान्तेषु, राष्ट्रियमन्त्रिमण्डलानि संवृतानि।

१९३८ ख्रिष्टाब्दे पुनर्योरूपे गत्वा गृहयुद्धग्रस्तस्य स्पेनस्य चीनस्य च भ्रमणान्तरं देशं प्रत्यागतेन तेन १९३९ ख्रिष्टाब्दस्यान्तिमेऽर्धे गोरक्षपुरे वर्षचतुष्टयावधिको दण्डो लब्धः। आगामिवर्षे युद्धविरोधि-व्यक्तिगतसत्या-ग्रहानन्तरमुन्मुक्तोऽपि क्रिप्सयोजनावैफल्येन देशे समुत्पन्न-कटुवातावरणे 'भारतं त्यजते'ति प्रस्तावानन्तरमगस्तस्य नवमतारिकायां १९४२ ख्रिष्टाब्दे मुम्बईपुर्यां प्रातःकाल एव गान्धिप्रभृतिनेतृगणेन साकमयमपि निगृहीतो भूत्वा १९४५ अब्दस्य जूनमासे वैवलप्रस्तावानां विचारणायोन्मुक्तोऽभवत्। प्रस्तावाश्च ते न स्वीकृताः कांग्रेसेन। अयञ्च सुभाषसंस्थापितायाः स्वतन्त्र-भारतसेनायाः सेनानायकानामुपरि शासकवर्गेण सञ्चालितेष्वभियोगेषु तत्कार्यगर्वितसया तेषां सुरक्षायै यत्नमकरोत्। १९४५ ख्रिष्टाब्दीयनिर्वाच-नेषु समन्तात् पर्यटनं विधाय पूर्णसाफल्यमवाप।

स्थितिगाम्भीर्यं निरीक्ष्य ब्रिटिशसर्वकारेण भारतीयानां सन्तोषाय प्रमुखदलैः सह वार्तालापं विधातुं मन्त्रिमण्डलमिशनं प्रेषितं येन देश-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विभाजनमूला: कतिपये प्रस्तावा विचारार्थं सामुख्यं नीता, ये लीगीयैस्तु न स्वीकृता:, परं कांग्रेसेन तदङ्गीकारेण श्रीनेहरू: वाइसरायकार्यकारिण्या उपाध्यक्षोऽभवत्। अनन्तरं लीगीया अपि कार्यकारिण्या वाइसरायेण प्रवेशिता:, येषामसहयोगनीत्या लीगप्रेरितदेशव्यापि-साम्प्रदायिकसंघर्षेण विवशीभूता: कांग्रेसीया देशविभाजनं स्वीकृतवन्त:। अगस्तस्य १५ तारिकायां १९४७ खिृष्टाब्दे देशविभागानन्तरमयमेव अस्थायिसर्वकारस्य प्रथम: प्रधानमन्त्री भूत्वा अधुना प्रबन्धधुरं वहति। परमयोग्यतया विविधबाधा अपसार्य देशं परमोन्नते: शिखरं नेतुं बद्धपरिकरोऽयं तिष्ठति।

अयमस्ति गम्भीरविचारकोऽध्ययनशील:, उत्कृष्टलेखक: आङ्गल-भाषाया: प्रकाण्डपण्डितश्च। अयं राजनीतिपटु:, क्षिप्रकारी, स्वभावे-नातितीक्ष्ण:, विश्लेषणात्मकबुद्धि:, सिद्धान्तप्रेमी च विद्यते। भारतवर्षस्य नेतृत्वाय श्रीगान्धिनोद्घोषितमुत्तराधिकारमावहन्तमप्येनमेव स्वमार्ग-प्रदर्शनाय पश्यन्ति विश्वेऽपि आशामहाद्वीपवर्तिन: पौरस्त्या देशा:। भारतवर्षं "स्वचरमलक्ष्यं प्रतिनेतुं चिरञ्जीव तादयं महापुरुष:" इत्ये-वाशास्यते सर्वदा।

(उपसम्पादकस्य)

Funding by IKS-MoE

 CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

७—रूप्यकस्यात्मकथा

भ्रातः ! अद्यत्वे सर्वेऽपि महान्तो जनाः स्वानि चरितानि स्वयमेव वर्णयन्ति। अहमपि महतामनुकरणे गौरवं पश्यन् स्वचरितं सङ्क्षेपतो ब्रवीमि। प्रगल्भता चेदत्र क्षम्यताम्। इतः चतुर्षु वर्षेषु पुण्यपत्तनस्य टङ्कशालयामहं ताडितोऽभवमन्यमित्रैः साकं समादरेण समवलोकितो भूत्वा ततोऽहं राष्ट्रिये भाण्डागारे प्रवेशमुपलभ्य अनन्तरं सर्वजन-साधारणे न्यासालये समागच्छम्। तत एको धनिको मां गृहीत्वा अन्येनार्थजातेन सह यदा स्वगृहमागतस्तदा प्रकृत्या चञ्चलस्तस्य कनिष्ठः सुतो मामीक्षमाणो मदीयया सुषमया हृतचेताः पितुरनुमतिं विनैव अर्थमञ्जूषातो मामपहृतवान्। अयं च मां सततं स्वोपधानस्य अधस्ताद् निदधाति स्म। अहं च तदा तथाऽभिरूपो दीप्यमानश्चाभूवं यथा मदीयस्य बालस्वामिनो ज्येष्ठभ्राता मयि नितरां लोभं चकार। रात्रौ सुप्ते तस्मिन् मदीश्वरे बालके स उपधानस्याधस्तान् ममापहरणं कृत-वान्। श्वोभूते जागरितो मम स्वामी मामनवलोक्य दुःखितमना भूत्वा स्वभ्रातरमाशङ्कत। कालान्तरे तत्समीपे मामवलोक्य अवदत्—भ्रातः! चोरितस्त्वया मम रूप्यः, मां प्रत्यर्पय तमिति। यदा स न अर्पितवान् तदा तयोः कलहो जातः। चिरं कलहमाचरतोस्तयोराक्रोशं श्रुत्वा पिता तत्रागत्य कलहकारणमपृच्छत्। अनुजेन भणितम्—मम ज्येष्ठभ्राता मदीयं रूप्यं चोरयित्वया अधुनापि न प्रत्यर्पयतीति। ततस्तयोः पिता मधुरया वाचा कनीयांसमात्मजं समाश्वास्य ज्येष्ठं रूप्यक-प्रत्यर्पणाय प्रेरयत्। एवं कलहः शान्तोऽभवत्। अहं च तेनैव प्रीतिभाजा बालेन समुपलब्धः मया च ज्ञातः स्वविभवः।

कदाचिदहं तस्य अर्थभस्त्रातः छिद्रद्वारेण पतितोऽभवम्। केनचिद् दरिद्रेण चाहं प्राप्तः। स च सौनिकपार्श्वे गत्वा किञ्चिन्मांसं क्रीतवान्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मलीमसि तस्मिन्नापणे नाहं जीवितुमरोचयम्। परन्तु नहि कोऽपि ततो मोक्षोपायः प्राप्तः। व्यतीते प्रचुरे काले सौभाग्येन स दरिद्रः कस्यचित् कुसीदिकस्य अधमर्णोऽभवत्। तेन च सवृद्धिकस्य तदृणस्य निर्यातनाय अहं वार्धुषिकाय दत्तः। स च वार्धुषिक ईदृशो मितव्यय आसीत् येन स मम व्ययमविधाय लौहमञ्जूषायां निरुद्धवान्। मम स्वातन्त्र्यमपि विनष्टम्। प्रतिप्रातःकालं स कदर्यो मञ्जूषामुद्घाट्य सस्पृहं मामपश्यत्। चिरं तत्र निवसतो मम जीविताय ग्लानिः समुत्पन्ना। एकदा कदर्यस्यापि तस्य मोदकखादनस्य स्पृहा जाता। तेन मयैकेन रूप्यकेण मोदकाः क्रीताः।

तस्मात् मौदकीकादहं वाराणसीनिवासिन एकस्य वणिजो गृहमगच्छम्। सचैकदा रेलयानविरामस्थानं गमिष्यन् तांगायानपतये मां दातुमभिलाषुकोऽपि न जाने कुतः स्वसङ्कल्पपरिवर्तनमकरोत्। मन्ये सोऽचिन्तयदयं श्रेयांसं व्यवहारमर्हतीति। स च मम वर्तमानस्वामी कदाचिद् बान्धवान् द्रष्टुं प्रयागं गतस्तत्र प्रीतिपूर्वकं मामुपदशवर्षायै कन्यकायै सबहुमानमदात्। यतः शिशवो विवेकहीनाश्चञ्चलप्रकृतयश्च भवन्ति, नहि तेषां मर्माधिज्ञानम्, नैव तेषां हृदये मम सम्माननना, अतो नह्यहमभिरोचयामि तान्। तत्र शिशुकन्ययाऽहं, गगनमुत्क्षिप्त पार्श्वयोस्ताडितश्च यत्र तत्र निक्षिप्तः खेलान्ते चोद्याने क्वचिद्भुवि निखातः। कदाचित्कलहायमानेन तस्या भ्रातृव्येन रूप्यकात्मसात्करणस्य प्रतिज्ञा कृता। तत्प्रतिषेधायैव तयेदं कृतम्। तयाहं गन्धमूल्ये गान्धिकाय दत्तः। तत्र सर्वजनमनोहरा गन्धा मामधिवासयन्ति, विविधानि तैलानि च मां तर्पयन्ति। दुःखमुपभुक्तवतो मे सम्प्रति सुखोपलब्धिरतिसुखावहा जाता। इहैवावस्थितं आयुःशेषं क्षपयेयमित्यहरहः हरिं याचे।

(श्रीचारुदेवशास्त्रिणां प्र० तरङ्गणीतः संक्षिप्य सरलीकृत्य संगृहीतः)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विवेचनात्मका निबन्धाः—

१—धर्मं चर

कीट-पतङ्ग-पशु-पक्ष्यादियोनीर्लक्षशोऽतिक्रम्य मानवं जन्म लभते जन्तुः। अत्रायं प्राप्नोति स्वतन्त्रता-प्राप्त्यवसरम्, स्वस्वरूपभूतं परमानन्दं चाधिगन्तुम्। देवादियोनयोऽपि भोगयोनय एवेति दिव्यभोगासक्त-मनस्कतया नास्ति तत्रापि परमकल्याणाय प्रयत्नमाचरितुं जन्तोरवसरः। मानवजन्मैवास्ति सर्वोत्तमोऽवसरो यत्र समस्तमपि कल्याणमभ्युदयं निःश्रेयसं वा साधयितुं शक्यते। मानवो हि कर्मणि स्वतन्त्रः शुभमशुभं वा यथेच्छं कर्तुं पारयति। मानव एव च विधिनिषेधगोचरः, सर्वाणि शास्त्राणि मानवमेव शासति 'इदं कुरु' 'इदं च मा कार्षीः' इति। तत्रायं साधु कृत्वा अभ्युदयं निःश्रयेसं वाधिगन्तुं क्षमते, अन्यथा कृत्वा च नीचान्नीचतरं जडभावमपि प्रयाति। सर्वशास्त्रेषु च मूर्धन्यतमं वेदः, स एव विस्तरेण मानवकर्तव्यमाचरणीयं सर्वतो भावेन शिक्षयति। अतएव च ब्रह्मचर्याश्रमे चतुर्विंशतिवर्षाणि यावद् ब्रह्मचर्यव्रतपालन-पुरस्सरं पुरा नियमेनाधीयते स्म वेदः, येन मानवोऽयं कर्तव्यमाचरणीयं वाऽऽत्मनः सर्वतो भावेनाधिगच्छेत्। अनेकैः प्रकारैर्विविधैश्च विधिभिः सर्वं शिक्षयित्वाऽन्ते आचार्यकुलात् प्रतिनिवर्तमानं ब्रह्मचारिणं प्रति सर्वसारभूतोऽयमाचरणीयोपदेश आचार्यस्य, यथा—वदमनुसूच्याचार्योऽन्ते-वासिनमनुशास्ति—"धर्मं चर" इति।

अनुशासनमिदं धर्ममेव मानवमात्रस्य कृते एकमात्रमाचरणीयं प्रतिपादयति। सिद्धञ्चैतत् पुरुषार्थचतुष्टये धर्मार्थ-काम-मोक्षाख्ये सर्वप्रथमो धर्मः चरमश्च मोक्षः। मोक्षो हि नाम मानवजीवनस्य परमं लक्ष्यं ध्येयं प्रापणीयं वा, अयमेव पर्य्यायान्तरैः परमानन्द

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ईश्वरप्राप्तिरात्मपदलाभश्चेति व्यवह्रियते । तस्यैतस्य परमपुरुषार्थस्य मानवजीवनचरमलक्ष्यस्य मोक्षस्यैकमात्रं साधनं धर्म एव। अर्थकामौ हि सर्वप्राणिसाधारणौ मध्यमौ पुरुषार्थौ, धर्मानुकूल्येन साधितौ च तौ न भवतः प्रतिकूलौ परमपुरुषार्थसाधने, भवतश्च प्रत्युताऽनुकूलौ एव। परमपुरुषार्थं मोक्षमधिगतवतो नावशिष्यते पुनः प्रापणीयं किञ्चित्, तत्साधनतया धर्ममाचरतश्च नास्ति किमप्यन्यदाचरणीयम्, यदवशिष्यते। शब्दान्तरेषु मोक्षमवाप्य "नानवाप्तमवाप्तव्यम्" धर्मं च कृत्वा "कर्तव्यं नावशिष्यते"।

साम्प्रतं च विचारणीयं कोऽयं धर्मो नामेति–'ध्रियतेऽनेन, धरति असौ' वेति धर्मपदनिर्वचनम्। "धारणाद्धर्ममित्याहुः" इति शास्त्रवचनं च। येन मानवो ध्रियते यो मानवं धरति स 'धर्मः' इति। अर्थाद् येन मानवो मानवोऽस्ति स धर्मः, धर्म एव मानवता, मानवतैव च धर्मः। यदि मानवे मानवतैव नास्ति, तदा नास्ति स मानवः, धर्महीनो हि मानवः पशुर्मन्यते एव। आहारनिद्रादयस्तु भावाः पशौ मानवे च समानाः। अस्ति खलु कश्चिद् विशिष्टो भावः, यो हि मानवं पशोर्विशिनष्टि। सोऽयं धर्म एव, यस्य चेदं लक्षणं सार्वतोभद्रं सार्वभौमं च मान्येन मुनिना कणादेन वैशेषिकदर्शने समुदघोषि–"यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः" इति। येनाचरणेन अभ्युदयः—लौकिक-पारलौकिक-सुखसमृद्धिलाभः; निःश्रेयसं परमानन्दपदलाभश्च भवति स धर्म इति लक्षणसूत्रार्थः। अथ किं तत् कर्म आचरणं वा यद् अभ्युदयनिःश्रेयसयोः कारणीभूतं स्यादिति चेत्—श्रुति-स्मृतिसदाचारात्मसन्तुष्टिप्राप्तमेव कर्म आचरणं वा तथेति गृहाण। उक्तं च धर्मे प्रमाणमुद्घोषयता धर्मशास्त्रेण—

"वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम्॥"

तत्र धर्मे मुख्यं प्रमाणं वेद एव, वेदार्थमेव विशकलयन्ती स्मृतिः, तदुभयसमर्थितश्चाचारः तदनुकूलैव आत्मसन्तुष्टिर्धर्मे प्रमाणम्। तथा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चोक्तम्–"धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः।" तत एव च वेदविहितोऽर्थो धर्म इति धर्मलक्षणं करोति मीमांसाशास्त्रम्। स चायं धर्मो दशाङ्गः सङ्गृह्य प्रादर्शि मनुस्मृतौ—

"धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्॥"

दशाङ्गोऽयं धर्मो विश्वजनीनः सार्वभौमश्च। आर्यो वा अनार्यो वा भारतीयो यूरोपीयो वा गौराङ्गः कृष्णाङ्गो वा यवनो वा याहूदी वा जयपानीयः चीनीयो वा रूसीयोऽफ्रीकीयो वा मानवशब्दभाक् प्राणी एतेन दशाङ्गेन धर्मेण यदि सम्पन्नस्तदा भवितुमर्हति स मानवः, नो चेन्न मानव इति शक्यते वक्तुम्। एषैव खलु मानवता, या तत्तत्सम्प्रदायाचार्यैर्यत्किञ्चिदन्तरेण पर्यायान्तरैः स्वस्वनियमेषु धर्मत्वेन प्रतिपादिता। आर्यशास्त्रेषु च समासव्यासाभ्यां क्वचिद् यमनियमरूपेण, अन्यत्र सामान्यधर्मनाम्ना, अपरत्र सनातनधर्माभिधानेन वा प्रपञ्चिता। विचार्यतां च स्वयम्—धृतिक्षमाऽस्तेय-सत्य-शौचेन्द्रियनिग्रहविद्यादिभिर्धर्मलक्षणैर्हीनोऽपि कश्चित् किं मानवो भवितुमर्हति? पर्यायान्तरे पशुरेव सः। अत एव च धर्मलक्षणैरेतैर्हीनाः प्राणिनो मानवाकृतयोऽपि राक्षसा दानवा वा उच्यन्ते। सिद्धमिदं धर्म एव मानवता मानवतैव च धर्म इति। इत्येतत्सामान्यधर्मेभ्योऽतिरिक्ता विशेषधर्माणामस्ति समाजसङ्घटनाय सृष्टिः। यत्रान्तर्भवन्ति खलु वर्णधर्मा आश्रमधर्माश्चेत्यादयः। मानवो हि सामाजिकः प्राणी; समाजाश्रितं च तस्य जीवनम्। समाजश्च बुद्धिबलम्, बाहुबलम्, आर्थिकबलम्, शिल्पकलादिबलं चाधारीकृत्य भवति साधु सङ्घटितः, अतस्तदावश्यकतां पूरयति चातुर्वर्ण्यम्, बुद्धिबलप्रधानो ब्राह्मणः, बाहुबलप्रधानः क्षत्रियः, आर्थिकबलप्रधानो वैश्यः, शिल्पकलादिप्रधानः शूद्रः। तेषामेतेषां चतुर्णामपि वर्णानां

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समष्टिः सुसङ्घटितो मानवसमाज एव विराट्पुरुषत्वे समुपवर्ण्यते वेदे :—

"ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः ।
उरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥"

वस्तुतो धर्म एव वैयक्तिकं सामाजिकं लौकिकं पारलौकिकं वा कल्याणं साधयितुमलम् । धर्माचरणेनैव शुद्धं जायतेऽन्तःकरणम् । येन पुरुषो देवो भूत्वा देवान् यष्टुमधिकारी भवति । देवोपासनया च विविधानि लौकिकान्यलौकिकानि च सुखानि भुङ्क्ते । अन्ते धर्माचरणद्वारा शुद्धान्तःकरण एव पुरुषः परमानन्दं मोक्षमपि लभतेऽनायासं, लोके सामाजिकी व्यवस्थापि धर्मणैव कष्टमन्तरा सिद्ध्यति । यद्धि राजकीयविधानसहस्रैरपि साधयितुं काठिन्येनांशत एव पार्यते, तद्धर्मणाऽनायासमेव साधयितुं शक्यते । प्रजाकल्याणाय चौर्य-लुण्ठनादिनिवारणाय नृपतिभिः कठोरातिकठोरा यन्त्रणा दीयन्ते सहस्रो यत्नाश्चाचर्यन्ते यदर्थं भूयानर्थव्ययो रक्षापुरुषव्यवस्थादिप्रपञ्चश्च भवति करणीयः; परं धर्मस्याऽस्तेयनियमप्रचारणेन सहानुभूति-समवेदनादिसद्भावजागरणेन स्वयमेव तथाविधाः सर्वेऽप्यत्याचारा निवर्तन्ते । धर्मस्यास्त्यादेशः—'परद्रव्याणि लोष्ठवत्', 'मातृवत् परदारेषु' 'आत्मवत् सर्वभूतेषु' । अयं खलु धर्म एव सर्वेषामुद्दण्डानां नियामकः, किम्बहुना उद्दण्डस्य राज्ञोऽपि नियामको धर्म एव । धर्म एव जगतः प्रतिष्ठा, धार्मिक एव सर्वेषां पूज्यः धर्म एव सर्वेषां पापानां निवारकः, सर्वं चेदं धर्मे प्रतिष्ठितम्, यथाहुस्तैत्तिरीयाः—"धर्मो विश्वस्य जगतः प्रतिष्ठा, लोके धर्मिष्ठं प्रजा उपसर्पन्ति धर्मेण पापमपनुदन्ति धर्मे सर्वं प्रतिष्ठितं तस्माद्धर्मं परमं वदन्ति ।"

धर्म एव च ब्राह्मणस्य ब्राह्मणत्वं स एव क्षत्रियस्य क्षत्रियत्वं वैश्यस्य वैश्यत्वं शूद्रस्य शूद्रत्वं पुरुषस्य पुरुषत्वं, स्त्रियः स्त्रीत्वं च, किम्बहुना सर्वेषामपि तत्त्वं धर्म एव । धर्मं विना मानवो नास्ति मानवः, किन्तु दानवः मणिहीनो नागो दाहहीनो वह्निश्चन्द्रहीना निशा च यथा निस्सारा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निश्शोभा च विद्यते तथैव धर्महीनो मानवः। सुखशान्तिमूलं धर्म एव—यदा जगति धार्मिका भावा जागरिता अभूवन् गेहे गेहे देशे राष्ट्रे विश्वस्मिन् विश्वे च तदासीत् शान्तेः साम्राज्यम्। वर्तमानयुगीनास्तु सुधारकम्मन्या नेतारो धर्मं दूरतो निक्षिप्य सुखं शान्ति च नीत्या साधयितुं कामयन्ते, धर्मं चाभ्युदयसाधने प्रत्युत बाधकं मन्यन्ते, दयनीयाः खलु ते वराका यतो भ्रान्तास्ते धर्मस्य वास्तविकतत्त्वमजानन्तः परम्परा-प्रचलिताः काश्चिद् विकृता रूढीरेव धर्मं मन्यमानाः सन्ति। समस्तानां सुखानां शान्तीनामन्ततः परमानन्दप्राप्तेरपि साधनं धर्म एव। धर्मेऽ-विश्वासस्य पारस्परिककलहस्य प्रवञ्चनायाः प्रतारणस्य च कृते स्थान-मेव नास्ति। धार्मिको हि मानवः सर्वान् सुहृद् एव वाञ्छति, प्रार्थयते च भगवन्तम्—

"मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्
मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे।
मित्रस्य चक्षुषा समीक्षामहे।"

किन्न दृष्टमेतदितिहासंग्रन्थेषु विपश्चिद्भिर्यत् धर्मपरायणा व्यासवसि-ष्ठादयो महर्षयः शुक-वामदेवप्रभृतयो विज्ञानिनः, जनकयुधिष्ठिरादयो राजर्षयश्च केवलस्य धर्मस्याश्रयेणैव समस्ताभ्युदयं निःश्रेयसं चाधिजग्मुः। अहो धर्ममूर्तेर्मर्यादापुरुषोत्तमस्य भगवतः श्रीरामचन्द्रस्य धर्ममर्यादामये राज्ये कीदृशी परमा शान्तिर्बभूव, राजा वा प्रजा वा सर्वे सन्तुष्टाः प्रसन्नाः। नासीत् कोऽपि दुःखी असन्तुष्टो वा, अद्यापि शान्तिमयं शासनं स्मरन्तो नरा रामराज्यमानेतुं कामयन्ते। यौधिष्ठिरं धर्मराज्यं कामयमाना हि तात्कालिकी प्रजा धर्मविरुद्धं कौरवराज्यं नाङ्गीचकार। धर्ममतिक्रम्य निर्मयादं प्रवर्तमानानां महामहतामपि साम्राज्यानि धूलि-धूलितानि बभूवुः। यत्र निदर्शनानि हिरण्यकशिपु-रावण-वेन-दुर्योधनप्रभृतयो न सन्ति परोक्षा विपश्चिदपश्चिमानाम्। धार्मिका हि नृपतयः प्रजाः स्वाः प्रजा इव पालयन्तो धर्मेणावर्तन्त, प्रजायाः कल्याणाय स्वं सर्वस्वमपि त्यक्तवन्तः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धर्माचरणमेव पुंसो वास्तविकं परमात्मपूजनं येन सर्वा सांसारिकी व्यवस्था पुरुषस्य वैयक्तिकं जीवनं च सर्वोच्चतरं च भवितुमर्हति। धर्मशब्दे एव सर्वमपि मानवकर्तव्यं समायाति; येन स निजां मानवतां सफलयितुं भवति समर्थः। मानवजीवन-चरमलक्ष्यं परमा शान्तिः सच्चिदानन्दपदप्राप्तिरेतेन धर्माचरणेनैव सिद्ध्यति। सर्वमिदं रहस्यजातं निभालयन्तो धर्माचार्या एकमात्रं धर्ममेवाऽऽचरणीयमुद्घोषयन्ति। एतमेव च सिद्धान्तं मनसि निधाय आचार्यकुलाद् निवर्तमानमन्तेवासिनमाचार्यो दीक्षान्तभाषणे उद्बोधयन्ननुशास्ति—"धर्मं चर" इति।

(सम्पादकस्य)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

२—ब्रह्मचर्यम्

पुरा शतायुषः सहस्रायुषश्च पुरुषा बभूवुः, शान्ता दान्ताः परिपुष्ट-शरीराः सुधीरा महावीराः सुन्दरतरविशालाकृतयो विपुलशक्तयः साक्षात्कृतसकलतत्त्वाः, शुद्धसत्त्वाश्च। अद्यत्वे पुनर्यो वै षष्टिवर्षाणि जीवति मन्यते स दीर्घजीवी; कश्चिदेव महाभागः शतं वर्षाणि जीवति। विश्वेऽपि विश्ववासिनः प्रायो जर्जरितदेहा विकृताकृतयः क्षीणशक्तयो मलिनमतयः कातरस्वान्ता अशान्ता वामनाकाराः प्रोद्भूतविकारा अनेकरोगाक्रान्ताश्च विद्यन्ते। प्रतिशतं पञ्चविंशतिः पुरुषास्तु क्षय राजयक्ष्मादिभिः पापरोगैः कतिचन जीवनदिनानि गणयित्वाऽकाले एव कालकवलिता जायन्ते। बहवश्च द्वित्रेष्वेव हायनेषु गर्भयातना एव भोक्तुमागता इव बाला एव विपद्यन्ते। किमत्र कारणं सम्बोभवीति ? नहि किमपि प्रकृतिपरिवर्तनम्, कुतोऽस्माकमियं दुरवस्था ? कि कारणं वरीवृध्यमानस्याकालमरणस्य ? किमिति च स्वजीवनोद्देश्यं पूरयितुं न पारयामहे ? इति प्रश्नपरम्पराया एकमेवोत्तरम्—यद् "ब्रह्मचर्याभाव एवैकमात्रं कारणम्" ब्रह्मचर्यमेव तदमूल्यं रत्नं यद्विनाशाद् वयं नरककीटा इव बहोः कालात् चेखिद्यामहे अनन्तानि कष्टानि च भुञ्ज्महे।

अथ किमिदं ब्रह्मचर्यं नामेति विचारणीयं सम्प्रति—"गुप्तेन्द्रियस्योपस्थसंयमो ब्रह्मचर्यम्" इति पातञ्जलयोगभाष्ये व्यासः। परं स संयम इतरेन्द्रियसंयमपूर्वकमेव क्रियमाणः सफलो भवति न केवलमुपस्थसंयमो ब्रह्मचर्यमुक्तम्। अत एवाष्टविध-मैथुनपरित्यागस्य ब्रह्मचर्यत्वमवाचि यथा—

स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम्।
सङ्कल्पोऽध्यवसायश्च क्रियानिर्वृतिरेव च॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः।
विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणम् ॥

अत्र क्रियानिर्वृति-(सम्भोग)-वर्जनमेव उपस्थसंयमरूपा मुख्या अष्टमी विधा ब्रह्मचर्यस्य इतराश्च सप्तापि मनोबुद्धिसहित-चक्षुरादि समस्तेतरेन्द्रियसंयमान् मुख्यसिद्धयेऽपेक्षितान् प्रतिपादयन्ति । "ब्रह्म—वेदः तदध्ययनार्थं चर्यमाणं व्रतं ब्रह्मचर्य" मिति वेदाध्ययनार्थं क्रियमाणं व्रतविशेषं ब्रह्मचर्यं वदन्ति । इदमेव च ब्रह्मचर्याश्रमः। परमत्रापि उपस्थसंयमो वीर्यरक्षैव ब्रह्मचर्यमिति तत्त्वम् । ब्रह्माचर्याश्रम एव वीर्यरक्षायाः क्रियात्मकः प्रकारः। नैनमन्तरा वास्तविकी वीर्यरक्षा केनापि प्रकारान्तरेण भवितुमर्हति, वीर्यरक्षां विना च कथं पुरुषार्थप्रतिपादकानां वेदानामधिगमः। अत एव ब्रह्मचर्य–वेदाध्ययनयोरेषोऽनिवार्यः सम्बन्धः । योगसूत्रेऽपि "ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः" इति प्रतिपादितमस्ति । अतः पुरुषार्थचतुष्टयमवाप्तुमावश्यकं ब्रह्मचर्यपालनम् ।

वीर्यं हि शरीरे सप्तमः सर्वोत्तमोऽन्तिमो धातुः, यथा चोक्तं सुश्रुताचार्येणापि—

"रसाद्रक्तं ततो मांसं मांसान्मेदः प्रजायते ।
मेदसोऽस्ति ततो मज्जा मज्जायाः शुक्रसंभवः ॥"

शुक्रं वीर्यमिति नार्थान्तरम् । वीर्येणैव शारीरिकी मानसिकी च पूर्णता लभ्यते । वीर्यं सर्वशक्तीनां राजा शरीरे । एतद्बलेनैव शरीरस्थाः सर्वा अपि शक्तयः स्वकार्याणि कुर्वते । वीर्यनाशेऽन्यशक्तीनामपि नाशः, मरणमेव सम्पद्यते पुरुषस्य । कथितमपि—

"मरणं बिन्दुपातेन जीवनं बिन्दुरक्षणात्" इति वीर्ये रक्षिते एव शरीरं सुव्यवस्थितं तिष्ठति, अन्यथा अनेकविधरोगाक्रान्तं भवत्येव । वीर्यरक्षया तु सर्वा अप्यार्तयः सर्वथा दूरतः परित्यजन्ति, अकालमृत्युरपि भीत एव पला-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यते ब्रह्मचारिणः। श्रुतिरप्यत्र—"ब्रह्मचारी न काञ्चनार्तिमार्च्छेत्" "ब्रह्मचर्येण तपसा देवा मृत्युमपाघ्नत"।

ब्रह्मचर्यपालनेन पुरुषार्थचतुष्टयरूपं जीवनोद्देश्यं पूरयितुं पारयति पुरुषः। अत एव परमकारुणिकैर्महर्षिभिर्मानवजीवनं चतुर्धा आश्रमेषु विभज्य तत्र मुख्यत्वं ब्रह्मचर्यस्य प्रतिपादितम्। यतः प्रथमे एव आयुषो भागे क्रियात्मकरूपेण निष्पन्नया वीर्यरक्षया शारीरिकीं मानसिकीञ्च योग्यतां प्राप्य द्विजा आश्रमान्तरेषु प्रवेशं लभेरन्। तथाचरतां च तेषां न कापि विपत्तिः। तदा ब्रह्मचर्याश्रमे गुरुकुलेषु च प्राकृतव्यवस्थाऽऽनुकूल्यात् क्रियात्मकतयाऽनायासमेव पालिता अभूवन् वीर्यरक्षानियमाः। अत एव तदानीन्तना मानवाः शान्ताः, शुद्धान्तःकरणाः, महाबलिनः, प्रतिभाशालिनः, अतुलप्रभावाः, समुद्भूतसद्भावाः, हृष्टपुष्टशरीराः, वीराः, दीर्घायुषः, सत्यप्रतिज्ञाः, सकलरहस्याभिज्ञाः, परमपवित्रा अनुकरणीयचरित्रा वशिष्ठ-गौतम-भृगु-कणाद-पराशरप्रभृतयो ब्राह्मणाः भगीरथ-राम-युधिष्ठिर-कर्णार्जुन-भीमादयो राजन्याश्चाभवन्। को न जानाति आजन्मब्रह्मचारिणः प्रातःस्मरणीयनाम्नो भीष्मपितामहस्य नाम चरितञ्च, यस्याग्रे भगवतः श्रीकृष्णस्यापि शस्त्राऽग्रहणप्रतिज्ञा भग्ना, यश्चान्ते चिरं बाणशय्यामधिशयानः स्वेच्छया उत्तरायणे प्राणान् तत्याज। कस्याविदितो महावीर्यस्य श्रीमतो हनूमतो ब्रह्मचर्यप्रभावः, येन स परमदुष्करं समुद्रलङ्घनादिकमकरोत्।

परमद्य कलिकालदुर्विलासेन सा चिरन्तनी आश्रमपद्धतिर्विनष्टा, विलीना ब्रह्मचर्यमर्यादा विलासप्रायेऽस्मिन् युगे; सर्वे विलासिताया दासाः, क्व तेषु ब्रह्मचर्यम्? ते हि दिने दिने स्वप्नस्खलितवीर्यतया हीनवीर्यतामापद्यमाना नपुंसकतां प्राप्ताः सन्ति। युवकेषु हीनवीर्यतया समस्ता अपि तज्जनिता दोषा हानयश्चाद्य प्रत्यक्षमनुभूयन्ते। तेषां दशामवलोक्य हृदयं विदीर्यते। कथंकारं स्यात् साम्प्रतमपि वीर्यरक्षा। पुरातनी ब्रह्मचर्याश्रममर्यादा न सम्भविनी युगेऽस्मिन्। परं सन्ति केचन नियमास्तादृशा येषां

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दृढतया पालनेन साम्प्रतमपि वीर्यरक्षा कर्तुं शक्यते, ब्रह्मचर्यं च पालयितुं पार्यते, युवकैरत्र परमसावधानैर्भवितव्यम् । ते च नियमा सङ्क्षेपतः प्रतिपाद्यन्तेऽधस्तात् ।

(१) **भावशुद्धिः**—विकृतैर्भावैर्विनश्यति वीर्यम्, कामविकारमया भावाः सर्वथा परित्याज्याः । शुद्धानां सात्त्विकानाञ्च भावानां समुत्पत्तये उच्चवयस्कासु स्त्रीषु मातृभावं, समानवयस्कासु भगिनीभावं, अल्पवयस्कासु च पुत्रीभावं भावयेत् । अन्यच्च—दुःसङ्गः सर्वथा परिहर्तव्यः, अश्लीलवार्तालापो न विधेयः, मनोविनोदायापि शृङ्गारमयं साहित्यं नैव पठनीयम्, वैलासिकानि गीतानि न शृणुयात्, स्त्रीपात्रप्रायाणि नाटकानि चलचित्राणि च कदापि न पश्येत्, भगवद्गीतादिसद्ग्रन्थानां स्वाध्यायो विधेयः, वीररसमयानि चरितानि पठेत्, रात्रौ शयनकाले प्रातः प्रबोधकाले च भावशुद्धये भगवन्तं प्रार्थयेत् ।

(२) **नियमितो व्यायामः**—वीर्यरक्षायै यथाबलं व्यायामोऽवश्यं करणीयः । तेन भुक्तमन्नं सद्यः पच्यते, सर्वापि शारीरिकी रसादिक्रिया सुव्यवस्थिता भवति, रोगा विनश्यन्ति, उत्साहश्च वर्धते । एवं वीर्यं शुद्धं स्थिरं च भवति ।

(३) **शुद्धवायुसेवनम्**—प्रतिदिवसं सायं प्रातश्च शुद्ध-स्वच्छवायुमवश्यं सेवेत । तेन शारीरिकं मलिनतत्त्वं विनश्यति । जनसम्बाधमये स्थाने तु वायुर्मलिनो जायते, अतो यथाशक्यं दूरे एकान्ते च वनादौ निवसेद्, भ्रमणं वा कुर्यात् । इत्थमारोग्यं वर्धते, वीर्यं स्थिरीभवति, बुद्धिविकासश्च जायते ।

(४) **सात्त्विक आहारः**—वीर्यरक्षायै सात्त्विकाहारा विधेयाः; यतो भुक्तमन्नमेव मनोरूपेण परिणमते, आहारस्य सात्त्विकत्वे मनोऽपि सात्त्विकं भविष्यति, नहि तदा तत्र राजसास्तामसाश्च कामविकारमया भावाः । सात्त्विकश्चाहारो गीतायामुक्तः—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"आयुः-सत्त्व-बलारोग्य-सुख-प्रीतिविवर्धनाः ।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः ॥"

एतद्विपरीताः सर्वथा परित्यक्तव्याः । इत्थमपि वीर्यं स्थिरं शुद्धञ्च भवति ।

(५) **ईश्वरोपासना प्राणायामश्च**—वीर्यरक्षायै ईश्वरोपासनायाः प्राणायामस्य च विद्यते परमाऽऽवश्यकता । एतेन मानसा भावाः शुद्धा भवन्ति । त्रैवर्णिकानां सन्ध्योपासने सर्वमिदं समाविशति । गायत्रीमन्त्रजपेन तु भूयान् लाभो भवति ।

(६) **विलासितावर्जनम्**—विलासिता वीर्यरक्षाया महान् शत्रुः । परमद्य विलासिताया एव साम्राज्यम् । वीर्यरक्षायै वैलासिक-वेशभूषादिकं सुगन्धिततैलसाबुनादिकं च सर्वथा परिहर्तव्यम् । सात्त्विकः साधारणो वेशो वीर्यरक्षायामत्युपयोगी मन्यते ।

(७) **आत्मनिरीक्षणाभ्यासः**—रात्रौ शयनात्प्राग् आत्मनिरीक्षणं प्रत्यहं क्रियताम्, यत्पालनाय प्रतिज्ञाताः सर्वे नियमाः पालिता भवन्ति न वा ? कुत्र स्खलितं जातम्, तत्र प्रायश्चित्ताय प्रतिज्ञा क्रियताम् । एवं निरन्तराभ्यासेन नियमानां पूर्णतया पालनं प्रचलिष्यति । प्रमादस्याऽपुनरावृत्तये प्रायश्चित्तं क्रियताम् ।

नियमसप्तकस्यैतस्य पालनेऽवश्यं वीर्यरक्षा भवितुमर्हति, ब्रह्मचर्यं तत्त्वतः पालितं भविष्यति । तपस्विजीवनेन वीर्यरक्षणं, तेन चास्ति मानवजीवनस्य साफल्यम् । अतः लौकिकं पारलौकिकञ्च सुखं तथा परमपुरुषार्थंमोक्षमधिगन्तुं ब्रह्मचर्यमवश्यमेव पालनीयम् ।

(सम्पादकस्य "आदर्शप्रस्तावरत्नमाला"तः संक्षिप्य संगृहीतः)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

३–विद्या सर्वोत्तमं धनम्

सर्वशक्तिमता भगवता जगति समुत्पादितेषु द्रव्येषु विद्या नाम द्रव्यं सर्वश्रेष्ठं सर्वप्रधानञ्च वर्तते। मनुष्येभ्यो विद्याया अतीवाऽऽवश्यकता वर्तते। यः पुरुषो विद्याविहीनोऽस्ति स असभ्यो ग्रामीणः, मूर्खः, निरक्षर-भट्टाचार्य इत्याद्यनेकैरुपाधिभिर्विभूष्यते जनैः। किं बहुना साहित्यसंगीताभ्यां विरहितस्य पुरुषस्य तु साक्षात्पशुरिति नाम कृतं श्रीमता भर्तृहरिणा। तेनोक्तम्—

साहित्यसंगीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः।
तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनाम्॥''

आहार-निद्रा-भय-मैथुनानि पशुमनुष्ययोः समानानि। विद्यैव तयोर्भेदबुद्धिमुत्पादयति। को धर्मः, कोऽधर्म इति विद्ययैव ज्ञातुं शक्यते। अत एव विद्या-विरहितस्य पुरुषस्य तुलना पशुनातीव समीचीना वर्तते। मूर्खस्य जीवनं व्यर्थमेव। यतः स न किमपि कर्तुं प्रभवति। विद्वद्भिस्तस्य निरादरः क्रियते, जनैः स उपहस्यते, विचारशीलैर्नाद्रियते। स तु धराया भारभूत एव तिष्ठति।

"विद्याधनं सर्वधनप्रधानम्" इति यदुक्तं तत्र को हेतुः ? तदुच्यते– विद्याधनस्य सर्वश्रेष्ठत्वं विशेषता वा वर्तते यत् सर्वं धनं व्ययात् क्षयमाप्नोति, नाशमायाति, परन्तु विपरीतमस्माद् विद्याधनं सञ्चयात् क्षयं गच्छति, व्ययाच्च वृद्धिमाप्नोति। कुबेरस्याऽपि असंख्यः कोशो व्ययात् निश्चितमेव कस्मिश्चिद् दिने रिक्तो भविष्यति। परन्तु अहो विशेषता विद्याधनस्य यदिदं मुहुर्मुहुर्व्ययमापन्नमपि नैव नाशं प्रयाति।

द्वितीया विशेषताऽस्य विद्याधनस्येयमस्ति यदिदं धनं न केनापि चोरयितुं शक्यते। अत्यन्तनिपुणा अपि चौराः विद्याधनं कौशलेनाऽपि चोरयितुं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न शक्नुवन्ति, परन्तु ते अन्यधनं लीलयैव हर्तुं पारयन्ति। क्रूरोऽपि राजा विद्याधनं हर्तुं न प्रभवति। धनमिदं तस्याऽधिकारस्य नाऽस्ति विषयः, न कोऽपि विद्वान् पण्डितो राजाज्ञया विद्याविरहितः कर्तुं पार्यते। विद्याधनं भ्रातृभाज्यमपि नास्ति। भ्रातरो विद्याधनं न विभक्तुं प्रभवन्ति। यतः बुद्धिस्थिता विद्या न विभागकरणस्य विषयः। अतो भ्रातॄणां मध्ये धन-विभाजनसमये विद्याया विभाजनं न क्रियते। धनस्य राशिर्भारयुक्तो भवति। न च लक्षसंख्याकाः किं वा दशसहस्रसंख्याका रूप्यका अत्यन्त-श्रमोत्पादकत्वात् भारकरणाच्च केनाऽपि दूरं वोढुं पार्यन्ते। परन्तु विद्याधनं न कदापि भारकारि भवति। न कोऽपि महामहोपाध्यायः समधिकविद्या-ऽध्ययनकारणेन केनाऽप्यन्येन पुरुषेण सह तुलायां गुरुतां प्राप्नोति। न च सर्वतन्त्रस्वतन्त्रः कोऽपि षट्शास्त्री स्वागाधपाण्डित्येन मार्गमटितुं श्रममनु-भवति। अस्माकं कथनस्यायमेवाऽभिप्रायो यद् विद्याधनं न कदापि भारं करोति।

विद्या मनुष्यस्य सदा सहचरी वर्तते। तस्य विविधेन प्रकारेणोपकारं करोति। विद्या मनुष्यं मातेव रक्षति। यथा माता बाल्यकाले स्वशिशून-बोधबालकान् व्याधिभ्यो रक्षति, तथैव विद्याऽपि अनुभवशून्यस्य जनस्या-नेकापद्भ्यस्त्राणं करोति। विद्या पितेव हितकार्ये मनुष्यं नियोजयति। यथा पिता स्वपुत्रं कुशलतासमन्विते हितकारके च कार्ये प्रेरयति तथैव विद्याऽपि मनुष्याय कर्तव्याकर्तव्ययोर्ज्ञानं ददाति। येन ज्ञानेन प्रेरितो मनुष्यो हितकारकं कार्यं करोति, अहितञ्च त्यजति। विद्या मनुष्यस्य शोभां विस्तारयति। राजसभायां विद्वानेव हि पुरुषः समादरं प्राप्नोति राज्ञा चाद्रियते।

विद्या मनुष्यस्य दिक्षु कीर्तिं विस्तारयति, सप्तसमुद्रपारमपि यशः प्रापयति। अधुनाऽपि यत् सर–राधाकृष्णवेङ्कटेशरमणप्रभृतयः संसारप्रसिद्धाः पुरुषा वर्तन्ते भारते, तत्किं विपुलेन धनेन? उताहो प्रभूतेनाऽधिकारेण? नहि नहि विद्ययैव। कोऽधुना संसारेऽस्मिन् साक्षरो-ऽस्ति येन जगत्प्रसिद्धस्य स्वनामधन्यस्य रवीन्द्रनाथठाकुरस्य नाम नैव

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रवणगोचरीकृतम् । कोऽस्ति खलु वैज्ञानिको यो "रमणं" न जानाति । अस्माकं कथनस्य अयमेवाऽभिप्रायो यद् विद्यया जगति विपुलां कीर्ति लभते मनुष्यः ।

विद्यापठनेन मनुष्यो धनं प्राप्नोति, अत एव सुखं भुङ्क्ते । यदा मनुष्यो विदेशं गच्छति तदा विद्यैव तस्य सहायतां करोति । अज्ञात-प्रदेशेऽपि यद् मनुष्यो गच्छति तत्तु विद्याबलेनैव । अधुनाऽपि वायु-यानचालका निराधारे मार्गे यत् स्ववायुयानं चालयन्ति तदपि विद्या-बलस्यैव प्रभावः । किं बहुना सीमारहितेऽपि समुद्रे ये पोतं चालयन्ति तेऽपि पोतविद्ययैव तत्कार्यं सम्पादयन्ति । यथा पूर्वमेवोक्तं राजसभासु विद्यैव पूज्यते न धनम् । अत एव विद्यायाः सर्वथा सर्वदा चातीवाऽऽ-वश्यकता वर्तते ।

चतुर्वर्गफलप्राप्तिरपि सुखाद् विद्ययैव संभवति । विद्या विनयं ददाति, विनयेन च मनुष्यः पात्रतां याति, पात्रत्वाद् धनमाप्नोति । अत एव चतुर्वर्गस्य प्रथमो वर्गो धनरूपो (अर्थः) विद्ययैव लभ्यते । धनेन मनुष्यो दानं ददाति । धर्मशालानिर्माणं, मन्दिराणां जीर्णोद्धारं, तीर्थाटनं, देव-पूजनादिकं पुण्यं कर्म करोति । अत एव धर्मस्य सञ्चयं करोति ।

यथा धनेन धर्मः सञ्चीयते, तथा धनेनैव कामस्यापि प्राप्तिर्भवति । धनेन मनुष्यः सुधाधवलितं प्रासादं निर्माति । जलक्रीडार्थं वापीत-डागादीनां निर्माणं करोति । नानाऽऽस्वादजनकानि भोजनानि भुङ्क्ते, बहुमूल्यवस्त्राणि परिधत्ते । अनेन प्रकारेण तृतीयवर्गस्य कामस्यार्जनं करोति । विद्यया मनुष्य आत्मपरमात्मनोरभेदं पश्यति । क्रमशः स ब्रह्म जानाति तथा तज्ज्ञात्वा तद्रूपो भवति । श्रुतिभिरपि प्रतिपादितं यद् "ब्रह्मविद् ब्रह्मैव भवति" "ऋते ज्ञानान्न मुक्तिः" । अतः एव मुक्तौ ज्ञानस्य परमावश्यकता वर्तते । अनेन विधिना मनुष्यः स्वजीवनस्य समग्रं फलं चतुर्वर्गाख्यरूपम् 'अर्थ-धर्म-काम-मोक्षाभिधं' विद्ययैव प्राप्नोति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विद्ययैव कालिदास–भवभूति–जयदेवादयो महाकवयोऽमरत्वं प्राप्नुवन्। तेषां कोमल-कान्तपदावली साम्प्रतमपि सहृदयानां कर्णकुहरेषु सुधाधारं वमति। अधुनाऽप्युदयनाचार्यस्य भारती लीलायते। भक्ततुलसीदासस्य "भाखा"–भणितमद्याऽपि भक्ति-तरङ्गिणीं प्रवाहयति। अत एव श्रुत्याऽपि तारस्वरेणोक्तं यत् "विद्ययाऽमृतमश्नुते"।

तथा च सत्यमेवैतत्—

"न चौरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि।
व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम्॥"

(श्रीकृष्णदेवोपाध्यायः, एम्० ए०)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

४--सन्तोषः परमं सुखम्

सन्तोषो नाम सन्निहितसाधनादधिकस्याऽग्रहणेच्छा। अयं सुखदश्चित्तवृत्तिविशेषो नियमानामन्यतमः। शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानीति पञ्च नियमाः प्रकीर्तिताः। सुखार्थी लोको विषयेषु सुखमभिमन्यमानस्तानभिमतार्थाननुधावति। नहि तस्य तस्यार्थस्य सम्प्राप्तिरायासमन्तरेण सुशका भवति। न केवलं शारीरः परिखेदः परिणमति, मानसोऽपि। तं तमर्थमन्विष्यतः पुंसः सर्वमायुः क्षीयते, इतश्चेतश्च धावतः परा चञ्चलता जायते, चिन्ता च महती वर्धते, दुःखञ्च भृशमुत्पद्यते।

कश्चिदाह—सन्तोषो नाम चेतसः स्वास्थ्यमसन्तोषश्च विकार इति। अपर आह—यदि यन्ममाभिरुचितं तन्मे नास्ति तदा यन्मेऽस्ति तदेव मयाऽभिरोचनीयमिति। एवमेव सुखितः स्यां विपर्यये त्ववस्थितं मे दुःखमिति।

सन्तोषः पुरुषस्य परं निधानमित्युक्तम्। तत्कस्मात्? यस्मान्निधानान्तराणां क्षयः, सन्तोषरूपमेव निधानमक्षय्यं तस्मात्परमिति व्यपदिश्यते। 'क्षयान्ता निचयाः सर्वे' इति पूर्वे विद्वांसः। 'सन्तोषः सहजमैश्वर्यमिति सुकरातोऽप्याह।

विषयैषिणां तत्तदर्थसंग्रहणेऽक्षमाणामभिलषिते तस्मिन्नर्थे दुष्प्रापे विज्ञाते 'अम्ला द्राक्षा' (अंगूर खट्टे हैं) इति ब्रुवाणानां न सन्तोषो नाम कश्चिदस्ति। तैस्तैरप्राप्तैरर्थैः पर्याकुलचेतसस्तस्य न क्वचित्पर्यवस्थानमस्ति, कुतो निवृत्तिविशेषः सन्तोषः। यस्तु महानुभावः समर्थोऽप्यर्थौघार्जने—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"यावद् भ्रियेत जठरं तावत्स्वत्वं हि देहिनः ।
अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति ॥"

इति पुराणोक्तं प्रमाणयन्—

अर्थानामर्जने दुःखमर्जितानां च रक्षणे ।
आये दुःखं व्यये दुःखं धिगर्थाः कष्टसंश्रयाः ॥

इति च तन्त्रकारवचनं श्रद्दधानोऽर्थसंग्रहं च क्लेशबहुलमापातरमणीयं परिणामविरसं च मन्यते, अपेक्षानुसारमेव आददानो विरतिस्वभावः स एव सन्तोषभाग् नेतरः ।

नहि सन्तोषो निश्चेष्टता नाम । चेतसः परितोषरूपः सन्तोषश्चेष्टाविहीनानां दुरापः । 'शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मण' इति भगवदुक्त्यनुसारं तेषामन्नाच्छादनयोर्विरहात् पीडा नियता । नचाहिंसासत्ये असेवमानस्य भवति सन्तोषः, तस्य दम्भार्थमपि सेवनसम्भवात् । मनुनाप्युक्तम्—

'यमान् पतत्यकुर्वाणो नियमान् केवलान् भजन्नि'ति ।

इह लोके नहि कश्चित् परमबुद्धिमानपि पराक्रमी अपि जगति वर्तमानं सर्वमर्थं प्राप्तुं समर्थः । यत्रार्थेऽनीशोऽपि समीहते तत्र दुःखमेव भवति न सुखम् । तत्राशक्यार्थे व्याप्रियमाणस्य पीड्यते मनो रुग्णञ्च भवति शरीरम् । इदमेव जानन् कश्चिदन्तस्तुष्टो गायति जात्यन्धः किशोरः—

"अशक्यमिष्टं मयका यदाप्तुं तन्मा स्म घर्षीन्मनसः प्रसादम् ।
कामं दरिद्रो जनुषान्ध एव बालस्तु गायन् प्रमना नृपोऽस्मि ॥"

सन्तुष्ट एव सुखी नेतरः । 'सन्तोषमूलं हि सुखं दुःखमूलं विपर्ययः' इति मनोः स्मरणात् । योऽसन्तुष्टोऽनाशुतुष्टो वा स्यात् स एव पराधीनो भवति । यतस्तस्यार्थयाञ्चा महतीति तं तं सहायं समाश्रयते, अतोऽस्य सुखानुभवस्तत्तदायत्तो जायते । पराधीनस्य कुतः सुखम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यश्चानेकत्रार्थेषु संगृहीतेषु सुखमन्विष्यति तस्य नैकत्रापि सुखमिति महाननर्थः । यस्मात्केषुचित् सङ्गृहीतेष्वप्यर्थेषु तस्य सन्त्यसङ्गृहीतान्यर्थान्तराणि । यावत् स्वल्पेनाऽऽयासेन संगृहीता एतावन्त एव मे पर्याप्ता इति बुद्धिर्नोदिता तावत्कण्टकानुवेधोऽस्य भवत्येव ।

इदमत्र तत्त्वम्—सन्तोषो नाम वाञ्छाविच्छेदनं न । तत्र तु परमार्थे प्रबुद्धाः कर्मयोगिन एवाधिकृताः । अल्पोपकरणतायां महोपकरणतायामिहाभिरतिनिर्विशेषः सुखनिर्विशेषो वा सन्तोष उच्यते । यदि मे प्रातिवेश्यः काञ्चनीं शय्यामधिशेते, कौशेयोपधानं श्रयते, पट्टवस्त्रं परिधत्ते, प्रासादे निवसति, रुच्यं पयोदधियुक्तञ्च भोज्यं भुङ्क्ते तदाहं खट्वायां बाहुमुपधाय किं नालं स्वप्तुम् किं वा गाढेन वाससाऽऽच्छाद्य गात्रं कुटीरमावसन् पञ्चमेऽहनि षष्ठे वा शाकं पचन् न पारयामि शरीरं यापयितुमित्येव स्वाधीनः कश्चित् सुधीर्निरतिशयमक्षयं च सुखं समश्नुते । न चाधिकाधिकं सुखोपकरणमिच्छन् कश्चित्परमार्थतः सुखी भवति । उक्तमपि—'यत्र विधिः किरीटं न वितरति तत्र सन्तोषस्तद् वितरतीति ।'

सन्तोषश्चिन्तामणिरिति मनीषिणः । सन्तुष्टो जनः सर्वाः व्यापदः सम्पद्रूपेण परिणमयति सर्वानलाभांश्च लाभरूपेणेत्यद्भुतमिव करोति । नहि दशापरिवर्तोऽस्य खेदाय भवति दारिद्र्यं वा रोगो वा आशाभङ्गो वा अपायो वा नास्य मनः प्रसादमाविलं कर्तुं क्षमते । अयं ह्यात्मना तुष्टो न परस्याभ्युदयायेर्ष्यति, न च परत्र गुणोत्कार्षाय वा अभ्यसूयति । यो हि यद् विधात्रा विधीयते तदेव मे शुभायेति वाऽऽस्थितः स न क्षुभ्यति घोरास्वपि व्यापत्सु ।

सहज एव गुणः सन्तोषो नाम । कस्यचिद्विप्रादेर्भूयान् भवति सन्तोषो वैश्यादेस्त्वल्पीयान् । तथापि शक्योऽयं वर्धयितुं वैश्यादिनापि । य इच्छेत्सन्तोषो मे भूयान्स्यादिति स आत्मानमनुयुञ्जीत य इमेऽर्था मम सन्ति त इमे किं यावन्तो मयाऽपेक्ष्यन्ते तावन्त एव, ततो न्यूना अतिरिक्ता वा ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बहुशः स प्राप्स्यति निपुणं परीक्षमाणः सम्प्राप्ता मया क्षेमसाधका अर्थाः, नातोऽतिरिक्ता अपेक्ष्यन्त इति ।

यदा च जानीमो व्यापदः खल्वपरिहार्या इति तदा नार्थस्ताभिर्विषण्णा निर्विषण्णा वा भवेमेति । अस्माभिः पुनरीश्वरानुग्रहो मन्तव्यस्ताः कष्टतरा न आपतिता इति ! डच वास्तव्यस्य कस्यचित् पोतस्य गुणवृक्षान्निपतितस्य जङ्घाभङ्गोऽजनि तदा दुःखे विषादे वाऽनुभवितव्ये स पर्यतुष्यदात्मानं च धन्यमवदद् यद् ग्रीवा मे न क्षतेति । अयं हि सर्वावस्थागतस्य पुरुषस्य चेतसः प्रसादः परितोषः, तस्य षोडशीमपि कलां न स्पृशति इन्द्रियार्थसन्निकर्षजन्यं सुखान्तरम् । तस्मात् साधूक्तं "सन्तोष एव परं सुख" मिति ।

(प्रस्तावतरङ्गिणीतः)

भारतीय विद्या भवन
नई दिल्ली
श्री/श्रीमती/कुमारी............
को........परीक्षा.........में
[illegible]
संचालक
....

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

५—उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः

अस्मिन् संसारे परमेश्वरेण समस्तमपि भूतजातं सततमुद्योग-निरतं निर्मितम् । तद्यथा पृथिवी चक्रवद्भ्रमणं कुर्वाणा वसन्तादीनृतून् रचयति, सूर्यो द्वादशराशिषु बभ्रम्यमाणो जगदखिलं प्रकाशयति, वायुः सर्वेषां जीवन-निमित्तं भवति, जलं नदीनदादि-रूपेण विविधानि कार्याणि कुरुते, ग्रहगणोऽपि नूनं कस्मैचन महते प्रयोजनाय बम्भ्रमीति। साक्षात्परमेश्वरोऽपि सृष्टेः प्रागेकाकी सन् "एकोऽहं बहुस्यां प्रजायेय" इति सङ्कल्परूपमुद्योगं विधाय सृष्टि-मिमां समुद्भावितवान् ।

सर्वस्यापि प्राणिजातस्याङ्ग-प्रत्यङ्गनिर्माणेनापि उद्योग एव पुष्टीभवति। इन्द्रियाणां प्रयोजनं कस्मैचनोद्योगायैव ।

सिंहो वा भवेत् श्येनो वा प्रत्येकस्य जीवस्याङ्गप्रत्यङ्गनिर्माणं यद्युद्योगनिष्पत्तये जातं तत्र तदीयजीवनोद्देशो यदि स्यादुद्योगमय-स्तर्हि किमाश्चर्यम् ।

रोगाकुलो मनुज औषधनिर्माणस्योद्योगं कुर्वन्नेव स्वरोगं दूरी-कर्तुं समर्थः। एवं नद्यादिकं तरीतुकामोऽपि पोतादिनिर्माणोद्योगेनैव साफल्यमधिगच्छति। तत्र दैवं दैवमिति सहस्रकृत्वो जपित्वाऽपि न प्रभुः पारं गन्तुम् । शीतादिभ्यस्तस्करेभ्यश्च आत्मानं स्वपरिवारं वा रक्षितुकामः उद्योगेनैव स्वीयगृहनिर्माणाय प्रभवति । स्व-कुटुम्बभरणादिकमप्युद्योगद्वारैव विद्यते । दैववादी सर्वदा बुभु-क्षितस्तिष्ठति । उद्योगशीलेभ्यः श्वा तु पोषयितुं रोचते न तूद्योगहीनः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परीक्षार्णवस्योत्तरणमपि सततोद्योगसहायतयैव सम्पद्यते। तत्र दैववादिनस्तु स्वल्पमयत्नसाध्यमिदमिति कृत्वा कृत्यमुपेक्षन्ते, ततस्ते दुःखमेवाप्नुवन्ति।

प्रकामोद्योगपरायण एव सांसारिकान् सुखभोगान् स्वजीवनलक्ष्यीकरोति। मुक्तिरपि योग-समाधिरूपोद्योगकरणे समुपलभ्यते। जनताजनार्दनस्य सेवायां निरतः परकीयदुःखदावदलनमुद्योगेन कर्तुमीशः।

केचिद् दैवपक्षपातिनो व्याहरन्ति "यादृशं दैवं पुमांस्तादृशं फलमासादयति; उद्योगं विनाऽपि एको जनो धनाढ्यनिकेतने समुत्पन्नः, स च विनैवोद्योगेन धनैर्धनसाध्यैच पदार्थैः प्रतिदिनं क्रीडति। अपरश्च रङ्कगृहे जायमानः सुखसम्पादनाय बहूद्योगान् कुर्वन्नपि भोजनाच्छादनयोग्यं धनमपि नोपलभते। केवलं चिन्तापरायण एव यापयति जीवनमिति"।

तत्रोत्तरमिदम्—किं नाम दैवम्? परमेश्वरेण स्वेच्छयैव तौ पूर्वोक्तौ जनौ सधन-निर्धननिकेतने उत्पादितौ केनापि हेतुना वा? आद्ये स्वेच्छया फलानि ददानः परमेश्वरः प्रमत्त इव व्यतह्रियेत। निर्धनः पुमान् परमेश्वरं वक्ष्यति—मया किमपराद्धं, यन्मां रङ्कीकृतवानसि? तदा परमेश्वरोऽपि प्रतिपादयिष्यति—भो रङ्क, मदीयेच्छैव प्रधानम्, यदहं जीवयानि व्यापादयानि वा, न कोऽपि मां निरोद्धुं प्रभुः। अस्मिन्नुत्तरेऽवश्यमसौ प्रमत्त एव विक्षिप्त इव मंस्यते मानवैः।

परन्तु यदि तयोः पूर्वकृतसुकृतदुष्कृतानुकूल्येनैव फलदायकः परमेश्वरस्तर्हि रङ्कस्य न कोऽप्युपालम्भावसरः। यतो यादृशमुप्तं तादृशं लब्धम्। तथा सति जना यद्दैवं व्याहरन्ति तदपि वास्तविकदृष्ट्या उद्योग एव। अत एव वेदेऽपि फलभोगवेलायां 'पुमान् यदि दुःखितोऽस्ति, तर्हि स्वकीयं कर्मैव स्मरतु, परमेश्वरोऽपि कदाचनापि नोपालभ्यताम्। इति प्रतिपादितम्—

"ॐ क्रतो स्मर कृतं स्मर" इति। अर्थात्—हे क्रतो! कार्यकर्तः जीव! त्वं कृतं स्मर—स्वकृतमुद्योगं स्मर। नोपालभस्व परमेश्वरम्, प्रत्युत—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अग्रे पुण्यसञ्चयाय ओं स्मर ! अर्थात् परमेश्वरं चिन्तय प्रार्थय सुकृतसम्पादनाय। तस्माद् वेदेऽपि कर्ममहिमा वोद्योगमहिमा वा प्रकाशितः। न क्वचिदपि दैवं स्तुतिभाजनं कृतम्।

अत एव—"पूर्वजन्मकृतं कर्म तद्दैवमिति कथ्यते"। इति दैवलक्षणं कोविदैः कल्पितम्।

किंच यदि दैवमेव स्वेच्छया स्यात् प्रबलम्, तर्हि वर्तमानकालिक उद्योगो व्यर्थोऽस्ति, तर्हि शास्त्रैः किमर्थो व्यर्थो विषयः प्रतिपादित उद्योगो नाम, कथं वा धनव्ययः परिश्रमः समयव्ययश्च तैः शास्त्रकारैरस्माकं व्यर्थीकृतः ? को हि नाम चेतनावान् सन् व्यर्थं किमपि कार्यं सम्पादयितुमीहते। श्रीरामचन्द्रः सीताहरणवेलायां "दैवेनापहृता सीता" इति मन्वानः कथं मौनीभूय नातिष्ठत् ? परं नायं सिद्धान्तः श्रेयान्। दैवं तु अस्मदधीनमपि न वर्तते, अस्माकमधीनस्तु उद्योग एव। को नाम ज्ञानवान् भूत्वाऽपि उद्योगं विहाय पराधीनं दैवं प्रधानीकृत्य तदादेशानुसारेण जीवति, को वा रोगभाग् भूत्वा "दैवफलमिदम्" इति निश्चित्य हस्ते हस्तं स्थापयन् तिष्ठति ? कथं जानाति पुमान् यदयं दैववशाद् रोगो जातः, अतोऽवश्यमुपरंस्यते, कोऽर्थ औषधसेवनेन ! यद्यस्य भागधेयेषु जीवनसुखं भवति तर्हि रोगभागेव कथं सम्पत्स्यते, इत्थं निश्चिन्वानः क उपरमति स्वीयोद्योगात्। उपरमेच्चेत्तर्हि मूर्खोऽयं विक्षिप्तोऽयमिति व्यवह्रियते सकलैर्जनैः।

अस्मादस्माभिः सदोद्योगपरायणैर्भाव्यम्। परमेश्वरेणास्माकं हस्ते उद्योग एवार्पितः, दैवं तु तेन स्वायत्तीकृतम्। पराधीनपदार्थे पुनः पुनः प्रचलन् पुमान् परपुरुषैः प्रकामं प्रमादी प्रतिपादयिष्यते। अत एव श्रीमता मर्यादापुरुषोत्तमेन भगवता रामचन्द्रेणोद्योगबलेन सुग्रीवः सुहृत् कृतः। लङ्कामुपसाद्य सहलक्ष्मणेन सकलजगद्द्रावणं रावणं पुरन्दर-पुरातिथीकृत्य सीता समासादिता। उद्योगसाफल्यं च प्रकाशितम्।

यदा नलो भूपालः स्वीयेन कनीयसा भ्रात्रा सह दीव्यन् स्वीयं राज्यं हारितवान् तदा तदुद्योगमकृत्वा दमयन्तीं सह नीत्वा वने वने भ्रान्तवान्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रान्तवान्। अन्ते च स्वप्राणभूतां दमयन्तीमपि त्यक्तवान् । सर्पेणापि दष्टः। दैवानुसारी भूत्वा प्रभूतानि कष्टानि अनुबभूव। परं यदोद्योगं विधाय ऋतुपर्णस्य राज्ये भृत्यकल्पमङ्गीचकार, तदा पुनर्भीमभूपेन दमयन्तीजनकेन स्वयंवरे स्थापिते सति तत्र ऋतुपर्णेन सहोपसद्य पुनर्दमयन्तीमुपलब्धवान् ।

दैवाधीनजीवनस्तु पदे पदे प्रस्खलति, अन्ते पञ्चतामञ्चति। किन्तु वशीकृतोद्योगः सर्वत्र विजयमुपढौकते। तथा चोक्तम्—

"न चोद्योगमनारुह्य नरो भद्राणि पश्यति।
उद्योगं पुनरारुह्य सुखं जीवति हृष्यति ॥"

पाण्डवा ह्युद्योगबलेनैव नष्टमपि राज्यमुपलब्धवन्तः । दैवानुसारी अर्जुनः श्रीकृष्णोद्योगबलेनैव पुनर्गाण्डीवमुत्तोलितवान्। तस्मादुद्यच्छमान एव पुमान् स्वाभीष्टं लब्धुमर्हति नापरथा। अत एवोक्तम् "उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः"।

(श्रीचूडामणिशास्त्री)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

६—लोभः

लोभो हि महान् रिपुः। प्राणिमात्रेऽस्य प्रभावो दृश्यते निरपेक्षमानसाः साधवोऽपि बहुशोऽस्य प्रभावेण कार्याकार्यविवेकशून्या जायन्ते। धर्मादपि ग्लायन्ते, सर्वमनोरमां शान्तिमपि दूरत एव नमस्कुर्वन्ति। उक्तं हि—

लुब्धः कार्यकार्यं वा न कीर्तिं निरयं न च।
न धर्मं चापि वाऽधर्मं वेत्ति नैव हिताऽहितम्॥

लोभो हि पापकारणम्। लुब्धो मनुष्यो बहुविधेषु पापकर्मसु प्रवर्तते। स्वाधिकारे पराधिकारे च विवेचनां नैव करोति। 'सर्वाणि वस्तूनि ब्रह्मणा तद्धिताय सृष्टानि' इत्येव जानाति। आत्मानं जगद्विभूतिकेन्द्रं मनुते। लोभो हि कान्ता-कनकादिभेदतो बहुप्रकारः। उक्तं च—

"वेधा द्वेधा भ्रमं चक्रे कान्तासु कनकेषु च।" तत्र बहुविधेषु लोभेषु सम्पत्तिलोभो हि बलवत्तमः। अन्योऽन्यराज्यं समीहमाना भूपतयः परस्परं कलहं कुर्वन्ति, कोटिशः प्राणिनो निर्जीवान् विदधति। नगरं रिक्तीकुर्वन्ति, क्वचिद् दारानपहरन्ति, क्वचिद् गृहाणि अग्निसात्कुर्वन्ति, क्वचिद्निर्मल-हृदयान् बालानपि ताडयन्ति व्यापादयन्ति च। धनलोभाद् मानवाः सहोदरानपि घ्नन्ति। कदाचिन्न्यायालयेऽभियोगं कुर्वन्ति। अद्यतनानां न्यायाधीशानां पञ्चाङ्गुलयो घृते जायन्ते। कायस्थानां सुप्रभातं भवति। परन्तु अभियोगकृतः "भक्षितेऽपि लशुने न शान्तो व्याधिः" इति नियमा-नुसारेण न किमपि लभन्ते। निदानतः सन्धिपत्रमेव लिखन्ति। न्यायाधी-शादयस्तु उत्कोचद्रव्यं लब्ध्वा स्वादुतया ताम्बूलं चर्वन्ति, धूम्रवर्तिका-माकर्षन्तीति कुप्रभावो लोभस्य।

अतिलोभेन क्षितीशो दुर्योधनोऽपि नाशमगमत्। लोभाभिभूतया सीतयोत्साहितो रामोऽपि सुवर्णमये मृगे लोभं चकार। उक्तं हि—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"असम्भवं हेममृगस्य जन्म तथापि रामो लुलुभे मृगाय ।"

कैकयी लोभात् तिरस्कारं लेभे । वाली भ्रातृराज्यलोभात् मनोरथशतैः सह परलोकं जगाम । बहूनि सन्ति वित्तलोभहानौ उदाहरणानि । तत्र एकमेव श्लोकमुदाहरामः—

"निःस्वो वष्टि शतं शती, दशशतं लक्षं सहस्राधिपः
लक्षेशः क्षितिपालतां क्षितिपतिश्चक्रेशवत् सम्पदम् ।
चक्रेशः पुनरिन्द्रतां सुरपतिर्ब्रह्मत्वमाकांक्षति
ब्रह्मा विष्णुपदं हरिर्हरपदं लोभावधिं को गतः ॥"

विषयलोभोऽपि महान् हानिकारकः । केचिज्जनाः सस्त्रीका अपि परकलत्रेषु लोलुपमानसाः भवन्ति । उचितमनुचितं सर्वं कर्तव्यमनुतिष्ठन्ति । परं न जानन्ति मूढधियो यत् भोजनं बुभुक्षानिवृत्यर्थं खाद्यते । यदि गृहस्थस्य भोजनेन बुभुक्षानिवृत्तिर्जायते तर्हि किमर्थमन्येषां भोज्येषु गृघ्नुता । "अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्" । गृहागतं देवं नाराधयन्ति, मन्दिरे नतमस्तका जायन्ते विवेकशून्यहृदयाः ।

हन्त ! केचिच्च स्वकलत्रेषु महतीं गृघ्नुतामातन्वन्ति । इत्थं च भयङ्कर-व्याधिष्ठानानि जायन्ते । उपदिश्यमानाः कदाचित् कथयन्ति यदल्पकालेनैव विषयतृप्तमानसास्ते सर्वेभ्यो विषयेभ्यो विरंस्यन्ति, परन्तु एवं गदन्तस्ते वाक्यमिदं विगणयन्ति—

"न जातु कामः कामानामुपभोगेन शम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥

अस्मिन्नेवार्थे कश्चिदन्योऽपि कविवर आह—

"धनेषु जीवितव्येषु स्त्रीषु भोजनवृत्तिषु ।
अतृप्ता मानवाः सर्वे याता यास्यन्ति यान्ति च ॥

न जातु विषयभोगेन शान्तिर्लभ्या, एधोदानं हि स्मृतमेतत् । केवलो धर्मदण्ड यव विषयाद्दूरीकर्तुमीशः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भोज्यपदार्थेषु लोभोऽपि दुःखकर एव। अद्यतना ब्राह्मणा अपि ये कदाचिद् भूसुरा आसन्, परान्नं निष्कारणं खादन्ति। "परान्नं दुर्लभं लोके शरीराणि पुनः पुनः" तेषां चारुर्वागस्ति। तेषां कृते सुसज्जितमपि भोजनं लाभस्य स्थाने हानिमेव सम्पादयति। श्राद्धे क्षीरान्नं भुक्त्वा सायंकालपर्यन्तं हस्ताभ्यां मन्दं मन्दमुदरं परिमार्जयन्त उदरम्भरयोऽवश्यमेव दर्शनीयाः।

यदि दानाध्ययनादि-पुण्यकर्मसु लोभः क्रियते स तु वरम्, यतो हि लोभात् तत्रोन्नतिं प्राप्नुवन्ति मानवाः; परन्तु विषयविकारादिषु लोभस्तु सर्वथाऽवनतेरेव कारणम्। अत एव महाभारतेऽपि लोभनिन्दाऽतिप्रबलतया क्रियते। उक्तं हि भीष्मपितामहेन—

"पापस्य यदधिष्ठानं तत् शृणुष्व नराधिप!
एको लोभो महाग्राहो लोभात् पापं प्रवर्तते॥"
"लोभात् क्रोधः प्रभवति लोभात् कामः प्रवर्तते।
लोभान्मोहश्च माया च मानः स्तम्भः परासुता॥"

अपि च—

"अत्यागश्चातितर्षश्च रूपैश्वर्यमदस्तथा।
सर्वभूतेष्वभिद्रोहः सर्वभूतेष्वनार्जवम्॥"
"अक्षमा ह्रीपरित्यागः श्रीनाशो धर्मसंक्षयः।
अविद्याप्रख्यता चैव सर्वं लोभात् प्रवर्तते॥"

विद्यमानेष्वेवंविधप्रमाणेषु को नु नाम मन्दधीर्लोभे प्रवर्तेत!

(श्रीसाधुरामशास्त्री एम० ए०)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

७–आपदां तरणिर्धैर्यम्

को नाम जगति जन्मवान् यः कदापि विपद्भिर्नाभिभूतो भवेत्, सर्वस्य कर्मणि प्रवृत्तस्याग्रे विघ्नभूता आपदो दुःखाय समुपतिष्ठन्ते। देवाः, मानुषाः, पशवः, तिर्यञ्चो वा आपद्ग्रस्ताः समवलोकिताः श्रुताश्च। आपद्ग्रस्तानां प्राणिनां न बलं बुद्धिर्धनादिकं वा रक्षकम्, धैर्यमेव केवलं शरणम्। नैतद्विना कस्याप्याश्रयेण ते प्राणान् धर्तुं क्षमाः। धैर्येण दुःसाध्यमाशातीतमपि कार्यं सिद्ध्यति। आपद्ग्रस्तोऽपि मुच्यते। अर्धरात्रसमये भयङ्करजन्तुपरिपूर्णस्यागाधसागरस्य मध्ये यदा पोतो झञ्झावातैः क्षणादधः क्षणाच्चोपरि नीयते, यात्रिकाश्च जीवने निराशाः सुत-दार-गृहादिकं संस्मृत्य संज्ञाहीना रोदितुञ्च प्रवृत्ताः, तदा पोतपतेर्धैर्यमेव शरणम्, तदेव बलम्, तदेव बुद्धिदायकः सहायकश्च। धैर्यमेव तरणीं विधाय स सर्वानपि परं पारं नयति।

श्रूयते देवा अपि दैत्यै राक्षसैश्च प्रतिहन्यमाना भ्रष्टराज्या हृतश्रियोऽशरणाः पर्वतगुहासु निलीय धैर्येणैव आपत्कालं यापितवन्तः। अन्येषामपि वर्तमानानां राष्ट्राधिपतीनां राष्ट्राणां वा शत्रुभिः प्रपीडितानां धैर्यमेव शरणं प्रत्यूह-समूह-विद्रावणाय।

इतरेऽपि पुरुषोत्कर्षहेतवः शौर्य-दया-दाक्षिण्यादयो गुणा धैर्यमवलम्ब्यैव प्रवर्तन्ते। नहि कश्चित् शूरो दानी दयालुर्वा धैर्यं विना तत्पदवीमारोढुं क्षमः। अत्र युधिष्ठिरप्रभृतयः शूराः कर्णप्रभृतयो दानवीराः, शिविप्रभृतयो दयावीराः प्रमाणम्। आसन्नमृत्युरपि कर्णो विप्ररूपधारिणा भगवता परीक्षितुं याचितो धैर्येणैव दन्तमणिं दत्त्वा स्वदानवीरतां ररक्ष। शिविना स्वहस्ताभ्यामेव निजमांसमुत्पाटितम्। हनूमान् देवैर्धैर्यं परीक्षितुं प्रेषितया सुरसयाऽर्धपथ एवारुद्धो कथमपि तया मुक्तोऽपि सागरवासिना

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

छायाग्राहिणा दैत्यविशेषेण गृहीतो धैर्येणैव दैत्यापत्सागरमपि निस्तीर्णवान् ।

धैर्यादृते मनुजः कार्येषु विमुह्य विषीदति, तदवलम्ब्य तु सुखेन कार्यस्यान्तमधिगच्छति। परश्शता भारतीया आर्यललनाः सुदुःसहं स्वपति-पुत्रादिवियोगवह्निं धैर्यवारिदवारिणैव शमयन्ति। रावणेन सीता शत-योजनस्य सागरस्य पारं नीता, तत्र सा राक्षसीभिः समन्तात् परिवृता निवसति, रामलक्ष्मणयोर्वार्तापि न श्रूयते, रावणेन विविधानि प्रलोभनानि प्रदर्श्यन्ते, मृत्युत्रासश्चापाद्यते, असह्यं वियोगदुःखम्, स्वकीयः कश्चिदपि नावलोक्यते, दविष्ठो देशो विकटश्चाध्वा, कथमिव विरहव्यथा शान्तिमुपगच्छेत्, तत्र प्रतिदिनमेधमानवियोगवह्निं सा धैर्यवारिणैव शमयति स्म।

शत्रुभिरपहृतराज्योऽपि भूमिपतिर्यदि धैर्यं दधानः पुनः स्वशक्ति-वर्धनाय प्रयतेत, तर्हि कियता कालेनैव पुनः स्वाधिकारं लभते। अत्र शिववीरो निदर्शनम्, अवरङ्गजीवप्रेषितैः सेनापतिभिः स पौनःपुन्येना-क्रान्तः, जयसिंहेन तु पुण्यनगरमन्यानि च दुर्गाणि अपहृतानि, स्वयं च स सपुत्रो दिल्लीश्वरेण सन्धातुं जयसिंहेन दिल्लीं प्रति नीतः। कपटपटुनाऽवरङ्ग-जीवेनावरुद्धः, तदा धैर्यदत्तप्रतिभा-सहकारेण मिष्टान्नभाजने निलीय दिल्लीतो निर्गतो धैर्यतरण्याऽऽपदं, तरण्या च यमुनां निस्तीर्य स्वदेशं प्रत्यापन्नः, तत्र धैर्येण कालं प्रतीक्षमाणः स्वसैन्यसङ्घटनतत्परो अचिरेणैव स्वराज्यं समस्तमपि प्रतिनिवर्तयामास। एवमपरोऽपि धैर्यधारिधुरन्धरो भारतभूषणमुदयपुराधीश्वरः श्रीमहाराणाप्रतापोऽत्रोदाहरणत्वामायाति। तस्य वीरशिरोमणयोऽकबरप्रेषितेन मानसिंहेन सह हल्दीघाटीयुद्धे हताः, मेवाडराज्यमपि परहस्तगतं जातम्, स च यवनाधीनतामस्वीकृत्य सपरिवारो वनं विवेश। वने च स विविधान् शीत-वातातप-क्षुत्पिपासा-दिक्लेशान् सहमानो घासरोटिकामप्यलभमानायाः पुत्र्या भार्यायाश्च दीनां दशां निरीक्षमाणः खड्गमात्रसहायो धैर्येणैवापद्-दिनानि निनाय।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुनरपि श्रेष्ठिभामाशाहमहोदयेन दत्तया सहायतया वीराणां सङ्घटनं विधाय मेवाडस्वाधीनतां रक्षन्नात्मसम्मानं जुगोप ।

सांसारिकपदार्थानां प्राप्त्यै यतमानानां तु कैव कथा, परमात्मसाक्षात्कराय प्रयतमाना योगिनोऽपि प्रत्यूहभूतानां कामक्रोधादीनां विनाशाय धर्ममेवापेक्षन्ते । अत एव धैर्यस्य दैवीसम्पत्सु परिगणनम् । यथा गीतायाम् ।

"तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।
भवन्ति सम्पदं दैवीमभिजातस्य भारत ॥"

आत्मसाक्षात्कराय प्रयतमानं योगिनं चक्षुःश्रोत्रादीनीन्द्रियाणि स्वस्वविषयं प्रति कर्षन्ति, स्वल्पमायुः, मृत्युरतिनिकटः, लक्ष्यमतिदविष्ठम्, तत्र धैर्यं विना कामितरां तरणिं गृह्णीयाद् योगी विघ्नसागरस्य पारमधिगन्तुम् । अत एव मनुनापि दशके धर्मलक्षणे धैर्यस्य प्राथम्यं निर्दिष्टम्, यथा—

"धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥"

किञ्च अहिंसाव्रतिनोऽपि भारतीया नेतारश्चिरेण भारतभूस्वाधीनतायै प्रयतमाना विदेशीयैः साम्राज्यवादिभिर्भुशुण्डीलक्ष्या अपहृतसम्पदः कारागारे निगृहीता असाधनाश्च कृताः । नैषामासीत् कोऽपि स्वतन्त्रो देशः सहायकः, विलासिनः प्राप्ताधिकारा भारतीया विदेशीयानामेव पृष्ठपोषकाः, बहुवारं चासाफल्यमधिगतम्, परमन्ततो धैर्येणैव स्वप्रयत्नेऽनवरतं निरता विविधा अपि बाधा दूरतो निपात्य आङ्गलान् देशाद् बहिर्निस्सार्य भारतं स्वाधीनं कृतवन्तः ।

यदि युधिष्ठिर-सीता-प्रताप-गान्धि-प्रभृतयोऽधैर्येण निर्विण्णाः स्वकार्याद् व्यरंस्यन् तर्हि न तेषां नामापि केनचित् समादरेणाऽग्रहीष्यत । धनुर्विद्यामर्मज्ञस्य बलवतोऽश्वत्थाम्नोऽधीरत्वादेव न कुत्रापि पराक्रमोऽश्रावि ऋते सुप्तबालहननादेः कुत्सितात्कार्यात् । अद्य भारतमपि धैर्याभावादेव—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ।
स्वधर्मे निधनं श्रेयः पर धर्मो भयावहः ॥"

इति भगवद्वाक्यं विस्मृत्य क्षणिकां परधर्म-कर्म-व्यवसायादेरुन्नतिं वीक्ष्य निजार्य-वैदिक-धर्मादेर्वर्णोचित-व्यवसायादेर्लक्ष्म्याश्च हीयमानं विद्यते ।

यतो धैर्येणैव इन्द्र–हनुमत्प्रमुखा देवाः, युधिष्ठिरादयो राजर्षयः सीताद्याः पतिव्रताः स्त्रियो योगिनश्चापदां सागरं समुत्तीर्णाः । यतश्च धैर्यमेव गुणानां निदानम्, धीराणां जीवनम्, सम्पदां मूलम्, विपत्पयोधीनां पोतः, नीतिज्ञानां नीतिः, समरसागरस्य पारं गन्तुमिच्छुकानां वीराणामुत्साहतरणिः । तस्मात्सर्वथा युक्तमिदमुच्यते—

"आपदां तरणिर्धैर्यम् !"

(श्रीयशोदेवशास्त्री)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

८--कः परः प्रियवादिनाम्

इह हि विचित्रे जगति नास्ति स कोऽपि यस्य मित्रोदासीनशत्रुरूपास्त्रयः पक्षा न विद्यन्ते । उक्तमपि—

"मुनेरपि वनस्थस्य स्वानि कार्याणि कुर्वतः ।
उत्पद्यन्ते त्रयः पक्षा मित्रोदासीनशत्रवः ॥"

परं किमस्ति कोऽपि तादृशः पुण्यवान् यस्य सर्वे मित्राण्येव स्युः, सम्प्रति सर्वे स्निह्येयुरेव, येन सर्वे सहानुभूतिमेव कुर्युः, यं च सर्वे प्रशंसेयुरेव ? उच्यते—बाढम्, अस्ति तादृशोऽपि । यतः परमात्मसृष्टौ नास्ति किमपि दुर्लभम् । स हि अपरिमितानन्दोत्पादकेन निजवचनामृतेन सर्वेषां तापस्यापहारकः पुण्यशीलः, सर्वदा प्रसन्नमनाः प्रफुल्लवदनः, सर्वलोकस्य मनोहरः, अखिलानामपि प्रीतिभाजनं सर्वहितसंवादी "प्रियवादी" एव । इदं तावद् विचार्यते—नहि सर्वं सर्वस्य प्रियं भवति, अपि तु यदैवैकस्य प्रियं भवति, अपरस्य तदेवाप्रियं भवतीति प्रियत्वाप्रियत्वयोर्न साधारणी स्थितिः । प्रियञ्च तस्य तद् भवति–यद् यस्य मानसमकस्मादेव आनन्दसागरे निमज्जयति, उत्कण्ठितं करोति, आकर्षति, नर्तयति चेति सहजमधुरया अमृतवर्षिण्या वाचा । यः सदा प्रियमेव भाषितुं धृतव्रतो भवति तस्यावश्यमेकोऽपि परो न भवति, प्रत्युत सर्वे उदासीनतां परित्यज्य वशवर्तिनो भूत्वा मित्रवदाचरन्ति । अतः सुधीभिरयत्नसाध्यं सर्वानन्दसाधनं प्रियभाषणमेवाश्रयणीयमित्यभिप्रायः ।

एतद्युक्तमपि—तथाहि प्रियवागपि तावद् द्विप्रकारा । प्रथमा तु केवलध्वन्यात्मिका अर्थहीना कोकिलप्रभृतीनाम्, द्वितीया अर्थवती मनुष्याणामेव भवति । तत्रैतद् विचारणीयं यद् यदि ज्ञानशून्यानां कोकिलप्रभृतीनामर्थहीनाऽपि वाक् सहसैव सर्वेषां मनांसि रञ्जयन्ती वशीकरोति, तर्हि उच्चै-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ज्ञानवतां प्रियभाषणशीलानां मानवानां स्पष्टा, अर्थवती, मधुरा, गुणवती वाणी चेत्तथा विदधाति तदा किमाश्चर्यम् । प्रियवाक् खलु चञ्चलचित्तानां, अधीराणाम्, अशान्तानां, अन्यायप्रवृत्तानां, तीक्ष्णानां क्रोधान्धानाञ्च जनानामपि अन्तःकरणेऽतीव शान्ति जनयति, चिन्ताग्रस्तानां विषादमपनयति, शुष्ककलह-खिन्नानां चेतो विनोदयति, परस्परभिन्नान् संदधाति, अमित्रानपि मित्राणि करोति । सुरूपं धनादिकञ्च कोऽपि न पश्यति, परं यः पश्यति स सर्वतः प्रथममाचारव्यवहारौ वार्तालापक्रममेव च पश्यतीति सर्वथाऽऽलापो मधुरः प्रियश्च भवितुमुचितः । अप्रियन्तु वचो विस्मृत्यापि न प्रयोक्तव्यम् । यतो हि तदतीव दुःखप्रदं भवति कोमले हृदि च व्रणरूपतां धत्ते । कथितमपि—

"ब्रूतेऽप्रियं योऽत्र वचो विमूढधीर्न तद्वचः स्याद्विषमेव तद्वचः ।"

एतावदेव न, किन्तु सत्यमपि यदि अप्रियं भवेत् तर्हि कदापि तन्न वाच्यम् । अत एव नीतिविद्भिरपि उक्तम्—"सत्यमपि तन्न वाच्यं यदुक्तमसुखावहं भवति" इति । इत्थं यत् परानपि लीलायैव स्वान् करोति, सर्वकार्याणि चानन्दसाधनानि साधयति तत् सुधावत् स्वादु प्रियं वचनमवश्यं प्रयोक्तव्यम् ।

एतत् सर्वेऽपि सम्यक्तया जानन्ति यत् शुकसारिकाप्रभृतयोऽरण्यवासिनः क्षुद्राः पक्षिणः प्रियवाचः प्रभावेणैव वनवासदुःखं व्याध्यादिभयञ्चातीत्य राजप्रासादेषु राजपुत्रै राजकन्यकाभिश्चात्यन्तमाद्रियमाणाः राजरमणीभिः कमल–कोमलैः करैर्नवं नवं विविधरसयुक्तं भोजनं भोज्यमानाः स्वयं राजभिश्च सस्नेहं लाल्यमाना अनुपसमानन्दमनुभवन्ति । एवं कोकिलः काकश्च द्वावपि कालिम्नि तुल्यौ, एकस्यामेव शाखायां तिष्ठतः यावद् वाग् नोच्चार्यते तावत् तयोर्भेदोऽपि न लक्ष्यते; परं वागुच्चारणसमकालमेव कोकिलस्तु सादरं सस्नेहञ्च ईक्ष्यते प्रशस्यते च, परं वराकः काकस्तु वारं वारं मुखं विदार्य "कां कां" शब्दं कर्तुमारब्ध एव प्रस्तरशकलैः काष्ठैर्गोलकैश्च नितरां ताड्यत एव । इतिहासेऽपीदृश्यो बह्व्यः कथाः समवलोक्यन्ते, यथा कश्चिदागत्य कस्य-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चिद्राज्ञः पुत्रस्य प्रियं वीरतापूर्णं कार्यं झटित्येव राज्ञे निवेदयति तदा स पुरुषः प्रभूतं धनं मानञ्च दत्त्वा उच्चतरे पदे आरोप्यते। कश्चित् क्रुद्धो भूत्वा कमप्यन्यं हन्तुं गतः तस्य प्रियवचनं श्रुत्वा क्रोधं परित्यज्य सविनयं क्षमाप्रार्थी जायते।

अतो निश्चितं जातं यत् प्रियभाषणेन कश्चिद् व्ययो न भवति, जिह्वा न घृष्यति, किंचिदन्यत् कष्टं नापतति; प्रत्युत प्रियवचसः प्रयोगेण वशीभूता लोकास्तस्मै सहायतां ददति। यतो हि प्रियवचनेऽपूर्वा आकर्षिणी शक्तिर्विद्यते। किंच कस्यचिद् मनःखेदनं महत्पापम्, मनस्तोषणञ्च महत्पुण्यं गण्यते। तुष्टमना हि जनः शुभमाशिषं प्रयच्छति, तस्य हितमीहते। सर्वेषां सन्तोषजननात् पुण्यमपि महद्भवति, सद्गतिप्राप्तिरपि। इत्थं प्रियवादिनां नास्ति कोऽपि परः, अतो बुद्धिमद्भिः सर्वदा प्रियवादिभिर्भवितव्यम्।

(श्रीरामचन्द्रशास्त्री एम० ए०, 'कुशल')

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१—दरिद्रता दोषः

दारिद्र्यं नाम निर्धनत्वम्। दरिद्रो हि दरिद्राति दुःखेन निर्वहतीति तथोच्यते। दारिद्र्यं हि सातिशयं भवति। एकस्य कृते यद् दारिद्र्यमपरस्य तदेव धनिकत्वम्। यदैश्वर्यं भारतवर्षे कृषीवलस्य स्वप्नगम्यमपि न भवति तदमेरिकाकोटीश्वरस्य दारिद्र्यमेव।

इदं हि लोके दृश्यते सुन्दरोऽपि शूरोऽपि वाक्पटुरपि शास्त्रज्ञोऽपि वित्तविहीनस्तिरस्क्रियते। दारिद्र्योपहतास्ते ते तस्य गुणा न शोभन्ते न चाद्रियन्ते। उक्तमपि–"दारिद्र्यं नाम तिरस्करणी गुणानामि"ति। इयं हि लोकयात्रा अर्थनिबन्धिनी, अतोऽर्थस्य अर्थवतश्च समादरो नान्यस्य।

दारिद्र्यं खलु गृहस्थानां महद्दुःखं जनयति। भर्तव्यास्तेन पुत्रकलत्रादयः। ते यदि दिनस्य द्विःपर्याप्तं भोक्तुं न लभन्ते, परिम्लानमुखाश्च तस्याग्रे समायान्ति, कथङ्कारं स तदा क्षणमपि दिवा उपभोक्तुमर्हति रात्रौ वा सुखं स्वप्तुम्। यदा स तान् शीतार्तान् पश्यति तदा विदीर्यतेऽस्य हृदयम्। यदा चावलोकयति पुत्रको मे क्रीडनकेषु तृप्यति न चाप्नोति, पठनाय पुस्तकानि वाञ्छति न च लभते, विद्याग्रहणाय देयं शुल्कं न दातुमीष्टे। एवं विषमस्थस्य तस्य कथं शान्तिर्भगवद्भक्तिर्वा।

यदुक्तं कविना "उत्थायोत्थाय लीयन्ते दरिद्राणां मनोरथाः" स भूतार्थः। दरिद्रस्यापि मनसि कामाः समुत्पद्यन्ते परन्तूत्पन्नमात्रा एव लीयन्ते। तस्यापि जायते सङ्कल्पः, न च फलति। विविधानि भोज्यानि, भक्ष्याणि, पेयानि, चूष्याणि, लेह्यानि च दृष्ट्वा तस्यापि तान्यास्वदितुमभिलाषो भवति। विद्वानपि वस्त्राभावादल्पवसनत्वाद् दुर्वेषतया नोत्सहते समाजे समवैतुम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दारिद्र्यं नाम पराभवस्य परं पदम्। अयं हि पर्यायो मरणस्य। तदुक्तम्—

जीवन्तोऽपि मृताः पञ्च श्रूयन्ते किल भारते।
दरिद्रो व्याधितो मूर्खः प्रवासी नित्यसेवकः॥
मृतो दरिद्रः पुरुषो मृतं मैथुनमप्रजम्।
मृतमश्रोत्रियं श्राद्धं मृतो यज्ञस्त्वदक्षिणः॥

दरिद्रो ह्युपकर्तुकामोऽपि बान्धवानुपेतः शङ्कनीयो भवति तेषां याचितुमेवायं न प्राप्त इति। अग्रतः स्थितमप्येनं न पश्यन्ति जनाश्च स्वजनाश्च।

अन्यत्रापि लोके बहुविधं विडम्ब्यते दरिद्रः। अपायोऽपि पाप इत्यवज्ञायते। उक्तं हि—

"शङ्कनीया हि लोकेऽस्मिन्निष्प्रतापा दरिद्रता"। इति।

अनपराद्धोऽप्यपराद्धः, गुणवानपि निर्गुणः, अर्होऽपि गुरोरधिकारस्याऽविश्वास्य इत्यवहेल्यते।

एषा महती हानिर्दारिद्र्यकृता यद् ह्रीणत्वं नाम। उक्तं च–"दारिद्र्याद्ध्रियमेति ह्रीपरिगतो बुद्ध्या परित्यज्यते" अस्त्येष महाननर्थः। दरिद्रो हि यथा परेभ्योऽपत्रपते तथा स्वेभ्यः। तेऽप्यस्य दर्शनं परिहरन्ति अयमपि च तेषाम्। इति विवशं विविक्तासनो भवति। ततश्च बुद्धिरस्य भ्रश्यति विवेकश्च नश्यति।

इदं चापरमनिष्टं दारिद्र्यकृतम्–अकिञ्चित्करौ कोपप्रसादौ दरिद्रस्य भवतः। निरर्गलमेनं जनोऽपकरोति, नहि कस्यचित्तस्माद्भयं भवति। "उत्पतितोऽपि हि चणकः शक्तः किं भ्राष्ट्रकं भङ्क्तुम्"। एवं यदि क्वचित्प्रसीदति दरिद्रः, नहि तावता तस्यादरो भवति, यतोऽसावनुग्रहेऽसमर्थः। कथितञ्च मृच्छकटिकेऽपि—

"पक्षविकलश्च पक्षी शुष्कश्च तरुः सरश्च जलहीनम्।
सर्पश्चोद्धृतदंष्ट्रस्तुल्यो लोके दरिद्रश्च॥ इति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दारिद्र्यं खलु षष्ठं पातकम् । सत्यं शतधा विनिपतति निर्धनो जनः । कथितमपि—"बुभुक्षितः किं न करोति पापं क्षीणा नरा निष्करुणा भवन्ति"। प्रायेण स्वस्या दौर्गत्यं शिशुजनस्य करुणाक्रन्दं कलत्रस्य च कलहमसहमानोऽधनो जनः पदमपथे समर्पयति क्रूरं च समाचरति । चौरो वा लुण्टाको वा घातुको वा प्रतारको वा भूत्वा भर्तव्यान् बिभर्ति ।

द्विविधा दरिद्राः—एके जात्या दरिद्राः, परं समृद्धपूर्वा सम्प्रति दुर्गताः। अत्र यैस्तु वैभवं कदापि न दृष्टं न तथा दुःखायन्ते यथा दृष्टवैभवाः । अमी हि चिरं लक्ष्म्या आलिङ्गिताः सहसा तज्जनितसौख्यसमूहं विस्मर्त्तुमशक्ता इति दशाविपर्यासमनुचिन्तयन्तश्चेखिद्यन्ते । कविनाप्युक्तम्—

"हृतनयनो हि विषादी न विषादी भवति जात्यन्धः" ॥

इदं चेह नानुपेक्ष्यम्—क्वचिन्महासत्त्वाः केचिद् दारिद्र्य-भराक्रान्ता अपि व्यसनशतशरव्यतां गता अपि कथं कथमपि लोकयात्रां निवर्तयन्ति न च धैर्यं हारयन्ति न वा शीलं भ्रंशयन्ति । एते खलु निरन्तरोद्योगमहिम्ना दारिद्र्यं दारिद्रयन्तः क्रमेणोन्नमन्तः परामुन्नतिमाश्रयन्तेऽथ महीयन्ते । कस्य नाम न विदितो गार्फील्ड महाभागोऽमेरिकाराष्ट्रपतिः । अयं महाभागः कृषीवलकुले जातोऽत्यन्तं दुर्गतयोः पित्रोः सुतोऽभूत् । निसर्गसिद्धाभ्यां प्रज्ञामेधाभ्यामनवरतेनोद्योगेनानिर्वेदेन च व्यपोह्य विघ्नसमूहं महतामपि माननीयं स्पृहणीयं च सभापतिपदं लेभे । अयं हि विद्यालयशुल्कादिनिर्मोक्षार्थं वृत्त्यर्थं च परिचारकतामङ्गीकृत्य संमार्जनं घण्टावादनं चाकर्षीत् ।

(प्रस्तावतरङ्गिणीतः)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१०–भूकम्पः

प्रकृतेः पटपरिवर्तनेन यावत्योऽपि दुर्घटना भवन्ति भूकम्पस्तास्वति-भयावहा महाहानिकारिका च दुर्घटना विद्यते। भूकम्पस्य भाव एवास्ति–"पृथिव्याः कम्पनम्"। "डोलः" "भूचालः" (जलजला) इत्यादयश्च भूकम्पस्यैव सन्ति पर्यायवाचिनः शब्दाः।

प्रत्येकप्राकृतिकदुर्घटनायाः किञ्चित् कारणमवश्यं भवति। भूकम्प-स्याऽपि सन्ति कारणानि। हिन्दुशास्त्राऽनुसारं शेषनागस्य फणायां स्थिता-ऽस्तीयं भूमिः। यदा शेषः स्वकीयफणां परिवर्त्तयति तदा पृथिवी चलायमाना जायते। विज्ञानञ्चामुमेव विषयं प्रकारान्तरेण प्रकाशयति, तेनोच्यते–यत्पृथिवी नीचैस्सावकाशा आग्नेयतत्त्व (लावा)–पूर्णा च विद्यते। पृथिव्यां ये भूधरा विद्यन्ते न तेषां नीचैर्विद्यते कोऽप्याधारः। ते स्वभारे निर्भरावस्थानाः सन्ति। एषु केषांचिद् वृद्धिकार्यमद्याऽपि समाप्तिं न गतम्, यथा–हिमालयस्य, 'आलपस'–पर्वतस्य च, इमौ पर्वतौ प्रतिदिनं वर्धेते। यदा कोऽपि पर्वत एकतोऽधिकं वर्धते, तदा तस्य भारपरिमाणं विकृतं भवति। परिणामतस्तस्य वर्धमानो भागो नीचैः पतति। पर्वतखण्डपातेन पृथिव्या अधःस्थितमाग्नेयतत्त्वं चलायमानं जायते, पृथिवी च कम्पते। भूकम्पस्यान्यदप्यस्त्येकं कारणम् यदाऽतिवृष्टिर्जायते तदाऽत्यधिकमात्रायां जलं पृथिव्या अभ्यन्तरे गत्वा आग्नेयतत्त्वं यावद् गच्छति आग्नेयतत्त्वतेजसा च तज्जलं बाष्पायते, उपरिनिर्गमनाय च यतते, यत्र पृथिवी निर्बला भवति तत्रायं बाष्पो भित्त्वा पृथिवीं बहिर्निर्गच्छति। पृथिवीभेदेन या जायते चलायमानता स एव भूकम्पः। अत एव संसारस्य ज्वालामुखपर्वतानामितस्ततो भूकम्पा अधिका जायन्ते। विज्ञानस्यैते द्वे एव कारणे हिन्दुशास्त्रप्रतिपादितकारणस्य व्याख्यानभूते विद्येते। विज्ञाना-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ऽनुसारमाग्नेयतत्त्वे यदा चञ्चलता भवति तदा भूकम्पो जायते। अधुनाऽस्माभिः पृथिव्या नीचैस्तरङ्गायमाणस्य उष्णस्याऽग्नेयतत्त्वस्य यदि कल्पना क्रियेत तदा वयं शोभनतया ज्ञास्यामो यत् सहस्रशोफणपरिमितोऽयं विशालसर्प एव, को वक्तुं पार्यते यदुष्णस्य आग्नेयतत्त्वस्य रूपकेणैव शेषनागत्वेन वर्णनं विद्यते विहितम्।

कारणदृष्ट्या परिणामदृष्ट्या च भूकम्पस्याऽपि बहवो भेदा जायन्ते। पृथिवीडोलो यद्यल्पीयान् स्यात् तदा उपरिस्थितानां वस्तूनां न कापि हानिर्जायते। अत्युग्रडोलेन पृथिवी अत्यधिकं कम्पते अग्रतःपश्चात् पुनश्चाग्रतो भ्रमति। एतेन भवनेषु छेदा भवन्ति, तदा पृथिवी कम्पमाना स्वस्थानादत्यधिकमुपरिष्ठाद् वर्धते। विशालानि भवनानि पतन्ति, नदीनां धाराः परिवर्तन्ते, अनेकान्यभूतपूर्वाणि परिवर्तनानि जायन्ते। यत्राऽधस्थमाग्नेयतत्त्वं प्रस्फुटति तत्र पृथिवी विदीर्यते, तत्रस्थं सर्वं विपर्य्येति।

इटली-जापान-ब्रह्मादिदेशा भूकम्पस्य देशाः कथ्यन्ते। इटलीदेशे विद्यते आल्पस–पर्वतः। यो हि प्रतिदिनं वर्धते। अत्र देशे ज्वालामुखाः पर्वता अपि विद्यन्ते। जापान-ब्रह्मदेशयोर्ज्वालामुखपर्वतकारणेनैवाऽधिका भूकम्पा जायन्ते। भारते विद्यते हिमालयो यः प्रतिदिनं वर्धते, अत्र विद्यन्ते ज्वालामुखा अपि पर्वताः। अतोऽत्राऽपि प्रायशो भूकम्पा जायन्ते एव। "काँगड़ा"–जनपदे ज्वालामुखपर्वतो विद्यते। अयं १९०५ ख्रिष्टाब्दे स्फुटित आसीत्। तेन प्रायश्चत्वारिंशत्सहस्रमानवा मृता आसन्। पञ्चाम्बुप्रान्तस्य केषुचिद् नगरेष्वपि अनेन डोलेन भवनेषु महती हानिः सञ्जाता आसीत्, कतिचन भवनानि विदीर्णान्यभूवन्। एतदनन्तरमेकोनत्रिंशद्वर्षपर्यन्तं न कोऽपि वर्णनीयो भूचालो भारते समजनि। सहसा जनवरी-मासस्य १९-तमतारिकायां १९३४ तम–ख्रिष्टाब्दे मध्याह्नानन्तरं सार्धद्विवादनसमये अखिलमपि उत्तरीयभारतं चकम्पे। अटकतः कटकं यावत् धरातलं कम्पमानमासीत्। बहुस्थानस्थानि भूचालयन्त्राणि भग्नानि सञ्जातानि, एतदासीद् डोलस्य तीव्रतायां प्रमाणम्। विहारप्रान्तस्य षड्मण्डलानि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नष्टानि अभूवन्। नयपालेऽपि समभूद्विशेषरूपेण महती हानिः। विहारत उत्तरदिशि भूकम्पस्याऽऽसीन्महान् प्रभावः। बहवः कूपा निर्जलाः सञ्जाताः। जलपूर्णानि महान्ति सरांसि सर्वथा जलरहितानि संवृत्तानि, ज्ञायते स्म यदेषु नासीत् कदापि पयसो नामापि। पृथिवीविदरणेनाऽनल्पीयस्यो बृहदाकाराः सरस्यः संवृत्ताः। बहुत्र यत्र नासीत् सिकताया नामाऽपि तत्र सिकतैव परितो दृश्यमाना जाता, सहस्रशो गृहाः पतिताः "मुगेरे" "दरभङ्गाया" श्चाऽभूतपूर्वा हानिरभवत्। केषुचित्स्थानेषु बाष्पयानस्याऽऽयसमार्गो भूमौ प्रविष्टः। महाभयङ्करस्यास्य भूकम्पस्य हानिः पूर्णाऽपि नाऽभूत् यावत्—

तदैव प्रायोऽस्माद् भूकम्पात् सार्धैकवर्षानन्तरम्, अर्थात् मई-मासस्य २९तमतारिकायां १९३६तमे ख्रिष्टाब्दे रात्रौ त्रिवादनकाले "क्वेटानगरं" भूचालेन सर्वथा विनष्टम्। केवलं द्वयोरेव डोलयोः सहस्रशो भवनानि इष्टिकाऽवशेषाणि संवृत्तानि। सप्तमीलेषु एकमपि गृहं नाऽवशिष्टम्, ये तावदवशिष्टास्तेऽप्येवं सञ्जाता अधुनैव पतिष्यन्तीति। सहस्रशो मानवाः शयाना एव मृताः। खानकलातस्य परिवारस्तु प्रभुकृपया सर्वथा सुरक्षितोऽतिष्ठत्। मच्छस्टेशनस्य भवनं वक्रतामगमत्। विद्युतस्तन्तवः (तार) राजमार्गाश्चाभज्यन्त। श्रूयते यद् भूचालादेकदिनपूर्वं नगरे एकोऽपि पक्षी नाऽऽसीत्। सेनास्थानमपि (छावनी) समभूद् हानिग्रस्तम्। "क्वेटा"—पूर्वस्य नन्दनं कथ्यते स्म, भूकम्पेनानेन स सर्वथा प्राध्वस्यत। ये जनास्तदा तत्राऽऽसन्, अद्याऽपि ते स्मारं स्मारं भूकम्पं कम्पन्ते। भूकम्पपीडितानां सहायताऽपि शोभनतया नाऽभूत्। सरकारेण नगरं परितः सेनापरिवारितं कृतमासीत्। इतरसंस्थास्थानाञ्च जनानामासीदन्तर्गमनमवरुद्धम्। स्वयं सरकारेणाऽखिलकार्यसम्पादनस्य चेष्टा कृता, किन्तु साफल्यं नाऽलभ्यत। पृथिव्यन्तर्लीनस्य सामग्रीजातनिष्कासनायापि नाशक्यत सुप्रबन्धः कर्तुम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भूकम्पस्य हानिकारकात् परिणामादात्मानं रक्षितुं जापानदेशे ब्रह्मदेशे च दारुवंशादीनां गृहा निर्मीयन्ते। क्वेटा-नगरेऽप्यधुनैतादृशा गृहाः निर्मापिताः, येषु भूकम्पस्य न भविष्यति अधिकः प्रभावः। आस्माकीनेषु ग्राम्येषु पुरातनेषु मृत्तिकानिर्मितेषु गृहेष्वपि न भवति भूकम्पस्य प्रभावः। किन्तु साम्प्रतन्तु अस्मभ्यं विशालभवनानि रोचन्ते। अत एव भूकम्पस्य दुष्परिणामानपि वयमेव सहामहे। भूकम्प एवास्ति—एकमेतादृशं वस्तु यत्र विज्ञानं प्रकृतिसम्मुखे पराजितं संवृत्तम्। विज्ञानस्य पार्श्वे नाऽस्ति कोऽप्युपायोऽस्य प्रतीकाराय। भूकम्पाद् रक्षायाः साधनानि अपि न सन्ति परिपूर्णानि। यतो भूकम्पः स्थानं समयञ्च स्थिरीकृत्य नागच्छति।

(श्रीहरिशर्मा शास्त्री)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

११—चन्द्रोपरागः

परमेश्वरस्तमोबहुलेऽस्मिन् संसारे निमग्नान् जीवानुद्धर्तुंकामः स्वभावेनैव सत्त्वगुणं बहुलतया समुन्नेतुमिच्छुक अन्तरा अन्तरा प्रकाशयति सत्त्वं तासु तासु पुण्यवेलासु तेषु तेषु वा तीर्थेषु ।

सत्ययुगे समस्ता अपि जीवाः सत्यप्रियाः सत्त्वबहुलाश्चाऽऽसन्, तदा सत्त्वसमुद्रेकिणः समयस्य समुत्पत्त्यै आवश्यकतैव नाऽऽसीत्, परमधुनातमः प्रधाने कलौ तु तदावश्यकता नितरां वर्तते । यतः सूर्यप्रकाशेन भास्वरे दिने तमोनिरासाय कस्यापि दीपदर्शनेच्छा न भवति । अतः कलावेव केवलं तमोनिरोधाय सत्त्वसमृद्धिसमर्थः समयोऽतिशयेनापेक्ष्यते । अत एव प्रायः प्रतिवर्षं द्विशस्त्रिशो वा भवति चन्द्रमसः सूर्यस्य वा उपरागः (ग्रहणं), स चायं कालस्तदुपरागदर्शिनां कृते सत्त्वप्रधानः । तथाहि—"तमोबहुला भूः" इति शास्त्रेषूच्यते, एतद् युक्तमपि पार्थिवं हि द्रव्यं तेजः प्रकाशं तिरोधत्ते । अन्धकारमयी छाया प्रकाशस्याऽभावं प्रकटयति । अत एव न्यायेऽपि तेजोभावरूपं तमोऽतिरिक्तं दशमं द्रव्यं न स्वीक्रियते । तत्र तमोबहुलाया भुवश्छायामाकलय्य निर्मितं तमोमयं लोकमधिष्ठाय तदभिमानी राहुर्नाम ग्रहो भगवता करुणामयेन तस्य तस्य लोकस्य तमोऽपनयनपरेण प्रेरितो भूत्वा तासु भूगोल–गतिवशाद् निर्धारितासु वेलासु चन्द्रमसं सूर्यं वाऽऽक्रामति । कथितमपि—

"उद्धृत्य पृथिवीच्छायां निर्मितं मण्डलाकृति ।
राहोस्तदमृतं स्थानं तृतीयं यत्तमौमयम् ॥" इति ।

तथा च—"तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुन्तुदः" इति वदताऽमरेणापि राहोस्तम इति नाम व्याहृतम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परमेश्वरो भगवान् यदा कृपया कञ्चित्कालमभिव्याप्य तत् समष्टिरूपं पार्थिवं तमः परिहरति तदा तत्र तत्र सत्त्वबहुलः कालः प्रसरति यत्र यत्र लोकैश्चन्द्रोपरागोऽवलोक्यते। अयमाशयः—यावन्तं कालं चन्द्रमसं सूर्यं वाऽभिव्याप्य समष्टिरूपं तमस्तिष्ठति तत्र तदानीं समष्टितमसः प्रक्षये यदि व्यष्टिरूपेणाऽपि तमः प्रक्षयः क्रियेत तदा सात्त्विकानां समीहितमवश्यमेव सिद्धं भवेत्।

इदमेवाऽभिप्रेत्य प्राचीनैः परमाचार्यैः परम्परेयं प्रचालिता—यदुपराग-वेलातः त्रिचतुःप्रहरादर्वागेव भोजनादिकं न विधेयम्, यतो भोजनोत्तरं यावत्तद् न सम्यक् परिणमति तावदालस्यादिसमुत्थानात् तमसो विस्तार एव प्रतीयते। स्नानञ्च ओजो बलञ्च प्रयच्छति, आलस्य-श्रम-जृम्भादि तमः कार्यं विनाशयति, अत उपरागसमकालमेव कृतेन स्नानेन तमो निरस्यते इति सम्यगेव। एवं भोजनपरिहारस्नानविधानाभ्यां शारीरं स्थूलं तमस्तु परिहृतं किन्तु मानसं सूक्ष्मं तमः कथं परिह्रियेत इत्याकांक्षायां मानसमपि तमो लोभरूपं परिहेयमिति दानमेव परं श्रेष्ठं न खलु प्रतिग्रहः, स तु प्रत्युत निन्द्य एव तदानीम्।

अत एवोपरागकाले दानमेव नाऽऽदानं विधेयमिति युक्तं पश्यामः। सत्त्वमयः प्रकाशबहुलः समयोऽतिदुर्लभः कदाचिदेव लभ्यते, अतः स्वहिताऽहितविज्ञानयुक्तैर्दान्तैः शान्तैः पुरुषैः चरमपुरुषार्थरूपं स्वाभीष्टदेवतास्मरण-रूपं सकलसुखप्रदं परमोपादेयं कर्म अवश्यमेवाऽऽचरणीयं भवति। अथ च "यज्ञायाऽऽचरतः कर्म समग्रं प्रविलीयते" इति स्वेष्टदेवतोद्देशेन पवित्रद्रव्यत्यागरूपो होमात्मको याग आरभ्यते तदानीम्। चिरचिन्तितं स्वेष्टदेव-मन्त्र-पुरश्चरणं वा सावधानं विधीयते।

चिररात्राय अन्धे तमसि मग्नः क्षणमपि प्रकाशबहुलं कालमवाप्य भाग्येन को नाम मनीषी स्वाभीष्टतमं कर्म नाऽऽरभेत कर्तुं तदानीम्। ग्रहणपरिहारसमयेऽपि समष्टितमसः पुनरावृत्तौ कथं नु व्यष्टितमसः समृद्धिर्न

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जायेतेति पुनरपि ग्रहणान्ते व्यष्टितमोऽपहारकं स्नानविधानं सन्तः कुर्वन्ति। अयमत्राऽभिप्रायः—

यत्रस्थैर्जनै राहुणा कृतं सूर्यचन्द्रमसो ग्रहणमवलोक्यते तत्रत्यानामेव समष्टितमस्तावन्तं कालमपहृतं भवतीति नियमेन तत्राधिकारिभिः द्वित्रयामात् प्रागेव भोजनं विहाय स्नानं विधाय व्यष्टिरूपं शारीरं तमोऽपहृत्य दानादिभिर्मानसीं वृत्ति निर्लोभां सम्पाद्य स्वेष्टदेवतास्मरणादिना स्वान्तःकरणस्य तमो विधूय अनन्तरं ग्रहणान्ते स्नानेन समागच्छत् समष्टितमः सङ्कोच्य स्वेष्टं साधनीयम् ; अतो ग्रहणकालः शुद्धः सत्त्वोज्जृम्भक इति सिद्धम् ।

(श्रीहरिदत्तशास्त्री)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१२--व्यायामः

"व्यायामपुष्टगात्रस्य बुद्धिस्तेजो यशो बलम् ।
प्रवर्धन्ते मनुष्यस्य तस्माद् व्यायाममाचरेत् ॥"

व्यायामो द्विप्रकारः शारीरो मानसश्च । धावन-संतरणोत्प्लवनादिकं शारीरो व्यायामः, मनन-कल्पन-निदिध्यासनादिकं मानसो व्यायाम उच्यते । किन्त्वद्यत्वे, व्यायामपदेन प्रायेण शारीरिकश्रम एव परिगृह्यते । शरीरस्य सुस्थत्वे मस्तिष्कस्यापि व्यापारः समीचीनतया परिचलति । किन्तु कायिकं स्वास्थ्यमेकेनैव दिनेन नैव सुसंपाद्यते । एष तावत् सर्व-सम्मतः सिद्धान्तो यत्प्रतिक्षणमस्माकं शरीरस्य क्षयो भवति, अतस्तदीया पूर्तिरपि अनुक्षणं करणीया । अस्मादेव हेतोः सर्वैः स्वशक्त्यनुसारं नियमतो व्यायामो विधेयः ।

कस्यचिद् नियमस्याऽभावे क्रियमाणो व्यायामः फलप्रदो नैव भवितु-मर्हतीति सदा स्मर्तव्यम् । शयनासनविहारादिषु यथाऽस्माभिर्नियमः परिपालनीयस्तथैव व्यायामेऽपि नियमस्य परमाऽऽवश्यकता वर्तते । यथा भोजने दिनद्वयस्य दिवसत्रयस्य वा व्यवधानं स्वास्थ्यं धूलिसात् करोति, यथा वा बहुजागरणमत्यधिकं वा शयनं स्वास्थ्यस्योपरि कुठारं पातयति, तथैव कालनियमेन शून्यः कादाचित्को व्यायामोऽभिलषितफलं न प्रददाति, प्रत्युत हानिमेव जनयति । व्यायामात् न केवलं शरीरमपि तु चेतोऽपि स्वस्थतामाप्नोति । व्यायामतो मनसि स्फूर्तिरुदेति, रोगा दूरतस्तिष्ठन्ति, जीवनं प्रमोदमयं जायते । व्यायामप्रभावेण वयं शरीरावयवानां नीरोगतां सम्पादयितुं समर्थाः । व्यायामकरणेन शरीरस्य सर्वेषु भागेषु सम्य-क्तया रुधिरसंचारो भवति । देहस्य समस्तावयवेषु कर्मण्यता, सहिष्णुता, ऊर्जस्विता चागच्छति । चरणयोर्व्यायामो यदि न क्रियते तदा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सञ्चारसक्तेः सर्वथैवाऽभावः सम्पद्यते । एवमेव करयोः सामर्थ्यं जनयितुं तदीयो व्यायामो नितरामावश्यको भवति । अन्यथा भुजयोर्दुर्बलता संभाव्यते । जठरानलमुद्दीपयितुं व्यायामस्योपासनं परमावश्यकम् । युक्तियुक्तेन व्यायामेनोदरे परिपाकशक्तिर्वर्धते । पाचनशक्तेर्दृढतायां मनोऽपि प्रसन्नं भवति । मनःप्रसादेन च सर्वाणि कार्याणि सिध्यन्ति । स्वस्थः स एव यो रोगशून्यगात्रः सदा विकसितवदन उत्साहसम्पन्नश्च भवति । इदं स्वास्थ्यं व्यायामाऽधीनम् । आयुर्वेदशास्त्रे च व्यायामस्य पदे पदे प्रशंसोपलभ्यते । व्यायामशीलो नरो वैद्यस्य किङ्करत्वात् सर्वथा विमुच्यते ।

इह जगति यावन्तो विश्वविख्यात-नामधेया महापुरुषा अभूवन्, ते सर्वे व्यायामव्यसनिन आसन् । क्षत्रियवंशधुरन्धरो दिल्लीपतिः श्रीपृथिवीसिंहो व्यायामस्य परमभक्त आसीत्, प्रतिदिनं स व्यायाममकरोत् । मृगयाप्रसङ्गेन स बहुधा स्वसाम्राज्यस्य सीमानमप्यतिक्रामति स्म । हिन्दूकुलसूर्यो वीरत्वावतारः कीर्तनीयचरितः श्रीराणाप्रतापमहोदयस्तु व्यायामस्य परमरसिकोऽभवत्, तन्महिम्नैव तस्य वक्षःस्थलं विशालं, बाहू पीनौ, कन्धरा च सुदृढा अजायन्त । तस्य चक्षुर्षोर्दुर्दर्शं तेजो व्यायामेनैव समुत्पादितम् । आर्यतायाः समुन्नयनाय गृहीतव्रतः स्वदेशभक्त–शिरोमणिर्महाराष्ट्रकेशरी श्रीशिव–वीरोऽपि व्यायामस्य बलेनैव निजकार्यं स्फूर्तेरदम्योत्साहस्य च केन्द्रं चकार । तस्य सर्वे सैनिका अश्वारोहणपरायणा आसन् । भीष्म-भीमार्जुनादीनां तु कथैव का ! ते तु व्यायामशक्तेर्निदर्शनभूता एवासन् । व्यायामभूमिषु तेषामुदग्रा हुङ्काराः कम्पयन्ति स्म सर्वां धरित्रीम् । इदानीमपि महात्मनां वन्दनीयो गान्धिमहोदयोऽपि स्वकीये आत्मबलपक्षपातित्वे सत्यपि प्रत्यहं स्वास्थ्यसंपादनाय क्रोशद्वयं ततोऽप्यधिकं वा भ्रमणं पद्भ्यामेव करोति ।

व्यायामे संयमस्य महती आवश्यकता विद्यते । तद्विधानेऽतिशयो नैव करणीयः । निजबलानुकूल एव व्यायामो विधातव्यः । निजां शक्तिमविचार्य ये व्यायामं कुर्वन्ति, तैः स्वं महदनिष्टमेव क्रियते । अयथा-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बलमनुष्ठीयमानो व्यायामो मानवं शक्तिविरहितमेव विदधाति। व्यायामे संयमस्य मात्रायाश्च सविशेषं विचारः करणीयः।

शयनादुत्थाय ये खलु व्यायामं कुर्वन्ति ते व्यायामविधिं न विदन्ति। ये च भुक्त्वैव व्यायामे प्रवर्तन्ते तेऽपि मन्दधिय एव। रिक्तोदरेणापि न कर्तव्यो व्यायामः। एवमेव मात्राया अपि विचारः करणीयः। तत्र न्यूनाधिकत्वं नैव विधेयम्। यथा यथाऽभ्यासो वर्धेत तथा तथैव व्यायामोऽपि वर्धनीयः। अभ्यासशीलः प्रचुरमात्रायां श्रमं कर्तुमर्हति; किन्तु तच्छून्यः स्वल्पमेव कुर्यात्। व्यायामस्यानेके प्रभेदाः सन्ति, केनापि व्यायामेन सर्वाङ्गीणः श्रमो जायते, यथा—वारितरणात्, द्वन्द्वयुद्धात्, वृक्षपर्वताधिरोहणाच्च। कोऽपि व्यायामोऽवयवविशेषमेव पुष्टं करोति, यथा हाकीक्रिकेटादयो लक्ष्यवेध–प्रभृतयः। केनापि देहस्य पश्चार्धमेव पुष्टिमाप्नोति, केनापि शेषार्धमेव। एषु व्यायामप्रभेदेषु मानवः स्वरुचिं स्वावश्यकतां च विचार्यैकतममाश्रयेत्। सर्वे सर्वप्रकारकं व्यायामं कर्तुं न क्षमन्ते। येऽधिकं व्यायामं कर्तुं न पारयन्ति तैः केवलं भ्रमणमेवावलम्बनीयम्। भ्रमणं हि सर्वोत्कृष्टो व्यायामोऽस्ति। अनेन मनोविकासः, शक्तिवृद्धिः, पाचनसामर्थ्यस्य चोत्कर्षः सम्पाद्यते। नगराद् बहिरुन्मुक्ते क्षेत्रे धावनमपि विद्यार्थिनां कृते लाभप्रदमस्ति। दीर्घायुष्यावाप्तये जीवनानन्दानुभूतये च व्यायामात् समीचीनं किमपि साधनं न विद्यते।

(श्रीउमेशदत्तशास्त्री)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१३--यस्य बुद्धिर्बलं तस्य

जगति शारीरिक–बलशालिनो जना एव सफला भवन्तीति नैष ऐकान्तिकः सिद्धान्तः। प्रत्युत शारीरिकं बलं बुद्धिबलं समाश्रित्यैव कार्यं कुर्वद् दृश्यते। बुद्धिबलमेवैतादृशं बलमस्ति यत् शारीरिकबलापेक्षया कोटिशो गुणाधिकं कार्यं साधयति। अपरिमित-शारीरिकबला मानवा येषु कर्मसु सर्वथाऽसमर्था अवलोक्यन्ते, तान्येव कर्माणि निर्बल–कृश–शरीरैर्बुद्धिमद्भिर्मानवैः क्षणे एव संसाध्य दर्शितानि। शारीरिकं बलं परिमितं सर्वथाऽन्धं च विद्यते। बुद्धिबलमपरिमेयं ज्ञानसम्पन्नं प्रकाशमयं चास्ति। बुद्धिबल–समक्षेऽतितुच्छं शारीरिकं बलम्। वास्तविको बलवान् बुद्धिमानेवास्ति, इत्युच्यते—

"यस्य बुद्धिर्बलं तस्य"

बहवो बलवन्तो मल्ला बुद्धिबलाभावेन संसारे दुःखं प्राप्नुवन्ति पराजीयन्ते च। निर्बला जना बुद्धया अधिकाधिकामुन्नतिमधिगच्छन्ति। बुद्धिबलसम्मुखे शारीरिकं बलमतितुच्छं पङ्गु चास्ति। भासुरकसिंहस्य को नाधीतवान् कथाम्! एकेनाल्पीयसा शशकेनात्मबुद्धिकौशलेनाऽतुलबलोऽपि सिंहः कूपे निपातितो मारितश्च। विशाला मदमदमत्ता गजा मनुष्यैर्निजयाऽतिचतुरया बुद्धया वशीभूताः क्रियन्ते। सिंह-व्याघ्रादीनारण्यान् महामहतो हिंस्रान् जन्तून् बुद्धया वशीकृत्य तैरनेकधा क्रीडन्ति।

बुद्धिबलाधारेण जगति एतादृशाश्चमत्काराः समभूवन्, येषां समक्षे शारीरिकं बलं सर्वथाऽकिञ्चित्करं संवृत्तम्। अधिकाऽधिक-शारीरिक-बलशाली मनुष्य एकस्मिन्नहनि पञ्चाशत्क्रोशमितं पन्थानमतिपारयितुं शक्नोति, परं बुद्धिबलनिर्मितैः स्टीमेञ्जनादिभिः सहस्रशः क्रोशानां यात्रा बाष्पयानैर्वायुयानादिभिश्चाद्यत्वेऽल्पीयस्येव समये कर्तुं शक्यते। सकलयापि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शक्त्या एकमीलं यावदति कठिनतया शब्दं गमयितुं क्षमते मानवः, परं तार–रेडियो–वायर्लेसादिभिर्बौद्धिकचमत्कारैर्मानवस्य शब्दस्तत्कालमेव सहस्रशो मीलानि यावत् प्रापितः। शारीरिक–बलाधारेण खड्गादिभिः शस्त्रैर्युद्धे परिगणिता एव जना मारयितुं शक्यन्ते, किन्तु बुद्धिप्रभावाऽविष्कृतैः "परमाणुबमादिभिः" भयङ्करशस्त्रैरल्पीयःस्वेव क्षणेषु कोटिशो जना निहन्यन्ते।

एतदतिरिक्तं समस्तं नैतिकं बलमपि बुद्धिबले एवास्ति निर्भरम्। कूटनीतेः प्रभावेण प्रबलानि विशालानि साम्राज्यानि वशीक्रियन्ते। चाणक्यस्य बुद्धिबलेन कूटनीत्याऽतिसुदृढं नन्दसाम्राज्यं दिवसेष्वेव सर्वथा विध्वंसितम्। अथापि चत्वारिंशत्कोटिषु भारतीयेषु परिगणिता एवांग्रेजा बुद्धिबलेन कूटनीत्यैव चिरं शासनमकार्षुः। किञ्च दैहिकं बलमल्पीयसि रोगे क्षीणं सञ्जायते, अधिककार्यकरणेन च तज्जर्जरितमेव भवति। परं बुद्धेर्यावान् प्रयोगः क्रियते तावत्येव सा सूक्ष्मा तीक्ष्णा च जायते। बुद्धिमनाश्रित्य शारीरिकबलस्य उपयोगस्तु दुरुपयोगतां याति यत्र अनन्ता आपदो निपतन्ति मानवे।

बुद्धिमतो जनस्य विशालं भवति कार्यक्षेत्रम्। स जगति महतो महान्ति कार्याणि विदधाति, यानि सर्वदार्थं मानवसमाजस्य कल्याणकारीणि सिद्ध्यन्ति।

बुद्धिबलेनैव दार्शनिक–सिद्धान्तानामाविर्भावो जातः। येष्वद्य निखिलमपि जगद् विद्यते मुग्धम्। बुद्धिबलमेवात्यन्तपरिमार्जितं सद् आत्मबलं जायते। आत्मबलसमक्षे च किमपि जागतिकं वस्तु उच्चतरं न तिष्ठति। आत्मबलस्यालौकिकी शक्तिप्रतिमा असीमा च भवति, सा बाह्यसाधनानि नापेक्षते। अगस्त्यस्य सार्धचुलुकद्वयेन समुद्रपानं, क्षणे एव सकलसंसारस्य चित्रपरिवर्तनं साधारणतरमेवात्मबले। ऋषिभिर्निजां बुद्धिं प्रकृत्यन्तस्तरे नीत्वा समस्तसंसारस्य साक्षात्कारोऽकारि।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तुच्छत्वं च तस्य निश्चित्य ततो व्यरज्यत। अथ च निजा रूक्षा बुद्धिः पारमार्थिकसत्ताया दर्शने नियुक्ता, तस्यैवैष परिणामो यत्ते नश्वरशरीरस्य सुखाभासमात्रादुत्थाय नित्यसच्चिदावस्थां प्रापन्, सर्वथा दुःखविमुक्ताश्चाभूवन्। अखिलमेतद् बुद्धेर्माहात्म्यम्। तदग्रे इतराणि सर्वाणि साधनानि बलानि वा सर्वथाऽकिञ्चित्कराणि निस्साराणि च सन्ति। बुद्धिबलमेव मानवं वास्तविकबलशालिनं विदधाति। तत एवोक्तं कविना केनचित्— "यस्य बुद्धिर्बलं तस्य"।

(श्रीहरिशर्मा शास्त्री)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१४--मातृभूमिः

देशभक्तिर्नाम स्वदेशे निष्कारणप्रेमा। इयं पुण्या भावना अन्यासां भावनानां श्रेष्ठतमा। एतया प्रेरितो मानवः स्वार्थपरित्यागेनापि देशहितं वाञ्छति। इयं तत्तद्देशोत्पन्नेषु स्व-स्वदेशं प्रति प्रायः स्वाभाविकी एव। सर्वोऽपि जनः कीदृशोऽपि स भवेत् स्वदेशप्रशंसां निशम्य प्रसीदति, निन्दया च दुःखितो भवति। दृढतां गतेयं भावना किमपि सामर्थ्यमपि जनयति मनुष्येषु। प्राणविनाशावसरे सर्वधनापहारेऽन्यस्मिन् वा संकटे कातरमपि साहसिकं करोति, दुर्बलमपि बलिनं करोति, आश्चर्योत्पादकानि च कार्याणि कारयति। कारुणिकाः शान्ता विद्वांसोऽपि आपद्ग्रस्तं देशं निरीक्ष्य तत्परित्राणाय स्वाध्ययनाध्यापने परित्यज्य सैन्यवृत्तिं स्वीकुर्वन्ति, देशे विदेशे च महान्तं मानमासादयन्ति।

देशभक्तिरनेकविधा। निर्वासितस्य स्वदेशं प्रति या खलु गमनोत्कण्ठा सापि भक्तिर्यामधिकृत्य कविभिः काव्यानि निबद्धानि। विदेशे सर्वं सुखमुपयुञ्जानोऽपि यथेष्टाहारविहारोऽपि सदा जन्मभूमेरुत्कण्ठां कुरुते। नित्यं स्वदेशविषयकान् स्वप्नान् पश्यति। चिरवियुक्तैः सखिभिर्बन्धुभिश्च मनसा संयुक्तो भवति, चिरं च संभाषते। उक्तमपि—

"अस्ति यद्यपि सर्वत्र नीरं नीरजराजितम्।
रमते न मरालस्य मानसं मानसं विना॥"

या च परैराक्रंस्यमानं स्वदेशं रक्षितुमिच्छा साऽपि देशभक्तिर्भवति। इयं च जनसमूहं स्वार्थपरित्यागाय समुत्थानाय यथा प्रेरयति तथेतरत्किञ्चिन्न। एतत्प्रेरिता एव सहस्रशो लक्षशो लोका स्वसुखमुपेक्ष्य इष्टजनवियोगमविगणय्य जीवितमपि तृणीकृत्य दुःखसमूहं सहमाना अपि तथा चेष्टन्ते

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यथा शत्रवः पलायनमेव शोभनं मन्यन्ते । येऽपि नाम कृशाङ्गा विकलाङ्गा बालाः स्त्रियो वृद्धा वा योद्धुं न समर्था भवन्ति तेऽपि शत्रुपराजयं कामयन्ते। धनिकाः खलु सम्मुखयुद्धं कर्तुमशक्ता अपि स्वधनमेव देशपरित्राणार्थं देशनायकेष्वर्पयन्ति । इयमेव भावना देशस्य विपत्तिकाले सर्वेष्वपि वर्गेषु ऐक्यं जनयति । महमूदेन सह युद्धे भटिण्डेश्वरस्य सहायतायै कान्यकुब्जेश्वरादयो बहवो राजान एकत्रीभूताः । आर्यललनाभिः स्वाः शरीरभूषा एव विक्रीय समरे विनियोगाय प्रेषितं धनम्। अन्येष्वपि देशेषु प्रचुराण्येतादृशानि उदाहरणानि ।

अनेकानि खलूपाख्यानानि शूराणां देशस्वतन्त्रतायै प्रियान् प्राणानपि त्यक्तवतां देशवत्सलानाम् । इह देशे पौरुषस्य, प्रतापस्य, झांसीराज्ञ्याश्च वृत्तान्ताः कं न विचलितमुत्साहयुक्तञ्च कुर्वन्ति । कं वा न रोमाञ्चितं करोति धन्यस्यास्य 'नाहं शय्यामधिशयिष्ये, न श्मश्रूणि आवर्त्योन्नमयिष्ये, पलाशादिपत्रे न्यस्यान्नं भोक्ष्ये न रजतादिपात्रे, न चित्तौडभुवि पदमर्पयिष्ये यावन्न चित्तौडभूः शत्रुहस्तान्निर्मुच्येत' इति प्रतिज्ञा ।

इयमपरा देशभक्तिर्यः परिशुद्धः प्रणयो जनन्यामिव जन्मभूम्यां राजनीतिज्ञानां नेतृप्रमुखाणाम् । एते खलु स्वेनाचारेण देशस्य सर्वदैव उन्नतिं कुर्वन्ति, नहि तादृशमेकमपि कार्यं कुर्वन्ति येन देशहितमुपहन्येत, तद्यशो वा विदूष्येत, तद्गौरवं वा हीयेत । ये खलु स्वधर्माननुतिष्ठन्ति, देशविधानानुसारं वाऽऽचरन्ति ते सर्वेऽपि ग्रामीणा नागरिका वा श्रेष्ठतमा देशभक्ताः ।

देशकल्याणाभिलाषुकाणां समाजसुधारकाणां परिशोधकानामपि अनुत्तमा देशभक्तिर्भवति । ते हि अन्याय्यं व्यवहारमभीतवद् निर्दिशन्ति समाधानं च कुर्वन्ति । अनिष्टान् पारम्पर्यागतानाचारान् विचारांश्च दृढतया निन्दन्ति, संभूय समुत्थानं प्रेरयन्ति, हितं तथ्यं चोपदिशन्ति । परं लोकस्तानन्यथा गृह्णाति । तेन ते प्रायो लोकस्य प्रिया न भवन्ति, द्वेष्या वा बहुधा भवन्ति । न हि ते प्रभूणां न वा प्रजानां प्रशस्या भवन्ति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ये खलु स्वार्थसंधित्सया देशस्योपकुर्वाणा इव दृश्यन्ते ते हि मिथ्याभक्ता देशभक्ताभासा वेदित्व्याः परिहर्तव्याश्च ।

स्वराष्ट्रश्लाघात्मिका परराष्ट्रनिन्दात्मिका च देशभक्तिरभिनन्दनीया न भवति । एतया प्रयुक्तो जनसमूहः स्वदेशेऽसन्तमपि वैभवमुच्चैर्गायति, परत्र सन्तमपि निन्दति । स्वदेशे सर्वमनवद्यं पश्यति परदेशे च सावद्यम् । एतदावेशेन बृहद्राष्ट्रं लघूनि परराष्ट्राणि उपद्रवति ।

सर्वाङ्गसुन्दरी भव्येयं भावना देशभक्तिर्नाम । राजनीतिनिपुणा जनतागतां पुण्यामपीमां भावनां स्वार्थप्रसाधनाय विनियोगं नयन्ति । अतिक्रान्ते विश्वयुद्धे शर्मण्यदेशनायकानां जापानदेशनेतृणां च समाचारोऽत्र निदर्शनम् । अत्रापि सुधीभिः सावधानैर्भाव्यम् ।

(श्रीचारुदेवशास्त्रिणां प्रस्तावतरङ्गिणीतः संक्षिप्य सरलीकृत्य च संगृहीतः)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१५–संयुक्तराष्ट्रसंघः

(United Nations Orgonization)

यन्त्रप्रधानपाश्चात्त्यसभ्यतायाः परमोऽयमभिशापो यत्प्रतिविंशतिवर्षं विश्वयुद्धमावर्तते, तत्प्रत्यङ्गभूतानि एकदेशीययुद्धानि तु प्रायेण प्रतिवर्षमेव भवन्ति। एतेषु युद्धेषु कोटिशः सैनिकानां नागरिकाणां नृशंसविनाशः, अगणनीयार्बुदरूप्यकाणां स्वाहा, भयङ्कराणां नूतनानां रोगाणां स्थायिमहर्घतायाश्च प्रसारो युद्धावसानानन्तरमेव जायते। एतत्सर्वं समीक्ष्य कतिपये सुधियो महानुभावा जगति अविच्छिन्नशान्तेः संस्थापनाय, युद्धानां निरोधाय चैकस्या अन्ताराष्ट्रीय-संस्थायास्तदनु विश्वराज्य-संस्थापनस्य चावश्यकतां तीव्रतया समनुभवन्ति, यदर्थं तैः प्रयासा अपि विहिताः।

परं प्रथमविश्वयुद्धानन्तरं संस्थापितोऽन्ताराष्ट्रीयसंघो महाशक्तीनां स्वार्थपूर्णकूटनीत्याः प्रयोगैरसाफल्यमगच्छत्। द्वितीयविश्वयुद्धावसानात्पूर्वमेव राष्ट्रैर्विवादानां शान्तिपूर्वकनिर्णयाय पुनः संयुक्तराष्ट्रसंघस्य संघटनमकारि। तदनुसारं १९४४ ख्रिष्टाब्दे अक्तूबरमासस्य सप्तमतारिकायां डम्बर्टन ओक्स (Dumberton Ox) स्थाने ब्रिटेन–सोवियतरूस–संयुक्तराष्ट्र–चीनदेशानां प्रतिनिधिभिरस्य विधानमपि व्यरचि। ततः १९४५ ख्रिष्टाब्दस्य जूनमासे २६ तारिकायां सानफ्रांसिस्को-सम्मेलनावसरे विश्वस्यापि विश्वस्य राष्ट्रैरेकत्रीभूय तद्विधानं सुविचार्य कतिपयपरिवर्तनानि विधाय स्वीकृतम्।

अस्याः संस्थाया उद्देश्यं—सामूहिकप्रयासैरन्ताराष्ट्रीयशान्तेः, सुरक्षायाः सामाजिकप्रगतेश्च स्थिरीकरणं, स्वाधीनताक्षेत्रस्य परिवर्धनं, अन्ताराष्ट्रियक्षेत्रे कार्यनिरतानां संस्थानां कार्येषु ऐक्यं समुत्पाद्य तासां

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सफलतायै साहाय्यप्रदानञ्चास्ति। तानि सर्वाण्युद्देश्यानि संक्षेपतोऽधोलिखितानि सन्ति—

(१) सामूहिकप्रयत्नैः शान्तेः संस्थापनं स्थिरीकरणञ्च।

(२) सदस्यराष्ट्राणां सार्वभौमिकसाम्यस्य स्वीकरणम्।

(३) विभिन्नराष्ट्राणां पारस्परिककलहानामन्वेषणम्, तेषामन्योऽन्यवार्तालापेन संधानञ्च।

(४) शान्तिस्थापने प्रभावपूर्णानामुपायानां निश्चयः।

(५) अन्ताराष्ट्रियशान्तेर्भङ्गाय समुद्यतानां राष्ट्राणां निग्रहाय राजनैतिकानामार्थिकानां सैनिकानाञ्चोपायानां प्रयोगः।

(६) अन्यराष्ट्राणां स्वातन्त्र्यस्य भौगोलिकैक्यस्य च विरोधे शक्तिप्रयोगस्य निषेधः।

एतेषामुद्देश्यानां पूर्त्यै संयुक्तराष्ट्रसंघस्यान्तर्गताः कतिपयाः सभा समितयश्च संस्थापिता अभूवन्—

(१) साधारणसभा (General Assmbly) संयुक्तराष्ट्रसंघस्य समस्त–सदस्यराष्ट्राणि अस्याः सदस्यानि भवन्ति। प्रत्येकसदस्यराष्ट्रस्य पञ्च प्रतिनिधयो भवन्ति। परन्तु तेषां मतमेकमेव भवति। अस्या अधिकारक्षेत्रमतिसीमितमस्ति। अनया शान्तिभङ्गात्मककृत्येषु सुरक्षापरिषदो ध्यानमेवाकृष्यते। राजनैतिक-सामाजिकार्थिकसमुन्नत्यै अनुसन्धानमपि कार्यतेऽनया।

अस्यां सुरक्षापरिषदः षण्णां सदस्यानां, आर्थिकसामाजिकपरिषदोद्वादशसदस्यानां निर्वाचनं क्रियते। संरक्षणपरिषदः सदस्या अपि अनयैव प्रस्तूयन्ते। संयुक्तराष्ट्रसंघस्य प्रधानमन्त्रिणो निर्वाचनमत्रैव भवति, अस्या वार्षिकाधिवेशने नवसदस्यानां प्रवेश आयव्ययपत्रकञ्च विचार्यते। आवश्यकतानुसारं विशेषाधिवेशनमप्यस्याः क्रियते।

(२) सुरक्षापरिषद् (Security Council)–इयं सर्वतोऽधिकं महत्त्वं बिभर्ति। इयं संयुक्तराष्ट्रसंघस्य कार्यकारिणीवत् मन्यते। अस्या

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एकादशसदस्येषु अमरीका–ब्रिटेन–रूस–फ्रांस-चीनाः स्थायिसदस्याः, अन्ये षट् चास्थायिनः सन्ति। भारतवर्षमेषु दिनेषु अस्या अस्थायिसदस्योऽस्ति। अस्यां निर्णयाय सप्तमतानामावश्यकता भवति। स्थायिसदस्येषु प्रत्येकेन निषेधाधिकारः (Veto) धार्यते। युद्धनिरोधः शस्त्रीकरणे नियन्त्रणश्चास्याः कार्यमस्ति। सप्रभावोपायप्रयोगोऽनया कर्तुं शक्यते।

(३) आर्थिक-सामाजिक-परिषद् (Economic & Social-Council) अस्या अष्टादशसंख्याकसदस्यानां निर्वाचनं वर्षत्रयाय साधारणसभया क्रियते। अस्या उद्देश्यं विश्वनागरिकाणां जीवनस्तरोन्नयनम्, कार्याभावनिरोधः, सामाजिकार्थिक-स्वास्थ्योन्नतिः, अन्ताराष्ट्रीयसहयोगश्चास्ति। अधोलिखितानि संघटनानि अस्या एवान्तर्गतानि सन्ति—

(१) अन्तराष्ट्रीयबैङ्क (International Monetary Bank)
(२) अन्ताराष्ट्रीयमुद्राकोषः (Do Do Fund)
(३) ,, श्रमसंघः (Do Labour organizaton)
(४) ,, डाकसंघः (Do Postal Union)
(५) ,, उड्डयनसंघटनम् (Do Civil Aviation Organ)
(६) अन्ताराष्ट्रीयटेलीफोनसंघः (Do Telecommunication)
(७) अन्ताराष्ट्रीयशरणार्थिसंघटनम् (International Refugee' organization)
(८) ,, स्वास्थ्य ,, (Do Health Do)
(९) संयुक्तराष्ट्रीयशिक्षा-विज्ञान–सांस्कृतिकसंघटनम् (United Nations Educational, Scientific and Cultural Organization)

(४) संरक्षकतापरिषद् (Trusteeship Council) प्रथमविश्वयुद्धात्पूर्वं शत्रुदेशैर्दासीकृतानामर्धविकसितानां देशानां प्रबन्धाय समुन्नयनाय च कतिपयदेशानां संरक्षतां समाप्य साम्प्रतं तेषां प्रबन्धोऽनया क्रियते। शनैः शनैरनया एते देशाः स्वतन्त्राः करिष्यन्ते।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(५) अन्ताराष्ट्रीयन्यायालयः (International Court) अत्र साधारणसभया निर्वाचिताः पञ्चदश न्यायाधीशाः सन्ति। प्रत्येकन्यायाधीशो नववर्षेभ्यो नियुज्यते। न्यायालयोऽयं हेग (Hague) स्थाने विद्यते। सदस्यराष्ट्राणां कलहनिर्णयः परामर्शदानञ्चास्य कार्यमस्ति।

(६) कार्यालयः (Office) लेकसक्सेस– (Lake Success) स्थानेऽस्य कार्यालयो विद्यते। 'श्रीट्रिगवी ली' इति नामा राजनीतिज्ञोऽस्य सम्प्रति प्रधानमन्त्री। समस्तमपि कार्यजातं कार्यालयादेव सम्पाद्यते।

अद्यत्वे राष्ट्रसंघो महाशक्तीनां निषेधाधिकारेण परस्परकलहेन, अमेरिकादेशस्य प्राधान्येन, महाराष्ट्राणां स्वार्थपूर्णकूटनीत्या च व्यर्थीकृत इवोपलक्ष्यते। काश्मीरकोरियादिकाण्डेषु स्वार्थवशादेव कश्चिद् निर्णयो न क्रियते। अधुना तु संयुक्तराष्ट्रसंघ एतैः कपटपूर्णकार्यैर्निर्बलराष्ट्राणां प्रवञ्चनमात्रमेव प्रतीयते। परं सामाजिकादिक्षेत्रेषु पर्याप्त–सन्तोषजनकप्रगत्या लाभोऽपि महान् भवति। कदाचिद् राष्ट्राणां पारस्परिकसहयोगेन सहनशीलतया स्वार्थपरित्यागेन च प्रयोगोऽयं शनैः शनैः सफलतां गच्छेदित्येवाशास्यते।

(उपसम्पादकस्य)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१६--राष्ट्रीयता

यद्यप्यद्य अन्ताराष्ट्रीयताया डिण्डिमनादः समन्ताद् उद्घुष्यमाणः कर्णगोचरीभवति, परं नहि किञ्चिदपि राष्ट्रमीदृशं साम्यवादप्रधानं साम्राज्यवादप्रधानं जनतन्त्रात्मकमधिनायकत्वाधिष्ठितं वा दृष्टिपथमायाति यस्य समस्तमपि प्रवृत्तिजातमन्तस्तलनिविष्टया राष्ट्रीयता-भावनया प्रेरितं परिचालितं वा न स्यात्। राष्ट्रघटकेषु राष्ट्रेषु चेयं पारस्परिकसम्बन्धाय भावना अत्यावश्यकी, परं यद्यस्याः स्वरूपं विशुद्धमेव तिष्ठेत्। अनया महान्ति राज्यानि साम्राज्यानि च समुत्पादितानि, प्रचुराणि विदेशीयानां साम्राज्यानि अस्या एव प्रभावेण समूलमुन्मूलितान्यभूवन्। अनया प्रचोदितैः प्रोत्साहितैश्च जनैर्बहूनि युद्धानि कृतानि। परमस्याः कुत्सितं रूपं निर्बलानां राष्ट्राणामुपरि प्रसह्य साम्राज्यसंस्थापनेऽधिनायकतन्त्रजनने च समवलोक्यते। आधुनिकैतिह्यं प्रायेण राष्ट्रियताप्रभावितं विद्यते।

परं केयं राष्ट्रीयता ? एतदुत्तरमतिकठिनमस्ति। एको विद्वान् कथयति यत् भावनेयं दृष्ट्वैव परिचेतुं शक्यते नान्यथा। इतरः—खलु 'विचित्रेयं काचिदिच्छा या प्रचुरजनसमूहमेकस्मिन् राजनैतिकसंघटने स्थातुं विवशीकरोती'ति स्वमतं प्रकटयति। अन्यो हि राष्ट्रीयतां आध्यात्मिकमेव न शैक्षणिकप्रश्नमपि स्वीकरोति। एकस्य फ्रैञ्चविदुषो मते राष्ट्रीयता सामाजिकशक्तिरपि मन्तव्या। राजनीति-लेखनकलयोर्वर्धनपरो विचारसमूहोऽपि राष्ट्रीयतैवेति समुद्घुष्यतेऽपरेण। वस्तुतस्तु राष्ट्रीयता अलौकिकी विलक्षणा चात्मिकभावनाऽस्ति यया विभिन्नदेशाः परस्परं पृथक् क्रियन्ते। राष्ट्रीयतायाः सम्बन्धः प्रदेशविशेषेण तस्य स्थायिनिवासिभिश्च साकं भवति। इतिहासस्य परम्पराणाम्, भावनानामाशानाञ्च समानत्वे यदा कस्यचित् प्रादेशिकसमूहस्य स्वाधीनता

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पूर्वकं यदा सामान्यजीवनं यापयितुमुत्कटोऽभिलाषो जायते स अभिलाष एव राष्ट्रीयतानाम्ना परिचीयते । अन्येषां मते समानानि भौगोलिकस्थिति–धर्म–जाति–भाषा–संस्कृतिरूपपञ्चतत्त्वानि वस्तुतो राष्ट्रीयताघटकानि सन्ति । इत्थं राष्ट्रीयता राष्ट्रीयाणां प्रबोधनपरा आत्मना बुद्ध्या च समुत्पादिता मनोवृत्तिः स्वीकर्तव्या ।

राष्ट्रीयता खलु द्विप्रकारा— विशुद्धा, विकृता च । स्वभावे तु राष्ट्रीयतायामशोभनत्वं नाम नास्ति किञ्चिदपि । इयं हि स्वदेशे प्रेमभावं प्रकटयति । अनया जना वीरतात्यागयोरत्युत्कृष्ट-कार्याणां विधानाय अत्याचार-दमनयोर्विरोधाय च प्रेरिता समुत्थापिताश्च । राष्ट्रीयतावादिनस्तु राष्ट्रीयतयैव अन्तराष्ट्रीयसहयोगे प्रगतिर्विश्वशान्तिसंस्थापनञ्च भविष्यतीति मन्यन्ते । वस्तुतो राष्ट्रीयतया मानवसमाजस्योन्नयने साहाय्यमपि महद् दत्तम् । अनया स्वाधीनताप्रयासे संलग्नायै जनतायै प्रभूततया बलं समर्पितम् । यद्यपि धर्म-भाषादीनि राष्ट्रीयतोत्पादकानि तत्त्वानि, परन्तु धर्म-भाषा-विचारेषु ऐक्यजननाय, संस्कृति-सभ्यतयोः संरक्षणाय अस्या एवावश्यकता । राष्ट्रीयताविनाशे कस्यचिद्देशस्य अस्तित्वमपि विस्मृतिगर्ते निपतति । यूनान-रूम-मिश्र-वेविलोन-प्रभृतयो देशा अस्य निदर्शनानि सन्ति । राष्ट्रीयताप्रकर्षेण अद्यत्वेऽपि वृद्धस्यापि सर्वदा नवीनस्य भारतस्य सत्ता विराजतेतराम् । कथितमपि—

"यूनान-मिश्र-रूमा सब मिट गए जहाँ से ।
बाकी है अब तलक भी नामोनिशाँ हमारा ।।"

कस्मादेतत् ? राष्ट्रीयताप्रभावेणैव । इत्थं राष्ट्रीयतयैव कस्यचिद्देशस्य कीर्तिपताका विश्वसमक्षे दोधूयते ।

परं राष्ट्रीयताया अन्योऽप्येकः पक्षो न विस्मर्तुं योग्योऽस्ति । अनया विभिन्नदेशानां दृष्टिः संकोचमापादिता । तेषु पार्थक्यभावस्योन्मेषेण अन्ता-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

राष्ट्रीयसहयोगे महान् प्रत्यूहसमूहः। समुत्थापितः कस्मिश्चिद्देशे राष्ट्रीयता-भावनाया उद्रेकेण स मानवसमाजस्य समुन्नयने समर्थां मैत्रीभावनां दूरतः परित्यज्य स्वामेवोन्नतिं वाञ्छन् निर्बलराष्ट्राणां मर्दनमपि स्वोद्देश्यत्वेन निश्चनोति। इत्थं साम्राज्यवादस्योत्थानं भवति। जनताऽपि राष्ट्रियताना-म्नि साम्राज्यवादस्य समर्थनाय पुनः पुनः प्रेर्यते। सन्धयो भज्यन्ते। अस्यां शताब्द्यां द्वयोरपि विश्वयुद्धयोर्मूलकारणमियं राष्ट्रीयतैव प्राधान्येन मन्यते। अत एव 'राष्ट्रियता राष्ट्रस्य प्रधानघातिके' ति केनापि कथितम्। अनया भावनया न्याये समादरोऽपि विनाशितः। राष्ट्रीयतया मनुष्येषु मिथ्या गौरवस्य अभिमानस्य च भावः समुत्पादितः। प्रत्येकमपि राष्ट्रं स्ववैशिष्ट्यं कार्यञ्चातिशयोक्तिपुरस्सरं प्रदर्शयति, अन्येषां गौरवमतिलघु कृत्वा प्रख्यापनाय प्रयतते। शनैःशनैरेतज्जनितया साम्राज्यवादिप्रवृत्या पूंजीवादि-लिप्सया च स्वदेशेऽपि प्रजातन्त्रप्रणालीं विनाश्य अधिनायकतन्त्रमुत्थाप्यते।

यदि विभिन्नराष्ट्राणां प्रतियोगितां परित्यज्य पारस्परिकसहयोगे विश्वासः समुत्पद्यते तदा राष्ट्रीयताया महत्त्वपूर्णस्य लाभप्रदस्य, आदर्शात्मकस्य सुन्दरस्वरूपस्य स्थापनमपि दुष्करं न भविष्यति। परन्तु राष्ट्राणां पूर्णस्वा-तन्त्र्यस्य राजसत्ताया अभिलाषः साम्राज्यवादश्चैतदादर्शस्य पूर्त्यां महान्तौ बाधकौ तिष्ठतः। परं पूञ्जीवादस्य विनाशमनु आर्थिकसाम्यमाधारीकृत्य निर्धारितेऽभिनवे समाजे सम्भवतो राष्ट्रीयताया दोषा अपगमिष्यन्ति। तदा राष्ट्रीयतया अन्ताराष्ट्रीयसहयोगोत्पत्ति-पुरस्सरमवश्यमेव विश्वशान्ति-रपि संस्थापयिष्यते इत्यस्माकं दृढमाशंसनम्।

(उपसम्पादकस्य)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१७--अन्ताराष्ट्रीयता

वर्तमानं हि नाम विज्ञानयुगम्; यत्कृताविष्कारजातेन बाष्पशकटी-धूम्रशकटी-समुद्रीयपोत-व्योमयान-नभोवाणी-तन्त्रीयन्त्रात्मकेन विभिन्न-देशानां यातायातसम्पर्कसंस्थापनञ्चातिसरलं विधाय विशालोऽयं संसारः परमसङ्कोचमापादितः। संसारस्य विप्रकृष्टप्रदेशे संवृत्ताया घटनायाः प्रभाव-स्तडिद्वेगेनाखिलेऽपि जगति समापतति। समस्ता अप्येकान्तरमनन्तरं वा स्थिता देशाः पारस्परिकप्रातिवेश्यतां प्राप्ता अद्य। तेषु प्रतिक्षणं विचारवि-निमयो व्यापारश्च भवति। प्रतिदिनं वयं संसारस्य विविधभागेषु निर्मितानां वस्तूनां प्रयोगं कुर्मः। नहि केनापि देशेन स्वापेक्षानुसारं निखिलानि वस्तूनि स्वयं समुत्पादयितुं शक्यन्ते। भोजनमपि वयं प्रायेण अमेरिकातः कैनेडातः, आस्ट्रेलियातः समागतस्य गोधूमस्य कुर्मः। सांस्कृतिकक्षेत्रेऽपि नभोवाणी–(Radio) चित्रपट–(Cinema)-मुद्रणयन्त्राणां कारणात् विभिन्नानि राष्ट्राणि नितरां निकटतां समागतानि। देशद्वयस्य सङ्घर्षोऽति-शीघ्रं विश्वव्यापियुद्धरूपमाकलयति। इत्थं पारस्परिकसहयोग–सम्बन्ध–शान्तिभिर्विना कस्यचिदपि देशस्य निवासिनश्चिरकालपर्यन्तं सुखिताः स्थातुं न प्रभवन्ति। अयं पारस्परिकसहयोग एव अन्ताराष्ट्रीयताशब्देन व्यवह्रियते। संसारोऽद्य अस्या महतीम् आवश्यकतामनुभवति।

राष्ट्रीयताया विशुद्धरूपादन्ताराष्ट्रीयतायाः समुत्पत्तिर्भवति। समान-भावेन स्वदेशीयस्य परदेशीयस्य च स्वातन्त्र्यस्य समादर एव विशुद्ध-राष्ट्रीयता। विशुद्धराष्ट्रीयतावादिनां वसुधैव कुटुम्बकं भवति। ते संसारस्य विभिन्नराष्ट्राणि एकस्यैव मानवसमाजस्याङ्गानि अङ्गीकृत्य हितैक्यं मन्वा-नास्तेषां समानहितावाप्तये पारस्परिकसहयोगस्य परमावश्यकतां प्रतिपाद-यन्ति। मानवसमाजस्य व्यक्ति–राष्ट्र–देशेभ्योऽधिकश्रेष्ठतायां तेषां प्रगाढो विश्वासः। अतो मानवसमाजकल्याणमेव प्रत्येकराज्यस्य राष्ट्रस्य च वर्तते

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परमं कर्तव्यम् । इत्थं समस्तराष्ट्राणां स्वातन्त्र्य-समानत्व-सहयोगात्मको-द्देश्यस्य पुरस्कारिणी विभिन्नराज्यानां पारस्परिकसम्बन्धस्य नीतिरेव अन्ताराष्ट्रीयतापदवाच्या मन्यते । अस्यां स्वराज्यहितसम्पादने परराज्य-हितमपि सर्वदा स्मर्यते । अस्या युद्धे साम्राज्यवादे चाविश्वासो विश्वा-सश्चास्ति अन्तराष्ट्रीयसहयोगे विश्वशान्त्याञ्च । मानवसमाजकल्याण-मेवाऽस्यां सर्वोपरि वरीर्वाति ।

अन्ताराष्ट्रीयसहयोगस्य परमावश्यकता विद्वद्भिः कतिपयशताब्दीभ्य-स्तीव्रतया समनुभूयते । चतुर्दशशताब्द्यां विदुषा केनचिदन्ताराष्ट्रीयसंस्थाया योजना विश्वस्य समक्षे स्थापिता। तदनन्तरं शान्तिसंधायापि कथितमभूत् । सप्तदशशताब्द्यां विभिन्नराष्ट्राणां पारस्परिकसम्बन्धाय कतिपये नियमा निर्धारिता अभूवन् । अष्टादशशताब्द्यां फ्रेञ्चलेखकेनैकेन एकोनविंशति-राज्यानां संघनिर्माणाय योजना व्यरचि । दार्शनिककाण्टेनापि ईदृश एव स्वप्नोऽवालोकि । भारतीयानान्तु कल्पनेयं वैदिककालादेवाऽऽसीत् । एको-नविंशतितमशताब्द्यां यूरोपे बहूनि लघूनि राज्यसंघटनानि संवृत्तानि येषु रूस–प्रशा-आस्ट्रियादेशानां 'पवित्रसंघ' इति नामधेयं प्रमुखमासीत् । १८९९ तमे ख्रिष्टाब्दे राजनीतिकदृष्ट्या अन्ताराष्ट्रियसहयोगाय एकं सम्मेलनं समजायत । परमेते सर्वेऽपि प्रयासा अधोलिखितकारणैर्व्यर्था अभूवन्—

(१) यातायातसाधनानामभावः ।
(२) विभिन्नराष्ट्राणां सभ्यतास्तरेऽसमानता ।
(३) स्वार्थपूर्ण-सुविधा-ग्रहणाय तीव्रप्रतियोगिता ।
(४) आयात–निर्यातवस्तुषु अनुचितकरसमारोपणम् ।
(५) महाराज्यानां स्व-स्वसैन्यदलानि ।
(६) साम्राज्यलिप्सा ।

ततो विंशतितमशताब्द्याः प्रथमविश्वयुद्धात् (१९१४–१८) भीतै-र्विश्वराजनीतिविद्भिरन्ताराष्ट्रीयशान्त्यै सुरक्षायै सहयोगप्रोत्साहनाय च १९१९ तमख्रिष्टाब्दे राष्ट्रसंघः (League of Natious) संस्थापितः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परन्तु महाशक्तीनां पारस्परिकसंघर्षेण, अन्योऽन्यस्योपरि संदेहेन ईर्ष्यया शात्रवेण च इयं संस्थापि असाफल्यमेव प्राप। स्वनिर्बलतया राष्ट्रसंघोऽयं द्वितीयविश्वयुद्धं (१९३९) निरोद्धुं नापारयत्।

द्वितीयविश्वयुद्धानन्तरं विश्वशान्तिसंस्थापनाय पुनरियं समस्या विश्वसमक्षं समागता। अतः १९४५ तमख्रिष्टाब्दे पुनः संयुक्त–राष्ट्रसंघस्य संस्थापनपुरस्सरं विश्वशान्तिसंस्थापनात्मकस्योद्देश्यस्य पूर्त्यर्थं पूर्णाः प्रयासा नवेनोत्साहेन क्रियन्ते।

परन्तु पूर्णशान्तिस्थापनाय विशुद्धराष्ट्रीयतां पुरस्कृतस्य सर्वहितकारिणोऽन्ताराष्ट्रीयत्वस्य प्रसाराय कतिपयतत्त्वानां महती आवश्यकता विद्यते। एतत्सर्वं निर्दिश्यतेऽधस्तात्—

(१) विश्वस्य निखिलदेशानां निश्शस्त्रीकरणपुरस्सरं संयुक्त—राष्ट्रसंघस्याधीनतायामन्ताराष्ट्रीयसैन्यमेकं भवेत्।

(२) अणुबम्बानां निषेधपुरस्सरमणुशक्तौ अन्ताराष्ट्रीयनियन्त्रणं सामाजिकहिताय तस्याः प्रयोगः।

(३) स्वविवादनिर्णयाय सर्वेषां देशानां हिंसापरित्यागः पारस्परिकवार्तालापस्य ग्रहणम्।

(४) महाशक्तीनां स्थायिसदस्यताया निषेधशक्तेश्च प्रतिषेधः।

(५) सर्वेऽपि निर्णया न्यायेन लोकमतानुसारेण च भवेयुः।

(६) अर्धविकसितानां प्रतिगामिनाञ्च देशानां विकासे पूर्णप्रयासः, तेषु आर्थिकात्याचारस्य साम्राज्यवादस्य च परिसमाप्तिः।

(७) विकृतराष्ट्रीयताया विनाशः, राष्ट्रीयप्रभुत्वस्य च अवसानम्।

(८) प्रत्येकदेशोऽल्पसंख्यैः सह समानता व्यवहारः।

(९) पौरस्त्यदेशानां विशेषतो भारतस्य ताटस्थ्येन प्रयुक्तानां विचाराणां पूर्णः समादरः।

(१०) पाश्चात्यशक्तीनां स्वयं गृहीतोपदेशकत्वस्य समाप्तिः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(११) विश्वसंस्कृतीनां समन्वयस्तत्र समन्वयमूलक-भारतीयसंस्कृतेः समुचितं स्थानम् ।

(१२) विश्वनागरिकताया मानवताया वरीवृध्यमानः प्रसारः ।

(१३) विभिन्नवादानां प्रसह्य समावेशाय कृतानां प्रयत्नानां परिसमाप्तिः ।

(१४) दोषारोपप्रत्यारोपाणामपनयनपुरस्सरं सौहार्दप्रचारः ।

इत्थं विवेकशील-प्रवर-पुरुष-कृतैः प्रयत्नैरवश्यं अन्ताराष्ट्रीयताया-स्तत्सहित-विश्वशान्ति-सुरक्षयोश्च संस्थापनं भविष्यति शीघ्रमेवेति आशास्यते प्राथ्यंते च करुणावरुणालयः परमेश्वरस्तत्समुत्पादनाय ।

(उपसम्पादकस्य)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१८-विज्ञानं, वैज्ञानिका आविष्काराश्च

विज्ञानप्रधानमिदं युगम्। परमिदं किञ्चिदभिनवं तत्त्वमस्तीत्येतत्कथनमपि समीचीनं न। यतः परमात्मना विचारशक्तिः केवलं मनुष्यायैव प्रदत्ता। सर्जनकालत एव यत्किमपि मानवेन समवलोकितं तत्र तस्य स्वाभाविकी जिज्ञासा समुत्पन्ना। तज्ज्ञानाय तेन प्रयत्ना अपि कृताः। साधारणज्ञानानन्तरं तस्य वस्तुनो विशेषज्ञानाय स्वविचारशक्तिः प्रयुक्ता। यथा यथा परितः स्थितानां तत्त्वानां ज्ञानं वृद्धिं गतम् तथा तथा मानवस्य प्रकृतौ व्यवहारे कार्येषु च परिवर्तनं समजायत। इत्थं प्राकृततत्त्वानां वरीवृध्यमानज्ञानेन मानवमस्तिष्के सामाजिकभावोत्पत्त्या शनैः शनैः तस्याऽऽवश्यकता अपि प्रवृद्धाः, यासां पूर्त्यै प्रचुरा आविष्कारा मेधाविभिः कृताः। परन्तु पुरा मानवमस्तिकं समन्वितमासीत्। तदा तेन विज्ञानस्य आविष्काराणाञ्च वास्तविकप्रयोजनमज्ञायि। स्वावश्यकतायां सामूहिकावश्यकतायाञ्च महत्त्वपूर्णमान्तर्यमप्यासीत् परिचितं तस्य। आध्यात्मिक-भौतिकावश्यकतासु सामञ्जस्यपूर्वकं चतुर्वर्गफलावाप्त्यात्मिकायां दिशि विज्ञानस्य आविष्काराणाञ्च प्रगतिः समवर्तत। परं विश्वेतिहासस्य मोहमदीयसंस्कृतिप्रधानयुगे समुचितदिशि प्रवहन्नयं प्रवाहोऽवरुद्धोऽभवत्। सप्तदशशताब्दीतः समारभ्य अद्यपर्यन्तं यान्त्रिकसंस्कृतिः प्रामुख्यमवाप। तेन चतुर्वर्गात्मके पुरुषार्थेऽर्थस्यैव प्राधान्याद् विज्ञानस्य तत्परिणामस्वरूपाऽऽविष्काराणाञ्च दिगपि परिवर्तनं प्रापिता।

नह्यत्र स्वल्पीयानपि संदेहो यदस्मिन् वर्षाणां शतद्वये येन प्रवेगेन विज्ञानस्य आविष्काराणाञ्च प्रगतिर्जाता, तत्सर्वमपि सूक्ष्मतया प्रविचारेण सर्वथाऽभूतपूर्वमेवाऽस्ति। अद्य मानवमस्तिष्कमपि दूरपर्यन्तं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विज्ञानमयं जातम्। प्रतिपदं कथं ? कुतश्च इति प्रश्नसमुच्चयः समुट्टङ्कयते। महता धैर्येण प्रचुरा वैज्ञानिका नवनवान्वेषणे संलग्ना विद्यन्ते। अद्य गवेषणकार्ये सुविधा अपि बह्व्यो दीयन्ते। लक्षशः कोटिशो रूप्यकाणि व्ययीक्रियन्ते। धार्मिकाणामन्येषां च प्रगतिविरोधिनां तावान् विरोधोऽपि नाक्षिलक्ष्यीभवति। मानवस्य जीवनोपयोगिनः पदार्था प्रचुरमात्रायामुपलब्धोक्रियन्ते। भोगबहुलेऽस्मिन् युगे निर्बाधनिश्चिन्तभोगस्योपलब्धये आधुनिकविज्ञानस्य प्रगत्या आविष्कारैश्च पूर्णसुविधानां पर्याप्तो योगश्च प्रदत्तः। परं मनुष्य-मस्तिष्कं विज्ञानप्रवाहेण सहैकपदेन धावितुमसफलं संवृत्तम्। लिप्सा लोलुपता स्वार्थपरायणता च न परित्यक्ता अभूवन्। विज्ञानोन्नत्यै राज्यानां संरक्षणात् प्रगतये निश्चितसरण्यभावाद् विज्ञानं तदनुप्राणिताविष्कारजातञ्च रचनात्मकमभूत्वा विध्वंसात्मकमभूत्। तदाऽपि प्राकृतिकशक्तीनां वशीकरणे मानवतालाभार्थं प्रयोगकरणे च यत्साफल्यं सर्वथाऽभूतपूर्वं मनुजेनालम्भि विज्ञानद्वारा आविष्कारैश्च तदपि न विस्मर्तुं शक्यते। अथ कतिपये आविष्कारा निर्दिश्यन्ते—

(१) विद्युच्छक्तिः—पुरा मनुष्यः स्वशारीरिकबलेन यथाशक्ति स्वकार्यजातमसाधयत्। परं तस्यापि भवति कुत्रचित् सीमा। अत उत्पादनमत्यल्पमभवत्, तस्माद् जीवनयापने सारल्यमनिवार्यमिवाजायत। परं बाष्पशक्तेराविष्कारेण पैट्रोलशक्तिज्ञानेन च यन्त्रेण मनुष्यस्य स्थानं गृहीतम्। विद्युच्छक्तेराविष्कारेण तु शक्तेरक्षयभाण्डागारमेव मानवेन समधिगतम्। अद्य तु प्रत्येकमपि कार्यं विद्युच्छक्त्या साधयितुं पार्यते। अपरिमिता जलशक्तिर्मानवताहितं गमिता विद्यते। नहि सा व्यर्थमेव विनश्यति। यन्त्रसञ्चालनं, शकटीगमनं, प्रकाशः, भोजनपक्तिः, गृहाणामुष्णीकरणं, शैत्यापादनञ्च, गृहाणां परिमार्जनञ्च, इत्थं शक्तिरियं नैकविधे कार्यकदम्बे संनियोज्यते।

(२) टेलीफोन-टेलीग्राफौ—द्वयमप्येतद् विद्युत्साहाय्येन कार्यं सम्पादयति। विप्रकृष्टदेशे स्थिता अपि वयं परस्परं वार्तालापं कर्तुं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शक्नुमः। अनेन मैत्री-वृद्धिः, व्यापारप्रसारः सुरक्षाप्रबन्धश्च नितान्तं सुकरो जातः।

(३) पत्रप्रेषणप्रणाली—इदमपि मानवमेधायाश्चमत्कारि कृत्यमस्ति। विश्वस्य प्रतिकोणं पत्रवितरणकेन्द्राणि संस्थापितानि सन्ति। पुरा सूचनाप्रेषणे होराणां दिनानां वा तु का कथा अब्देषु अपि समाचारज्ञानं दुष्करमासीत्। परमद्य द्विचक्रिकाणां, मोटराणां, बाष्पशकटीनां, व्योमयानानाञ्च साहाय्येन स्वल्पे एव समये सहस्रक्रोशानामपि ज्ञानं भवति।

(४) यातायातप्रणाली—अद्य बाष्पेण, विद्युता च सञ्चाल्यमानानां मोटर-बाष्पशकटीनां व्योमयानानां सागरपोतानाञ्चाविष्कारेण प्रसारेण च संसारः सङ्कुचितीभूय नितरां नैकट्यं प्राप्तः। संसारस्य विप्रकृष्टकोणे संवृत्ताया घटनायाः प्रभावोऽल्पीयस्येव काले प्रत्येकेन मनुजेन समनुभूयते। विश्वभ्रमणमपि सुकरं संवृत्तम्।

(५) मुद्रणकला, समाचारपत्रप्रणाली च—पुरा कतिपये सौभाग्यशालिनो जनाः पठितुं पुस्तकानि वा ग्रहीतुं समर्था भवन्ति स्म। समाचारास्तु, कर्णपरम्परया एव ज्ञायन्ते स्म। परमद्य मुद्रणयन्त्राणां प्रभावेण अतिदुष्प्राप्यमपि ग्रन्थरत्नं स्वल्पमुद्राव्ययेन सामान्येनापि जनेन समादातुं शक्यते। समाचारपत्राणि तु गृहे गृहे पठ्यन्ते। ग्रामीणोऽपि जनो विश्वसमस्यासु स्वमतं प्रयच्छन् चक्षुषोर्गोचरीभवति।

(६) चित्रकला—पुरा स्वहस्तेन महता परिश्रमेण चित्रं निर्मीयते स्म। अधुना तु गृहे गृहे चित्राणि। विनैव शिक्षया अपठितोऽपि क्षण एव चित्रं ग्रहीतुं समर्थो भवति।

(७) चित्रपटः—को न जानाति चित्रपटमद्य। यावान् प्रभावः समाजे चित्रपटस्यास्ति न कस्यचिदन्यवस्तुनः। चरित्रनिर्माणे मुख्यतत्त्वमयमेव जातः। बहुभिर्जनैः भोजनं तु परित्यज्यते परं न चित्रपटावलोकनम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नवनवचित्रनिर्माणे कोटिशो रूप्यकाणि प्रतिवर्षं व्ययीक्रियन्ते। उत्तरोत्तरं सुधारः परिष्कारश्चापि जायते।

(८) अणुवीक्षणयन्त्रम्—दूरवीक्षणयन्त्रम्, पारदर्शकयन्त्रम् (Radium) एतेषामाविष्कारेण खगोलविद्यायां कीटाणुज्ञाने, शल्यचिकित्सायाञ्च चमत्कार एव जातः। मनुष्य उन्नतिपथमारूढः।

(९) ध्वनिप्रसारकयन्त्रम्—ध्वनिप्रेषकयन्त्रम् (Radio) टेलिविजनयन्त्रम् (Tele vision) एतैराविष्कारैस्तु संसारे सर्वविधा क्रान्तिर्जनिता। अधुना वयं गृहे स्थित्वैव स्वरेडियो–साहाय्येन सहस्रक्रोशेभ्योऽपि गीतादिकं श्रृणुमः, टेलिविजन-साचिव्येन तु भाषणकर्तुर्गायकस्य वाऽकृतिरपि दर्शनपथमायाति।

(१०) अणुशक्तिरणुबम्बश्च—गतयुद्ध एव वैज्ञानिकैरनवरताध्यवसायेन अणुशक्तिः परिचयमानीता। अणुबम्बो विनाडिकायामेव लक्षशो जनान् कालकवलितान् कर्तुमीशः। एतस्याविष्कारेण शक्तिसन्तुलनमपगतम्। एतद्धारकः स्वल्पोऽपि देशः समस्तेभ्यो देशेभ्योऽधिकः समर्थः। विश्वस्य प्रतिकोणं जनः प्रतिक्षणं मृत्युमुखे आत्मानमनुभवति।

(११) उदूजनबम्बः—(Hydrogen Bomb) अणुशक्ते रहस्यमेरिकाराष्ट्रादतिरिक्तमन्यैरपि रूसप्रभृतिभिः देशैरवबुद्धम्, अतोऽमेरिकाराष्ट्रं नूतनमेनं बम्बं निर्मातुं दिवानिशं यतते। अयं बम्बोऽशीतिक्रोशपर्यन्तं विध्वंसमारचयितुं शक्तः।

(१२) व्योमयानम्, सागरपोतः, जलान्तर्गामिनी नौका—एतेषामाविष्कारेण युद्धमधुना नितरां भीषणं समजायत। परं वस्तूनां यात्रिकाणाञ्च नयनानयनाभ्यां नागरिकसेवापि प्रचुरमात्रायां क्रियते एभिः।

(१३) टैङ्कप्रभृतीनि शस्त्राणि, अग्निचूर्णादीनि च—विध्वंसकपदार्थनिर्माणेऽपि मानवः पश्चाद् न स्थितः। अस्मिन् क्षेत्रेऽपि नवानि वस्तूनि आविष्काराश्च वेगेन क्रियन्ते।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्थं कृषियोग्यानां यन्त्राणामन्येषाञ्च लाभप्रदसाधनानामाविष्कारेण समुत्पादनदिशि मनुष्येण महती प्रगतिरद्य कृता अवलोक्यते ।

परमतिखेदस्यायं विषयो यत् विज्ञानं रचनात्मकमभूत्वा विध्वंसात्मकं जातम् । अतः प्रतिविंशतिवर्षं विश्वयुद्धं भवति । जीवनयापने कृत्रिमता स्वस्थानं कृतवती दृश्यते । स्वार्थप्रेरितानि सर्वाणि कार्याणि भवन्ति । बर्बरताया युगं पुनः प्रत्यावृत्तम्, नवा नवाः समस्याः प्रतिदिनं समुत्पद्यन्ते । नाशे प्रौढतां समुत्पादयितुं वैज्ञानिकानां मेधा उन्मुखीभूता जाताऽधुना । अनादिकालतः परिष्कारं गच्छन्त्याः सभ्यतायाः संस्कृतेश्च स्वयं मानवद्वारनाशस्य भयं समुत्पन्नम् । किंकर्तव्यविमूढश्चकितश्च साधारणजनश्चक्षुर्गोचरीभवति । हृदयगुणानां नाशोऽभवत् । किं विज्ञानं स्व-वास्तविकलक्ष्यं दिशां वा कदाचिद् स्वीकरिष्यति ?-मेधाविनामग्रे प्रश्नोऽयं वारं वारमायाति । किं विश्वस्य सभ्यतायाः, संस्कृत्या मानवतायाश्च विलोप एव भविष्यति ? प्रश्नोऽयमज्ञातलोकव्यवहारं ग्रामीणमपि विप्रकृष्टदेशस्थितं प्रतिक्षणं व्याकुलीकरोति । भविष्यद्गर्भे किमस्तीति न ज्ञातुं पार्यते । परमाशास्यते नक्तं दिनं यद् विज्ञानं स्व-वास्तविकदिशं परिचिनुयात् ।

(उपसम्पादकस्य)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

१९—भारतसङ्घस्य संविधानम्

पूर्वमपि भारतवर्षे मन्वादिस्मृतिकारनिर्धारितनियमैः सञ्चालिता अत्युत्तमैका शासनप्रणाली विद्यते स्म। परं प्रबलकालवशात् तस्याः सुदीर्घसमयावस्थिततया तत्राऽपरिवर्तनीयता प्रविष्टा, येन उत्तरोत्तरविकासस्य क्रमोऽप्यवरुद्धोऽभवत्। अन्ततो यवनानामधिकारसमये भारते मिश्रिता राज्यप्रणाली प्राचलत्। आङ्गलानामाधिपत्ये सा समाप्ता। आङ्गलाधिपत्यात्पूर्वं भारतीयशासनविधाने देशव्यापिपञ्चायतविधानस्य प्रामुख्यमासीत्। पञ्चायतसमूह एव राज्यप्रासादस्य आधारशिला आसीत्। शासनतन्त्रस्यारम्भिकतत्त्वं पञ्चायतमेव स्वीक्रियते स्म। यवननृपैरपि पञ्चायतेषु हस्तक्षेपो नाकारि। तेषां सत्ता अक्षुण्णा एवातिष्ठत्। अतो विदेशीयशासने कतिपययवननृपाणामन्यायप्रवणत्वेऽपि समाजसंघटनं तादृशमेवातिष्ठत्, परं कूटनीतिकुशलैरंग्रेजैर्भारतपरतन्त्रतां स्थायिनीं कर्तुं पञ्चायतेष्वेव सर्वप्रथमं कुठाराघातः कृतः। शनैः शनैः पूर्वव्यवस्था सर्वथा भग्ना अभवत्।

एकदा तु भारतीयशासनविधाने भारतीयानां चञ्चुप्रवेशोऽपि नाऽऽसीत्। परन्तु १८५७ तमख्रिष्टाब्दे संवृत्त–स्वातन्त्र्यान्दोलनानन्तर वृटिशैर्भारते पाश्चात्त्यपद्धत्यनुसारं केचन नगण्याः शासनसुधारा विहिताः। १८८५ तमख्रिष्टाब्दे संस्थापितस्य कांग्रेसस्य समये समये सञ्चालितैर्वैधानिकैराज्ञाभङ्ग–सत्याग्रहादिकशासनप्रतिरोधात्मकैश्चान्दोलनैः प्रभावितैर्भूत्वा विदेशीय-साम्राज्यवादिभिः १८९२ तमख्रिष्टाब्दे, पुनः १९०९ तमख्रिष्टाब्दे मिण्टो–मारले सुधारनाम्ना १९१९ तमख्रिष्टाब्दे मांटेगो-चेमस्फोर्डशासनसुधारनाम्ना १९३६तमख्रिष्टाब्दे वैधानिकसुधारनाम्ना च भारतीयानां कृते शनैः शनैरुदारतां गच्छन्त्यः कतिपया वैधानिकयोजनाः कार्यरूपे

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परिणमिताः । परन्त्वासु सुधारयोजनासु क्रमशो वरीवृध्यमानसाम्प्रदायिकनिर्वाचनपद्धतेः समावेशेन देशे शनैः शनैः सर्वेषु अपि सम्प्रदायेषु पार्थक्यभावना समुत्पन्ना, येन स्वातन्त्र्यावाप्त्यर्थं सञ्चाल्यमानेषु आन्दोलनेषु सङ्घटितप्रयत्नस्य नितरामभावः समुत्पन्नः। अन्याः प्रचुराः समस्याः प्रतिदिनं समुन्मेषं प्राप्ताः, याभिर्भारतीयानां ध्यानं अन्यदिशि विभक्तम्। स्वातन्त्र्योपलब्धिलक्ष्यं विस्मृतिगर्तमापन्नम्। पारस्परिककलहो वृद्धिमगमत्। अधिकाधिकसाम्प्रदायिकस्वार्थपूत्यर्थमेव सर्वेषां सम्प्रदायानां चरमोद्देश्यं जातम्। अन्ततो गत्वा भावनेयं १९४७ तमख्रिष्टाब्दे पाकिस्तानरूपमाकल्य देशविभागं सञ्जनितवती।

बृटिशानां कूटनीत्या अवरोधार्थं कांग्रेसेनापि प्रयत्नोऽकारि। विंशतितमशताब्द्यास्तृतीयस्यां दशाब्द्यां पं० नेहरूमहोदयेन भारतस्य संविधाननिर्मातुमेकस्या विधाननिर्मातृपरिषदः संस्थापनाय कथितम्। भारतीयानामियमपेक्षा पूर्वं तु बृटिशैर्नाङ्गीकृता। परं १९४२ तमख्रिष्टाब्दे सञ्चाल्यमानेन 'भारतं त्यजत' इत्यान्दोलनेन बृहत्साम्राज्यस्य नियन्त्रणे स्वासामर्थ्येन च विवशीभूतेनाङ्गलसर्वकारेण १९४८ तमख्रिष्टाब्दे विधाननिर्मातृपरिषदः शीघ्रं निर्माणं स्वीकृतम्। १९४६ तमख्रिष्टाब्दे तस्या निर्वाचनं जातं, परं मुसलिमलीगीयानामसहयोगेनान्तरिममन्त्रिमण्डले कांग्रेसस्य वहुमतत्वेऽपि वर्षपर्यन्तन्तु तस्यां दिशि किमपि कार्यं न जातम्। अन्ततो देशविभाजनानन्तरं १९४७ तमख्रिष्टाब्दस्योत्तरार्धे तस्याः कार्यं समारब्धम्। अस्यां दलनैरपेक्ष्येण सदस्या निर्वाचिता अभूवन्। कतिपये विधानपण्डिता विश्वस्य समुन्नतदेशेषु तत्र प्रयुज्यमानानां विधानानामध्ययनाय प्रेषिता अभूवन्। अन्ततो गत्वा वर्षद्वयं यावदनुष्ठीयमानेन महता प्रयासेन पूर्णतया प्रविचार्य विश्वस्य समस्तसर्वोत्कृष्टविधानानां निष्कर्षभूतमेकं संविधानं भारतायापि निर्मितमभवत्। सर्वतः पूर्वन्तु तस्मिन् भारतीयनागरिकैः समुपभुज्यमानानां मौलिकाधिकाराणां परिसंख्यानमक्रियत, यथाहि—

(१) विधिसमक्षं धर्म मूलवंश-जाति–लिंग-जन्मस्थानानां नैरपेक्ष्येण पूर्णसाम्यम्, धर्मादिकमाधारीकृत्य विभेदस्य प्रतिषेधः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(२) राज्याधीनभृत्यतोपलब्धये सर्वेषामवसरसाम्यम् ।
(३) अस्पृश्यतायाः परिसमाप्तिः ।
(४) उपाधीनामप्रचलनम् ।
(५) वाक्–सम्मेलन–संघटनानां स्वतन्त्रता ।
(६) अपराधसंदेहे दोषसिद्धिमन्तरेण दण्डाभावसम्बन्धे उचित-संरक्षणप्रदानम् ।
(७) प्राण–दैहिकस्वाधीनतायाः संरक्षणम् ।
(८) अवस्थाविशेषे बन्दीकरणनिरोधविषयकसंरक्षणम् ।
(९) मानवविक्रयस्य प्रसह्य श्रमग्रहणस्य च प्रतिषेधः ।
(१०) यन्त्रालयेषु बालश्रमिकताया निषेधः ।
(११) अन्तःकरणस्य धर्मनिष्ठाया धर्माचरणस्य धर्मप्रचारस्य च पूर्णस्वतन्त्रता ।
(१२) धार्मिककार्यानुष्ठानाय प्रबन्धस्य स्वतन्त्रता ।
(१३) कस्यचिद् विशेषधर्मस्योन्नतये दानग्रहणस्य स्वतन्त्रता ।
(१४) कतिपयाभ्यः शिक्षासंस्थाभ्यो धार्मिकशिक्षाया धार्मिकोपासनायाश्च स्वातन्त्र्यम् ।
(१५) अल्पसंख्याकानां हितानां संरक्षणम्, तेभ्यः शिक्षासंस्थानां संस्थापनाय तासां प्रबन्धाय चाधिकारः ।
(१६) सम्पत्तेरनिवार्यार्जनम् ।

(१) एषु मौलिकाधिकारेषु आत्यायिकपरिस्थितिसमये केचित् प्रतिबन्धा अपि राष्ट्रहिताय सन्ति ।
(२) दृढकेन्द्रस्य स्थापनसहितं भारतस्य शासनं संघात्मकं भविष्यति । विधानेन इदं सम्पूर्ण-प्रभुत्वसम्पन्नं लोकतन्त्रात्मकं गणराज्यं निर्धारितम् ।
(३) बृटिशराष्ट्रमण्डलेन सहास्य साम्याधारेण विशेषप्रकारसाङ्केतिकः सम्बन्धोऽस्ति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(४) भारतशासनाय चत्वारि तत्त्वानि सन्ति—प्रथमं केन्द्रम्, यत्र प्रमुखशासको राष्ट्रपतिरस्ति। राष्ट्रपतेः सहायतायै परामर्शदानाय च लोकसभाया बहुमतदलात् निर्वाचितः प्रधानमन्त्री तन्नियुक्तञ्च मन्त्रिमण्डलमस्ति। लोकसभा राज्यपरिषच्चेति द्वे संसदनाम्ना व्यवह्रियेते। एक उपराष्ट्रपती राज्यपरिषदः प्रधानो भविष्यति, लोकसभायाः प्रधानः 'स्पीकर'—नाम्नोच्चारयिष्यते। प्रतिपञ्चमवर्षं लोकसभाया विधानपरिषदश्च निर्वाचनं करिष्यते। समस्तानां राज्यानां विधानसभाः, विधानपरिषदः, लोकसभा, राज्यपरिषच्च सर्वाः संभूय राष्ट्रपतेर्निर्वाचनं करिष्यन्ति, यस्य कार्यकालोऽपि पञ्चवर्षाण्येव। संघन्यायालये एको मुख्यन्यायाधीशोऽन्ये च कतिपये न्यायाधीशा भविष्यन्ति। एको महान्यायवादी चापि नियोक्ष्यते।

इत्थं केन्द्रीयशासनस्याधिकारेऽखिलभारतीयमहत्त्वस्य रक्षावैदेशिकसम्बन्ध-यातायातप्रणाली–आन्तरिकप्रबन्धादयो विषयाः सन्ति। संसदो विश्वासेन प्रधानमन्त्री सर्वानधिकारान् वहति। राष्ट्रपतिस्तु वैज्ञानिकशासक एवास्ति। प्रधानमन्त्री अन्यमन्त्रिभ्योऽर्थ-गृह-यातायात–शिक्षा–खाद्य-स्वास्थ्य-रक्षादीनां विभागानां वितरणं करिष्यति, परन्तूत्तरदायित्वं सम्मिलितमेव। विधिविषये परामर्शदानं महान्यायवादिनः कर्तव्यमस्ति।

स्वातन्त्र्यप्राप्त्यनन्तरं भारतीयविधानपरिषदेव भारतीयधारासभायाः कार्यं करोति। वर्षे एकारं त्ववश्यमेव अस्या अधिवेशनं भवति। राष्ट्रपतिरत्र भाषणं कर्तुमधिकारमावहति। प्रतिविधेयकं वादविवादानन्तरं मतं गृह्यते। बहुमतेन स्वीकृतं विधेयकं राष्ट्रपतेः स्वीकृत्या विधिर्भवति। धारासभायां महान्यायवादी मन्त्रिणश्चापि वक्तुमधिकारिणः।

संसदोऽनधिवेशनावसरे राष्ट्रपतिर्देशे शान्तिस्थापनाय राजकीयकार्याणां सुचारुसञ्चालनाय अध्यादेशप्रयोगस्य पूर्णाधिकारी विद्यते। परन्तु स अध्यादेशः षण्मासार्थमेव भवति। राष्ट्रपतेरभावे उपराष्ट्रपतिस्तस्य कार्यं करोति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

संघन्यायालयः सर्वेषामर्थप्रयुक्तानां पारुष्यप्रयुक्तानाञ्च व्यवहाराणामन्तिमं श्रवणस्थानं भवति। तदनन्तरं व्यवहारस्य अन्यत्र कुत्रचिदपि श्रवणं नास्ति।

भारतीयशासने द्वितीया 'क'–भागपठिता विभक्तिरस्ति प्रान्तसमूहः। अधुना भारते मद्रास-बम्बई-पश्चिमीयवंग-उत्तरप्रदेश मध्यप्रदेश बिहार-आसाम-उत्कल-पूर्वीयपञ्जाबेति नव प्रान्ताः सन्ति, येषु राज्यपालो मुख्यशासकः। राज्यपालस्य नियुक्तिर्भारतसङ्घराष्ट्रपतिना क्रियते। प्रान्तीयशासनसञ्चालनाय राज्यपालकार्येषु सहायताप्रदानाय परामर्शदानाय चैकं मन्त्रिमण्डलमपि भवति। प्रान्तीयशासनस्याधीनाः प्रान्तसम्बन्धिनः शिक्षा-स्वास्थ्य-कृषि-न्याय-पुलिस-कारागृहादयो विषया भवन्ति।

प्रत्येकप्रान्तस्य राज्यपालो वैधानिकपरामर्शाय प्रान्तीयप्रधान-न्यायालयस्य न्यायाधीशतायै योग्यस्य कस्यचित् पुरुषस्य मुख्यवाक्कीलत्वेन (Advocate General) नियुक्तिं सम्पादयति। राज्यपालनाम्ना सर्वमपि प्रान्तीयकार्यं समनुष्ठीयते। प्रान्तीयसंचालननियमानां निर्धारणं मन्त्रिषु विभागवितरणं राज्यपालस्य कार्यमस्ति, तत्कार्यं स मुख्यमन्त्रिणः परामर्शेन करोति। प्रान्तेऽपि गृह-स्थानीयस्वायत्तशासनप्रभृतयोऽनेके विभागा भवन्ति। प्रान्तीयमन्त्रिपरिषदः प्रत्येकसदस्यः कस्यचिद् विभागस्योत्तरदायित्वं निर्वहति।

कतिपयप्रान्तेषु धारासभाया भवनद्वयं भवति—विधानसभा, विधानपरिषच्चेति। वर्षे एकवारं तु अवश्यमेव प्रान्तीयधारासभाया अधिवेशनं भवति। राज्यपालस्तु कर्हिचित् कुत्रचिच्च तत्समाह्वाने स्थगने चाधिकारी। स प्रान्तीयधारासभायाः कस्मिंश्चिदपि भवने भाषणं दातुं क्षमते। धारासभायां प्रस्तावे वादविवादानन्तरं बहुमतद्वारा निर्णीतं विधेयकं राज्यपालस्वीकृत्या विधिर्भवति। राज्यपालो विशेषपरिस्थितौ अध्यादेशान् प्रख्यापयति समावेशयति च। तेऽध्यादेशा अपि षण्मासावधिका भवन्ति।

Funding by IKS-MoE

प्रान्तीयमुख्यन्यायालये (High Court) एको मुख्यन्यायाधीशोऽन्ये च कतिपये न्यायाधीशा भवन्ति येषां नियुक्तिरपि राष्ट्रपतिना क्रियते।

भारतीयशासने तृतीया विभक्तिरस्ति 'ख'–भागपठितो मुख्यायुक्तानां प्रान्तसमूहो यस्य शासनं केन्द्रीयराज्य(स्टेट)विभागस्य परामर्शेन राजप्रमुखैः क्रियते। राजप्रमुखानां सहायतायै परामर्शदानाय च 'क'–भागपठितराज्यसमूहवत् मन्त्रिमण्डलमस्ति। अत्रापि धारासभा भवति यस्य कुत्रचिद् भवनद्वयं कुत्रचिच्चैकमेव भवनमस्ति। अस्मिन् समूहे कतिपये तु भूतपूर्वराज्यानां (States) एकीकरणेन सङ्घाः सन्ति, कतिपयानि भूतपूर्वाणि विशालानि राज्यानि सन्ति। एषु जम्मुसहितकाश्मीर-तिरुवांकुरकोचीनपटियाला तथा पूर्वीराज्यसंघ-मध्यभारत-मैसूर-राजस्थान विन्ध्यप्रदेश-सौराष्ट्र-हैदराबादनामानि राज्यानि सम्मिलितानि। राजप्रमुखो राज्यपालवत् सर्वाधिकारान् कर्तव्यानि च निर्वहति। एतेषां संघानां शासनं प्रान्तीयशासनवत् सम्पाद्यते। क-भाग–ख-भाग-राज्यानां स्तरे नास्ति किमप्यन्तरम्।

भारतीयशासनेऽन्तिमा विभक्तिरस्ति 'ग'–भागानुसूचिता— राज्यानाम्, येषु अजमेर-कच्छ-कूचविहार-कोडग-त्रिपुरा-दिल्ली–विलासपुर-भोपाल-मनीपुर-हिमाचलप्रदेशनामानि राज्यानि गण्यन्ते। एषु कतिपयानि राज्यानि तु ब्रिटिशानां राज्यसमयेऽपि केन्द्रोत्तरदायित्वेन मुख्यायुक्तैः (Chief Commissioner) शास्यन्ते स्म, कतिपयानि पूर्वं राजानुशासितराज्यानि (States) आसन्, साम्प्रतं प्रान्तेषु सङ्घेषु वा तेषां विलयमविधायैव केन्द्रेण तेषां शासनं स्वहस्ते कृतम्। एतानि मुख्यायुक्तैः शास्यन्ते। केन्द्रेणात्रापि धारासभायाः प्रबन्धः कृतः। परन्तु एषु मुख्यन्यायालयः (High Court) नैव संस्थापितः। एतेषां प्रबन्धस्य चोत्तरदायित्वं केन्द्रेण धार्यते।

अन्यच्च—'घ'–भागे अण्डमान-निकोवारराज्यमस्ति। यस्य शासनं केन्द्रेणैव क्रियते। अत्र पूर्वोक्तः प्रबन्धो नास्ति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(५) देवनागरीलिप्यां लिखिता हिन्दीभाषा राष्ट्रभाषा निर्धारिता। परन्तु पञ्चदशवर्षाणि यावत् दाक्षिणात्यानां सौविध्यार्थं आङ्गलभाषा अपि राजकीयभाषात्वेन स्थास्यति। असमिया-उड़िया-उर्दु-कन्नड़-कश्मीरी-गुजराती-तामिल-तेलुगु-पञ्जाबी-बंगला-मराठी–मलयालम–संस्कृत–हिन्दीति चतुर्दश-भाषाविधानसम्मताः सन्ति।

संविधानं निर्मितमभवत्। तदनुसारमधुना निर्वाचनं कर्तुं प्रवृत्तो भारतसङ्घः। २६ जनवरी १९४९ ख्रिष्टाब्दतो नूतननिर्वाचनपर्यन्तं मध्यकालाय विधाननिर्मातृपरिषदेव संसदः कार्यं करोति। अन्तरिमकालाय डा० राजेन्द्रप्रसादो भारतसंघस्य प्रथमो राष्ट्रपतिः स्वीकृतः। १८ कोटिमतदातारो नवनिर्वाचने भागं ग्रहीष्यन्ति। आशास्यते नवविधानानुसारं निर्विघ्नं शासनकार्यं प्रचालयिष्यते, भारतस्य सर्वतोमुखीना समुन्नतिश्च सम्पत्स्यते।

(उपसम्पादकस्य)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

२०—सहयोगः प्रतियोगिता च

मानवजीवने साधारणतया विपरीतदिशि कार्यनिरते द्वे वैशिष्ट्ये समुपलभ्येते। प्रथमं सहयोगो द्वितीयं प्रतियोगिता। द्वयोरेव चक्रे समस्तमपि मनुष्यस्य जीवनं ग्रथितमिव नयनपथमायाति। आभ्यन्तरिको बाह्यो वा सर्वोऽप्यस्य व्यवहारो द्वाभ्यामेवैताभ्यां नियम्यते। चरित्रनिर्माणे परिस्थिति-निर्माणे साफल्येऽसाफल्ये चैनयोर्महत्त्वपूर्णं स्थानमस्ति।

मनुष्यः स्वभावत एव सामाजिकः प्राणी अस्ति। अतः प्रतिपदं जीवनसौविध्यार्थमन्येषां सहयोगमपेक्षते। वस्तुतः सहयोगं विना तेन स्वजीवनयापने किमपि कर्तुं न पार्यते। सहयोगं विना तु तस्य जीवनमेव व्यर्थं कठिनं च स्यात्। जीवनस्य मुख्या आधारशिला सहयोग एव मन्तव्यः। भावनेयं मनुष्येषु एव न पशुषु पक्षिषु कीटेषु मक्षिकास्वपि सम्यक्तया समुपलभ्यते। शुकाः कपोता, अन्ये वा पक्षिणः समूह एव तिष्ठन्ति। पिपीलिकाः सर्वदा एकस्थान एव स्वावस्थितिं कुर्वन्ति। शिमलास्थाने जरवखूशिखरे मया वानराः स्वस्ववृन्दं विधाय विचरन्तोऽवलोकिताः।

बाल्यावस्थायां मनुष्योऽसहायावस्थायां भवति। चिरकालपर्यन्तं स अन्येषां सहयोगं विना जीवितुमपि न क्षमते। तदा स परनिर्भर एव वयस्कतां गच्छति। यदि तदा तस्य जननी दुग्धपानं न कारयेत्, पितरौ वा लालनस्य पालनस्य शिक्षणस्य वा प्रबन्धं न कुर्याताम्, तदा कथं तस्य जीवनं कथं वा भाविजीवनयापने योग्यता तत्परिणामे साफल्यञ्च ! वयस्कतायां प्राप्तायामपि विना अन्येषां सहयोगं कथं स स्वावश्यकतापूर्तिं कर्तुं शक्नोति। खाद्यपदार्थानां वस्त्राणाञ्च प्राप्तौ, गृहनिर्माणे, कलाकौशलोपलब्धौ, ज्ञानप्राप्तौ अन्येषु कार्येषु च स प्रतिपदमन्येषां सहयोगप्राप्तये विवशो जायते। यावतः सहयोगस्यावश्यकता वार्धक्ये समनुभूयते तावतोऽ-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न्यदा न। तदा स बालक इव स्वस्य प्रत्येकापेक्षामन्येषां सहयोगनिर्भरो भूत्वैव पूरयति, नान्यथा।

अन्येषां सहयोगेनैव अधिकाधिकज्ञानं समुपलभ्यते। यतः प्रखरमेधावी अपि पृथक् स्थित्वा कस्यचिदपि विषयस्य निःशेषतत्त्वं ज्ञातुं प्रायेणासमर्थ एव भवति। सहयोगं विना तु मनुष्यो ज्ञानप्राप्तयेऽवकाशमपि न लभते। यतस्तस्य समयस्य बहुलभागस्तु जीवनस्य प्रमुखावश्यकतानां पूर्तौ तदेकत्रीकरण एव व्ययीभवति। सहयोगद्वारैव मनुष्य आर्थिकोन्नतिमपि कर्तुमीशः। प्रत्येकक्षेत्रे साफल्यं सहयोगाधीनम्। बहवो मनुजा सहयोगनैव उत्पादनवृद्धिं कुर्वन्ति। सहयोगेन एव मनुष्यः सभ्यो भवति। सहयोगेनैव संस्कृतिविकासो भवति। इत्थं मनुष्यजीवने सहयोगस्य कियद् महत्त्वमस्तीति सम्यक्तया समुपलक्षितमस्माभिः।

मनुष्यजीवनस्य द्वितीयं वैशिष्ट्यं प्रतियोगिता (स्पर्धा) मन्यते। इदं वैशिष्ट्यमपि सहयोगवद् मानवजीवन एव न, प्रत्युत पशुजगति अपि दृग्गोचरीभवति। कतिपये विद्वांसस्तु वृक्षेष्वपि अस्य सत्तामङ्गीकुर्वन्ति।

यदा कश्चित् क्रीडति, धावति वा तदा तस्य मनसि क्रीडायां धावने वा अन्यान् पराजित्याऽतिक्रमणस्य सर्वप्रथमस्थानप्राप्तेश्च इच्छा अनिवार्या भवति। अनया भावनया प्रेरितो मनुष्यः साफल्यार्थं पूर्णप्रयासानुष्ठाने किंचिदपि नावशेषयति। उच्चपदानां समुपलब्धये युवकानां प्रतियोगिता कस्याविदिता अस्ति। प्रत्येकमपि उत्पदप्रेप्सुर्वाञ्छति यत् स एव सर्वश्रेष्ठो भवेत्, अन्यस्तत्स्थानं न प्राप्नुयात्। स्व-स्व-व्यापार–वाणिज्य-समुन्नयनाय वणिग्जनानां प्रतियोगिता विख्याता एव। प्रत्येकं वणिगन्येषामतिक्रमणस्य अत्युत्कटेच्छां बिभर्ति।

कृषौ, कलाकौशले, राजनीत्यां काव्यक्षेत्रे चापि प्रतियोगिताया एव पूर्णप्रभावो विद्यते। कश्चित् चित्रकार एकं सुन्दरचित्रमङ्कयति, गायकः श्रवणाकर्षकं गानं समुपस्थापयति, अत्युच्चकविः कलामयीं कृतिं रचयति। परन्तु द्वितीयस्मिन्नेव क्षणेऽन्यश्चित्रकारस्ततोऽप्युत्कृष्टचित्रस्य, गायकः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रेष्ठगानस्य, कविः पूर्वकवेरपेक्षया उत्तमरचनाया प्रकटनाय पूर्णं प्रयासमनुतिष्ठति ।

एतत्सर्वमपि प्रतियोगितायाः प्रबल-दुर्निरोधप्रेरणयैव भवति । जीवनस्य प्रत्येकक्षेत्रे प्रत्येकस्थाने प्रत्येकसमये प्रत्येकपदे च प्रतियोगिता कृतावस्थाना चक्षुषोः पन्थानमवतरति । वस्तुतः प्रतियोगितां विना मानवजीवनमालस्यमयमवनतञ्च सञ्जायेत, उन्नतिस्तु प्रतियोगितयैव प्राप्यते । यतो यदा कश्चित् पुरुषोऽन्यमुन्नतिपथसोपाने आरोहन्तं पश्यति, तदा तस्यान्तःकरणे स्वभावत एव तदतिक्रमणाय प्रतियोगिताभावना स्वपदं करोति, स चापि जीवने उन्नतिं कर्तुं प्रयतते । इत्थं सहयोग इव प्रतियोगिताऽपि मानवजीवने विशिष्टं महत्त्वं बिभर्ति ।

(उपसम्पादकस्य)

Bhawan's Sri Sankaracharya Sanskrit Vidya ... 780

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

का

शा

Funding by IKS-MoE